CC-0. In Public Domain. Digitization by eGangotri

२५६८

Almira 3
Shelf 3
25

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०९५

अथजागदीशीपंचलक्षणीटिप्पणंकाशीशंकरीप्रारभ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः॥ जागदीशी पंचलक्षण्याः कालीशंकरी॥ अव्याप्यवृत्तिसाध्यकसद्धेताविति शिरोमणिः कपिसंयोगी गगनादित्यादावव्याप्तिविरहाद्वृत्तिमद्धेतावव्याप्त्यर्थमसत्यदम्। अथैवमपि कपिसंयोगाभाववान् गुणत्वादित्यादावव्याप्तिर्न संभवतीति कथं अव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेनाव्याप्तिरुक्ता नचाव्याप्यवृत्तिसाध्यं यत्रेति व्युत्पत्त्या तत्र सन् वर्त्तमानो यो हेतुस्तत्राव्याप्तिरिति वाच्यं तथासति अव्याप्यं वृत्तिसाध्यके हेतुरिति समासेनैव गगनहेतुनिराकरणे सत्पदवैयर्थ्यापत्तेः॥ अपि च संयोगाभावसाध्यकद्रव्यत्वहेतावव्याप्तिसंभवेपि द्वितीयलक्षणेपि तद्वारणायोगात्। तस्मात्केवलान्वयिभिन्नाव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेनाव्याप्तिवारणाय द्वितीयलक्षणमिति युक्तमुत्पश्यामः॥१॥ साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्मधारये साध्याभावपदवैयर्थ्यापत्तेः अतः सप्तमीसमासः कृतः न च तत्रापि साध्यवद्भिन्नेः भाववृत्त्यास्तां किं साध्यपदेन अधिकरणभेदेनाभावभिन्नत्वमते नैवेतल्लक्षणकरणात् गगनाभावादिकमादायाव्याप्तिविरहादिति वाच्यं स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्ने वर्तते यः समवायसंबंधावच्छिन्नवह्न्यभावस्तद्वृत्तिहेतौ वृत्तितया व्याप्तिवारणाय साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताला भाय साध्यपदमिति जगदीशः अत्रेयमाशंका एवं सति स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारयः कथं परित्यक्त इति विभावनीयम् अत्र केचित् सप्तमीसमासपक्षे स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्ने यः साध्यताघटकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्तद्वृत्तित्वमेव वाच्यमन्यथा साध्यताघटकसंबंधावच्छिन्नप्रतियोगिताकाभावमात्रनिवेशे घटभिन्नस्य तादात्म्येन साध्यत्वे पटत्वादिहेतौ द्रव्यत्वात्मकं द्रव्यभेदमादायाव्याप्त्यापत्तेर भावस्यातिरिक्तत्वेपि तद्भिन्नभेदस्य तत्तत्स्वरूपत्वोपगमात् कर्मधारयपक्षे तु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशवैयर्थ्यमिति ध्येयम् केचित्तु कर्मधारयपक्षेः भावत्वेनाभावप्रवेशवैयर्थ्यं साध्यताघटकसंबंधावच्छिन्नप्रतियो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताकत्वमात्रेणाभावनिवेशस्यैवसम्यक्त्वात्। सप्तमीसमासपक्षे तु तद्निवेशे एकधर्मावच्छिन्नाधिकरणत्वस्यैक्यमते साध्यवद्भिन्नवृत्ति
साध्यतावच्छेदकसंबंधावच्छिन्नद्रव्यत्वावच्छिन्ननिरूपकताधिकरणत्वमादाय वन्हिमान्धूमादित्यादावव्याप्तिवारणायाभावत्वेनाभाव
निवेशः निरूपकताया अपि संबंधप्रतियोगित्वाभिन्नत्वात् नचाभावीयाधिकरणत्वीयप्रतियोगित्वयोरेकजातीयत्वमप्रामाणिकमिति वा
म् तयोरेकजातीयत्वस्य केवलान्वयिभट्टाचार्येणोक्तत्वादित्याहुः। २। उच्छृंखलास्तु साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्म
रयः तत्र साध्यवत्त्वं स्वप्रतियोगिकत्वस्वसामानाधिकरण्योभयसंबंधेन एवं च प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वं
साध्यतावच्छेदकावच्छिन्नत्वे च न देयं सामानाधिकरण्यमात्रस्य संबंधत्वे घटाभावादेरपि तादृशसंबंधेन साध्यवत्तयात मादायाव्याप्ति
विरहेण साध्याभाववदित्यत्र साध्यपदवैयर्थ्यापत्तेः। स्वप्रतियोगिकत्वमात्रस्य संबंधत्वे तादृशसाध्यवद्भिन्नसाध्याभावाप्रसिद्धिरतो द्वय
मुपात्तं विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय स्ववृत्तिसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यसंबंधेन साध्यवत्त्वं
तत्र साध्याभाववदित्यत्र साध्यपदसार्थक्याय स्वप्रतियोगिकत्वघटितसंबंधानुधावनं प्रक्षालनाद्धि इत्यादिन्यायेनायुक्तं। सामानाधिकरण्य
मात्रसंबंधेनैव साध्यवत्त्वविवक्षणे सर्वदोषाभावात् विशेषणताविशेषसंबंधेनाभावाधिकरणत्वसामानाधिकरण्यघटकवृत्तित्वं च व
क्तव्यं स च गगनघटितोभयाभावव्यधिकरणसंबंधेन साध्याभावं विपक्षमात्रवृत्त्यभावं चादायाव्याप्तिवारणसंभवात्। अधिकरण
भेदेनाभावभेदादिति। ३। सकलेति। साकल्यं साध्याभाववति साध्ये च बोध्यमिति तत्र साध्याभाववति साकल्यविशेषणे दत्ते एव साध्ये साकल्यविशेषणं सा
र्थकम् अतः प्रथमतः साध्याभाववति साकल्यविशेषणमिति प्रांचः। तन्न मनोरमं गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादावतिव्याप्तिरिति जगदीशः। अत्रेयमा
शंका। ननु साकल्यविशेषणे दत्तेऽपि गगनत्वसाध्योभयाभावमादायातिव्याप्तिरिति चेन्न। इदानीं व्यासज्यवृत्तिधर्मानवच्छिन्नत्वप्रतियोगितायामस्ती
त्यभिप्रायात्। अत्रेदं तत्त्वम्॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·पं साध्येसाकल्यविशेषणस्यवास्तवफलंयद्व्याप्तिवारणंतदग्रेनसंभवतीतिप्राचामाशयः नचगगनेतद्रूपोभयवान् तद्रूसादित्यादौसाध्याभाव॰
का·शं वतिसाकल्यविशेषणेदत्तेप्यतिव्याप्तिस्तत्रसाध्यप्रतियोगिकस्यएतद्रूपाभावस्याधिकरणेहेतोरभावात् गगनेतद्रूपोभयत्वावच्छिन्नाभा
२ वस्यचप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावात्। तादृशसकलसाध्याभावाप्रसिद्ध्याएवनास्माकमतिव्याप्तिरितिसाध्येसाकल्य
विशेषणस्यफलमपिवास्तवमतिव्याप्तिः। प्रथमतोभवतीतिवाच्यं। तत्रसाध्येसाकल्यविशेषणसत्वेपिएतद्घटावृत्तित्वावच्छिन्नाभाववत
द्रूपगगनान्यतराभावंचादायातिव्याप्तिवारणसंभवेनतस्याघातरफलत्वाभावात्। साध्याभाववतिसाकल्यविशेषणेनयत्फलंनभवतितस्य
वैसाध्येसाकल्यविशेषणस्यापीतरफलत्वात्। वस्तुतस्तु। साध्याभाववतीत्युक्तौसाध्याभावःसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको
ग्राह्यइत्युक्तौसाध्याभावोवेत्यनेनसहसाध्याभाववतिसाकल्यविशेषणस्यापिसान्निध्येनवैकल्पिकसंशयःस्यात्। सचनावगच्छेत॥ अतःसा
ध्याभाववतिसाध्येचेत्युक्तमितिगदाधरभट्टाचार्यः। अत्रहेतुतावच्छेदकावच्छिन्नव्यधिकरणापेक्षयाप्रतियोगितावच्छेदकावच्छिन्नप्रति
योगिव्यधिकरणाभावीयहेतुतावच्छेदकावच्छिन्नप्रतियोगित्वनिवेशनंयद्यपिगुरुतथापियथाभिनिवेशनवैयर्थ्यं। वस्तुतःसाध्याभावव
त्सकलनिष्ठहेतुतावच्छेदकावच्छिन्नस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वापेक्षयाहेतुतावच्छेदकावच्छिन्नयत्प्रतियोगितावच्छे
दकावच्छिन्नानधिकरणत्वंसाध्याभाववतस्तत्प्रतियोगित्वरूपंचलाघवेनास्तामितितन्नोक्तं। नचास्माकमपियद्धर्मावच्छिन्नानधिकरण
त्वंसाध्याभाववत्तद्धर्मवत्त्वरूपस्यतदपेक्षयालाघवमितिवाच्यम्। तथासतिव्याप्तेःप्रतियोगित्वरूपत्वानुपपत्त्यामूलासंगतिः सकलस्य
साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्याव्यभिचारिण्यतिव्याप्तिवारणार्थंयदिसाध्याभावस्यविशेषणंयावत्त्वंतदावह्निमान्धूमादित्या राम
दावव्याप्तिस्तत्रापिसपक्षावृत्तित्वावच्छिन्नाभावस्यविपक्षावृत्तित्वावच्छिन्नाभावस्यवासाध्याभावत्तोमस्याधिकरणाप्रसिद्धेरतआह। २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साकल्यं साध्याभाववतीति जागदीशी ॥ अत्रायं भावः। तत्रोक्तसाकल्यविशेषणं किं दोषवारणाय कुत्र देयमित्याशंकायां गगनावृत्तिधर्मवान्द्र
व्यत्वात् इत्यत्रातिव्याप्तिवारणाय साकल्यस्य साध्यांशे विशेषणत्वेपि धूमवान् वन्हेरित्यादावतिव्याप्तिवारणासंभव इति सर्वत्रातिव्याप्ति
वारणार्थं साध्याभाव एव विशेषणं देयमिति पुनः सकलसाध्याभावाधिकरणाप्रसिद्ध्याव्याप्तिरित्युक्तरूपावदतिव्याप्तिः अप्रसिद्धिनिबंधना॥
व्याप्तिवारणाय साकल्यं प्रथमतः साध्याभावविशेषणं न तु साध्य इति अत्रेयमाशंका ननु साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य
लक्षणे निवेशनीयतया तमादाय कथमव्याप्तिरिति वाच्यम्। अभावद्वये प्रतियोगिवैयधिकरण्यावच्छिन्नत्वस्यावश्यं निवेशनीयतया सम
वायादिसंबंधावच्छिन्नप्रतियोगिताकाभावमादाय दोषाभावात्॥ तल्लक्षणे तस्यानिवेशनीयत्वादन्यथा धूमवान्वन्हेरित्यादौ संयोगसंबंधाव
च्छिन्नप्रतियोगिताकाभावस्य गुणादावेव सत्वादप्रसिद्ध्याभिधानस्योन्मत्तप्रलापापत्तेः। अथवा धूमवान्वन्हेरित्यादावतिव्याप्तिवारणार्थं सा
ध्याभावाधिकरणे साध्यतावच्छेदकसंबंधेन किंचिद्धूमवत्त्वस्य विशेषणीयतया संयोगसंसर्गेण च घटावृत्तित्वावच्छिन्नाभावपटावृत्तित्वा
वच्छिन्नाभावरूपसाध्याभावस्तोमस्याधिकरणे गुणादौ संयोगेन किंचिद्धूमवत्वाप्रसिद्ध्या व्याप्तेर्दुर्वारत्वात्। अथ प्रागुक्तयुक्त्या संभवेऽव्या
प्त्यभिधानमसंगतं न च तद्घटभिन्नं पटत्वादित्यादावेव लक्षणगमनान्नासंभव इति वाच्यं। अत्रापि पटभेदावच्छिन्नपटभेदावच्छिन्नाभावरू
पसाध्याभावस्तोमस्याधिकरणाप्रसिद्धेर्दुर्वारत्वात्। न च पटभेदावच्छिन्नाभावस्य प्रतियोगित्वं घटादिभेदे स्वीक्रियते न तु तस्य प्रतियोगि
त्वं साध्येपीति वाच्यम्। तावत्पर्यंतानुधावने धूमवान्वन्हेरित्यादौ घटावृत्तित्वावच्छिन्नाभावस्य प्रतियोगित्वं घटादिभेदे स्वीक्रियते। ननु
प्रतियोगित्वं धूमादावप्यतो लाघवानुसंधानं नास्तीति चेत्सत्यं। पटावृत्तिधर्मवान् घटत्वादित्यादौ लक्षणसमन्वयसंभवान्नासंभव इति नत्वत्र प
टभेदत्वावच्छिन्नाभावस्य मठभेदत्वावच्छिन्नाभावस्य घटावृत्तिधर्माभावस्य च साध्याभावस्तोमस्याधिकरणाप्रसिद्धेर्वाव्याप्तिसंभवइ

... Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·पं·

का·शं·

३

तिवाच्यं। तादृशाभावस्य यावत्साध्यप्रतियोगिकत्वविरहेणसाध्याभावे यावत्साध्यप्रतियोगिकत्वविवक्षया तद्वारणात्। नचतत्पटवृत्तिध
र्माभाववत्पटानुयोगिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावो भयात्मकसाध्याभावस्तोमस्याधिकरणाप्रसिद्धेर्वाव्याप्तिसंभवइति
वाच्यं विशेषरूपेणसंसर्गत्वास्वीकारेक्षत्यभावात् केचित्तुसाध्येसाकल्यविशेषणदानेप्युभयपक्षेनित्यज्ञानानुयोगिकविषयत्वसंबंधाव
च्छिन्नप्रतियोगिताकघटाभावे साध्ये पटत्वादिहेतौलक्षणागमनान्नासंभवस्तत्रसाध्याभावस्याधिकरणत्वस्यनित्यज्ञानेसत्वादितिदिक्।।प्र
तियोगिवैय्यधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकंप्रतियोगिवैय्यधिकरण्यावच्छिन्नयद्धर्मावच्छिन्नाभावत्वंतद्धर्मवत्वंव्या
प्तिरित्युक्तौतु नकोपिदोषइतिध्येयम्।। जगदीशः।। नचकपिसंयोग्येतद्वृक्षत्वादित्यादावव्याप्तिवारणायसाध्याभावेप्रतियोगिवैय्यधिकरण्यस्य
सार्थक्येपि हेत्वभावे प्रतियोगिवैय्यधिकरण्यमनर्थकमेव। नचैतद्वृक्षत्ववान्कपिसंयोगादित्यादावतिव्याप्तिवारणायतदितिवाच्यम्। तत्रसा
ध्याभाववतिजलादौकपिसंयोगाभावस्यसत्वेपितदवच्छिन्नाभावस्यापितत्रसत्वादितिचेन्न। द्रव्यंविशिष्टसत्वादित्यादावव्याप्तिवारणायप्र
तियोगिवैय्यधिकरण्यस्यव्यापकताशरीरेदेयत्वात्। अन्यथाद्रव्यत्वाभाववतिगुणादौविशिष्टसत्वाभावत्वावच्छिन्नाभावस्यसत्तास्वरूपत
यातदवच्छिन्नाभावस्यतत्रसत्वेनविशिष्टसत्ताभावत्वस्यव्यापकतावच्छेदकत्वविरहात्। अधुनातु। तत्रापिविशिष्टसत्वाभावस्याभावसत्वे
पितादृशाभावप्रतियोगिनोविशिष्टसत्वाभावस्यगुणादौसत्वेनप्रतियोगिवैय्यधिकरण्यावच्छिन्नाभावस्यव्यापकताशरीरेनिवेशनीय
तयातद्दोषवारणेपिवृक्षत्ववान्कपिसंयोगादित्यादावतिव्याप्तिर्दुर्वारैवेतितद्वारणायहेत्वभावेप्रतियोगिवैय्यधिकरण्यावच्छिन्नत्व
विशेषणमवश्यंनिवेशनीयमितिध्येयम्।।४।। इदन्तुयथाश्रुतमेवान्यथासाध्याभाववन्निष्ठाधिकरणतानिरूपकतावच्छेदकतानुयोगि
तानिरूपितप्रतियोगितायाअवच्छेदकत्वाभावस्यतादृशाभावत्वेनिवेशनीयतयैवद्रव्यंविशिष्टसत्वादित्यादावव्याप्तिवारणसंभवेन्या

राम

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पकताशरीरे प्रतियोगिवैयधिकरण्यमनादेयमिति ध्येयं ॥ केचित्तु व्यापकताघटकीभूताभावस्य साध्यवद्वृत्तित्वं यदि येन केनापि संबंधेन
तदा वन्हिमान्धूमादित्यादावव्याप्तिः। वन्ह्यभाववति कालादौ कालिकसंबंधेन धूमाभावाभावस्य सत्वात्। नापि हेतुतावच्छेदकसंबंधेन सत्ता
वान्जातेरित्यादौ सत्ताभाववति सामान्यादौ प्रकृतहेतुतावच्छेदकसंबंधेन वृत्तित्वाप्रसिद्धेः। नापि हेतुतावच्छेदकसंबंधान्यहेतुप्रतियो
गिकसंबंधातिरिक्तसंबंधेन सत्तावान् समवायेन प्रमेयादित्यादावव्याप्तेस्तत्र समवायस्यैव निरुक्तसंबंधतया साध्याभाववति सामान्यादौ
तेन संबंधेन वृत्तेरप्रसिद्धेरेतेन हेतुतावच्छेदकसंबंधान्यहेतुतावच्छेदकसंबंधेन वर्त्तमानहेतुमत्प्रतियोगिकान्यसंबंधेन वृत्तित्वनिवेशा
न्न कोपि दोष इत्यपि निरस्तम्॥ निरुक्तस्थले स्वरूपसंबंधस्यापि तथात्वात् साध्याभाववति सामान्यादौ तेन संबंधेन प्रमेयत्वस्वरूपहेत्वभावा
भावस्य वृत्तेरिति। नापि हेतुतावच्छेदकसंबंधस्वरूपान्यतरसंबंधेन घटवान् प्रमेयत्वादित्यादौ घटानुयोगिकस्वरूपसंबंधेन हेतुताया
मव्याप्तिस्तत्र साध्याभाववत्सु पटादौ स्वरूपसंबंधेन हेतोर्वृत्तेरतो येन केन संबंधेन वृत्तित्वं वन्हिमान्धूमादित्यादावव्याप्तिवारणाय व्याप
कताशरीरे प्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयत्वात्। तन्निवेशे च हेत्वभाव एतद्वृक्षत्ववान्कपिसंयोगादित्यादावतिव्याप्तिवा
रणार्थं प्रतियोगिवैयधिकरण्यावच्छिन्नस्यावश्यकत्वमिति ध्येयम्॥ ६॥ निर्धूमत्वव्याप्येति निर्धूमत्वव्याप्याभाववति पर्वतमहानसादौ व
न्ह्यभावाभावस्य वन्हिस्वरूपस्य यावद्विपक्षावृत्तित्वेपि वन्ह्यभावभेदस्य यावद्विपक्षवृत्तित्वसंभवात् नाव्याप्तिः न चात्यंताभावानिवे
शे धूमवान्वन्हेरित्यादावतिव्याप्तिरयोगोलकवन्हिभेदसत्वादिति वाच्यं धूमाभाववति वन्ह्यादौ वन्हिभेदासत्वेनातिव्याप्तेरनवकाशा
दिति चेदत्र केचित्॥ वन्ह्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यवान् वन्ह्यभावान्यत्वविशिष्टनिर्वन्हित्वादित्यादावव्याप्तिस्तत्र साध्याभा
ववति वन्ह्यभावे वन्ह्यभावभेदात्मकहेत्वभेदस्यासत्वात् पर्वतादौ च वन्ह्यात्मके हेत्वभावस्य यावद्विपक्षावृत्तित्वादिति॥ न च वन्ह्यभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰पं॰ वान्यत्वविशिष्टवन्ह्यभावाभावोनवन्हिस्वरूपः किंत्वतिरिक्तएवान्यथावन्ह्यभावेविशिष्टाभावबुद्ध्यनुदयप्रसंगइतिवाच्यं।प्रतियोगि॰
काशीं तासंयोगान्यतरसंबंधेनतद्वन्हिनैवोपपत्तौअतिरिक्ताभावानभ्युपगमादि ति॥ अत्रेदंचिंत्यंभवतुविशिष्टाभावोवन्हिस्वरूपः तथापिसंयो
४ गेनैववन्ह्यभावाभावप्रतियोगितावच्छेदकत्वात्। वन्ह्यभावत्वस्यनाव्याप्तिः। नचसंयोगसंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभावाभावभे
दात्मकहेतुभेदस्यासत्वात् अभावप्रतियोगितावच्छेदकमभावत्वमितिहेतुतावच्छेदकस्यानवच्छेदकत्वादव्याप्तिस्तथापीतिवाच्यं। वि
षयतासंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभावान्यत्वविशिष्टवन्ह्यभावाभावस्यसाध्याभाववतिसर्वस्मिन्नेवसंभवादव्याप्त्यभावात्। ए
वंचधूमाभावव्याप्यवान्वन्ह्यभावादित्यत्रहेतुतावच्छेदकविशेषणताविशेषसंबंधेनप्रतियोगिव्यधिकरणविषयतासंबंधावच्छिन्नप्रति
योगिताकवन्ह्यभावाभावस्ययावद्विपक्षेसत्वान्नाव्याप्तिरितिचेदत्रकेचित् रत्यनियामकस्यव्यधिकरणसंबंधस्यवाप्रतियोगितावच्छेदक
त्वानंगीकारेणतत्राव्याप्तिरित्यभिप्रायेणायंग्रंथइतिध्येयम्॥७॥ ॥ः॥ ॥इ॰जा॰पं॰कालीशं॰समा॰॥अथजागदीश्याःसिंहव्याघ्रस्यका
लीशंकरीलिख्यते॥ ॥श्रीगणेशायनमः॥ साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वा नधिकरणत्वमित्यस्यसाध्यनिष्ठाभावप्रतियो
ग्याधेयतानिरूपकाधिकरणवृत्तित्वानधिकरणत्वमितिपर्यवसितार्थेवन्हिमान्धूमादित्यादौमहानसीयवन्ह्यादिनिष्ठाभावप्रतियोग्या
धेयतानिरूपकाधिकरणपर्वतादिवृत्तित्वस्यधूमेसत्वात् अव्याप्तिरिति। साध्यसामान्यनिष्ठाभावप्रतियोगीत्येवं वक्तव्यम्। तथाचसा
मान्यपदस्यव्यापकत्वार्थकत्वादितिगौरवमतः कल्पांतरमितिजगदीशेनोक्तं। नन्वत्रसाध्यतावच्छेदकसंबंधावच्छिन्नाधेयतानिवेश
स्यावश्यकत्वम्। अन्यथासमवायसंबंधावच्छिन्नपर्वतवृत्तित्वाभावमादायवन्हिमान्धूमादित्यादावव्याप्तिः। तथाचद्रव्यवान्धूमादित्यादौसा राम
ध्यसामान्यनिष्ठाभावप्रतियोगिसाध्यतावच्छेदकसंबंधावच्छिन्नाधेयत्वाप्रसिद्धेः। एवंवन्हिमान्पर्वतरूपान्यतरत्वादित्यादावतिव्या ४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिः। तथाहि साध्यनिष्ठाभावप्रतियोगियत्साध्यतावच्छेदकसंबंधावच्छिन्नाधेयत्वं तन्निरूपकह्रदादौ तादृशान्यतरत्वस्यासत्वात्। अत्रकेचि
त्साध्यसामान्यनिष्ठाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नाधेयत्वसंबंधावच्छिन्नप्रतियोगित्वाश्रयनिरूपितवृत्तित्वस्यानधिकरणत्व
मेव निष्कृष्टदलार्थः। तथाच पर्वतादौ वन्हिनिष्ठाभावप्रतियोगित्वाभावान्नाव्याप्तिरिति। अत्र यद्यप्येतादृशसंबंधस्य वृत्यनियामकतया
तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽसंभवापत्तेः। तथापि साध्यतावच्छेदकसंबंधावच्छिन्नत्वसाध्यनिष्ठत्वोभयाभाववत्वमाधेय
तायां निवेशेन पूर्वोक्तदोषावकाशः। नच वन्हिमान्धूमादित्यादौ समवायसंबंधावच्छिन्नपर्वताधेयत्वस्यापि तथात्वेनाव्याप्त्यापत्तेरिति
वाच्यम्। साध्यतावच्छेदकसंबंधातिरिक्तसम्बन्धावच्छिन्नत्वं साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिक
रणतावन्निरूपितत्वोभयाभाववदाधेयत्वस्यैव विवक्षितत्वात् नपूर्वोक्तदोषः। नच तथापि समवायेन प्रमेयसाध्यकसत्वादिहेतावव्या
प्तिः। प्रमेयसामान्यनिष्ठाभावप्रतियोगितादृशाधेयत्वस्याप्रसिद्धेरिति वाच्यम्। सामान्यपदस्य व्यापकतार्थकत्वेन साध्यतावच्छेदकसंबं
धप्रतियोग्यनुयोगिकसाध्यतावच्छेदकताघटकसंबंधेन साध्यतावच्छेदकस्य व्यापकत्वनिवेशान्नदोष इति ध्येयं। अतिचिन्त्यम्।
आधेयभेदेनाधेयताया भिन्नत्वात्तद्वन्हिमान् तद्धूमादित्यादावव्याप्तिः। तद्वह्निनिष्ठो योऽभावस्तत्प्रतियोगियत्तद्धूमनिष्ठाधेयत्वं। तन्निरू
पकाधिकरणं यत्तद्धूमाधिकरणं तद्वृत्तित्वानधिकरणत्वस्य तद्धूमेऽसत्वात्। नच यन्निरूपितवृत्तित्वसामान्याभावः साध्ये तन्निरूपित
वृत्तित्वानधिकरणत्वमेव हेतौ व्याप्तिः। तथाच तक्तौ तद्धूमाधिकरेण निरूपितवृत्तित्वसामान्याभावो नास्ति तत्पदेन तद्धूमाधिकरणं धर्तुं न
शक्यते। किंतु ह्रदादिकमेव तन्निरूपितवृत्तित्वानधिकरणत्वं तद्धूमेऽस्तीति वाच्यम्। एवं सति धूमवान्वन्हेरित्यादौ धूमे ह्रदनिरूपितवृत्ति
त्वसामान्याभावस्य सत्वात्। यत्पदेन ह्रदं धृत्वा तन्निरूपितवृत्तित्वानधिकरणत्वस्य वह्नौ सत्वादतिव्याप्तिः। नच यद्यन्निरूपितवृत्तित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·सि॰ भावः साध्येतत्तन्निरूपितवृत्तित्वानधिकरणत्वमेव हेतौ विवक्षणीयम्। तथाच धूमायोगोलकनिरूपितवृत्तित्वाभावोऽप्यस्ति। तत्तन्निरू
का·शे॰ पितवृत्तित्वानधिकरणत्वं वह्नौ नास्तीति नातिव्याप्तिरितिवाच्यम्। एवं यदधिकरणानधिकरणं साध्यमिति पूर्वव्याख्यायां धूमवान्वह्नेरि
५ त्यत्रातिव्याप्तिवारणार्थं यद्यत्तदप्रवेशे गौरवमिति दानं जगदीशस्य विरुध्येत यद्यत्तदप्रवेशस्यावश्यकत्वादिति ध्येयम्। अत्र लक्षणे वन्हिमा॰
न्धूमादित्यादौ विषमव्याप्तावव्याप्तिः। महानसीयवह्नौ पर्वतनिरूपितवृत्तित्वाभावो वर्त्तते। तत्प्रतियोगिपर्वतनिरूपितवृत्तित्वं तन्निरूपका
धिकरणं पर्वतः तन्निरूपितवृत्तित्वमेव धूमेऽस्तीति न तत्तदनधिकरणत्वमिति जगदीशेनोक्तम्। अत्र यदि आर्द्रेन्धनप्रभववन्हिमान्धूमा
दित्यादिसमव्याप्तहेतावव्याप्तिः संभवति। महानसीयवन्ह्याद्यकार्द्रेन्धनप्रभववह्नौ वर्त्तमानो यः पर्वतवृत्तित्वाभावस्तत्प्रतियोगिपर्वतवृत्ति
त्वं। तन्निरूपकाधिकरणवृत्तित्वस्य पर्वतीयधूमे सत्वात्। ननु शब्दवान् गगनत्वादित्यादिसमव्याप्तौ नाव्याप्तिः संभवति शब्दे गगनवृत्ति
त्वाभावविरहात्। समव्याप्तत्वावच्छेदेनाव्याप्तिर्न संभवति। अतो विषमव्याप्तानुधावनमिति चेन्न। सत्ताद्रव्यत्वान्यतरवान्द्रव्यत्वादि
त्यत्र विषमव्याप्तावप्यव्याप्तिर्न संभवति। सत्तायां द्रव्यत्वे वा द्रव्यत्वासामानाधिकरण्यविरहात्। विषमव्याप्तत्वावच्छेदेनापि अव्याप्त्य॰
संभवादिति चेदत्राहुः। साध्यनिष्ठसामानाधिकरण्यसंबन्धावच्छिन्नाभावेत्यादिकल्पे आर्द्रेन्धनप्रभववन्हिमान् धूमादिसमव्याप्तौ का॰
प्यार्द्रेन्धनप्रभववन्हेः सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकधूमसामान्याभावो नास्ति। वन्हिमान्धूमादित्यत्र यत्र हेतौ व्यभिचा
रः। तदधिकरणावच्छेदेन सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकहेतुसामान्याभावसत्वात्। समव्याप्ते तु साध्यहेतौ व्यभिचार
एव नास्ति। कुतस्तदवच्छेदेन साध्ये निरुक्तसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकहेतुसामान्याभावसत्वमित्यपि न युक्तम्। तथा स॰ राम
तिवह्निनिष्ठस्य सामानाधिकरण्यसंबंधेन तत्तद्धूमाभावस्य प्रतियोगित्वाधिकरणत्वस्य तत्तद्धूमे सत्वात्। आर्द्रेन्धनप्रभववन्हिमान्धूमादि ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादावव्याप्तेर्दुर्वारत्वात्। तादृशसंबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकहेतुतावच्छेदकमिति विवक्षयाऽव्याप्तिवारणे
विधूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः। वस्तुतो विषमव्याप्तत्वं व्यधिकरणवृत्तिसाध्यतावच्छेदकत्वमिति नानुपपत्तिरिति। केचित्तु स्वस
मानाधिकरणसाध्यकहेतोरेव विषमव्याप्तपदेन विवक्षिततया आर्द्रेन्धनप्रभववन्हिमान्धूमादित्यादौ विषमव्याप्तत्वं। ननु शब्दवान्गगन
त्वात्। सत्ताद्रव्यत्वान्यतरवान्द्रव्यत्वादित्यादावित्याहुः। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वानधिकरणत्वमित्यर्थः। साध्यनिष्ठा
धेयत्वं साध्यतावच्छेदकसंबंधावच्छिन्नं बोध्यम्। अन्यथा रूपवान्महाकालत्वादित्यादौ समवायेनाव्यभिचारिण्यतिव्याप्तिः। यद्यपि
कालिकसंबंधावच्छिन्नरूपनिष्ठाधेयतानिरूपकाधिकरणत्वस्यैव महाप्रलयेऽपि सत्वात्। संबन्धसामान्येन रूपनिष्ठाधेयत्वानिरूपका
धिकरणत्वं न महाप्रलये किंतु गगन एव। तन्निरूपितवृत्तित्वानधिकरणत्वस्य कालत्वहेतावपि सत्वात्। तत्राप्यतिव्याप्तिसंभवे महाकाल
त्वानुधावनं व्यर्थं। यादृशहेतुकव्यभिचारिमात्र एवाधेयतायां साध्यतावच्छेदकसंबंधानिवेशेऽतिव्याप्तिः तादृशहेतुः महाकालत्वमे
व न तु केवलं कालत्वं। तथाहि जन्यरूपवान्कालत्वादित्यादौ जन्यभावानधिकरणरूपमहाप्रलये कालिकसंबंधावच्छिन्नायाजन्यरूपादि
निष्ठाधेयतातन्निरूपकाधिकरणत्वस्य सत्वात्। तादृशकालनिरूपितवृत्तित्वस्य महाकालत्वे सत्वादतो महाकालत्वानुधावनं। तथा च महा
काले वृत्तिमन्मात्रस्यैव कालिकसंबंधेन वृत्तित्वात्। ननु कालिकसंबंधावच्छिन्नकिंचिन्निष्ठाधेयताया अनिरूपकाधिकरणत्वं महाकालेऽ
स्तीति। न च तथापि कालिकसंबंधेन वाच्यत्वस्य साध्यता जन्यत्वं हेतुः। आधेयतायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वानिवेशे तत्राव्याप्तिरे
व भवति स्वरूपसंबंधावच्छिन्नवाच्यत्वनिष्ठाधेयतानिरूपकाधिकरणत्वस्य सर्वत्र सत्वात्। संबन्धसामान्यावच्छिन्नवाच्यत्वनिष्ठाधेय
त्वानिरूपकत्वस्याप्रसिद्धेः एवं महाकालान्यत्वस्य यत्र साध्यता स्वरूपसंबंधेन समवायेन घटत्वं हेतुस्तत्र कालिकसंबंधेन महाका ला।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा·सिं· न्यत्वस्य महाकाले सत्वात्। स्वरूपसंबंधेन महाकालान्यत्वस्य महाकालातिरिक्ते सत्वात्। संबंधसामान्यावच्छिन्नमहाकालान्यत्वनिष्ठा
का·शं· धेयत्वनिरूपकाधिकरणत्वाप्रसिद्धेः। अत्राव्याप्तिसंभवेऽतिव्याप्तिपर्यंतानुधावनं जगदीशेन कथं कृतमिति वाच्यम्। यत्किंचित्संबंधाव
६ च्छिन्नसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वानधिकरणत्वं यद्धेतावस्ति तद्धेतौ लक्षणगमनं संभवतीति यद्युच्यते तदा कालिक
संबंधेन वाच्यत्वसाध्यकजन्यत्वहेतौ कालिकसंबंधावच्छिन्नवाच्यत्वनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वानधिकरणत्वस्य जन्य
त्वे सत्वात्। स्वरूपसंबंधेन महाकालान्यत्वसाध्यकघटत्वहेतौ च स्वरूपसंबंधावच्छिन्नमहाकालान्यत्वनिष्ठाधेयत्वानिरूपकाधिक
रणवृत्तित्वानधिकरणत्वस्य घटत्वे सत्वान्नाव्याप्तिः संभवति। एवंप्रकारेण कालिकसंबंधावच्छिन्नरूपनिष्ठाधेयत्वानिरूपकाधिकरणवृ
त्तित्वानधिकरणत्वस्य महाकालत्वे सत्वात्। रूपवान् महाकालत्वादित्यत्रातिव्याप्तिः प्रसज्येत। अत्राधेयतायां यत्किंचित्सम्बन्धा
वच्छिन्नत्वमनिवेश्य विशेषतः साध्यतावच्छेदकावच्छिन्नत्वस्य निवेशनं कृतमिति। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्याप
काभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः। अथात्र साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वं स्वरूपसंबंधेन तादृशानिरू
पकत्ववत् यदधिकरणत्वं तद्व्यापकत्वा धिकरणत्वं परित्यज्य तादृशानिरूपकत्वव्यापकत्वं किं वा सामानाधिकरण्यसंबंधेन तादृशानि
रूपकत्वविशिष्टं यदधिकरणत्वं तद्व्यापकत्वं वा निवेश्यते। नाद्यः। घटभिन्नं पटत्वादित्यादावव्याप्तेः। साध्याधिकरणताभिन्नाधिकरणता
मात्रस्यैव साध्यनिष्ठाधेयत्वानिरूपकत्वसत्वात्। तादृशनिरूपकाधिकरणत्वव्यापकत्वस्य हेत्वधिकरणत्वाभावेऽप्रसिद्धेः। परकल्पद्वयं
नसाधू वह्निमान् वह्न्यधिकरणतात्वाद् वह्न्यधिकरणत्वपर्वतान्यतरत्वाद्वेत्यादावतिव्याप्तेः। हेत्वधिकरणतात्मकाधिकरणतायां हेत्वधिकर राम·
णपर्वतस्य साध्यनिष्ठाधेयतानिरूपकत्वस्य सत्वात् इति चेन्न। साध्यनिष्ठाधेयत्वाभावव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वस्य ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्कृष्टार्थस्याविवक्षितत्वात्। तादृशाधेयत्वाभावश्चस्वनिरूपकत्वस्वनिरूपकाधिकरणत्वोभयसंबंधावच्छिन्नप्रतियोगिताकोवोध्यइतिनको
पिदोषइति। साध्यनिष्ठाधेयत्वाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमितिनिष्कृष्टकल्पोपरि। नचहेतुतावच्छेदकसंब
न्धेनयद्धूर्मावच्छिन्नाभावत्वेनतादृशाधिकरणताव्यापकत्वमित्यस्यैवसम्यक्त्वे। अधिकरणत्वाभावपर्यंतप्रवेशोव्यर्थइतिवाच्यम्॥
वृत्त्यनियामकसंबन्धेनहेतावतिप्रसंगात्। तादृशसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः। अस्माकन्तु तादृशसंबंधेनयद्धेतुसंबंधित्वंत
स्यस्वरूपसंबन्धावच्छिन्नाभावमादायलक्षणसमन्वयसम्भवादितिजगदीशः। अत्रेयमाशंका। हेतुतावच्छेदसंबंधावच्छिन्नयद्धूर्मा
वच्छिन्नाभावत्वेनव्यापकतानिवेशेसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यंहेतुतावच्छेदकसम्बंधेनवक्तव्य। अन्यथावन्हि
मान्धूमादित्यादौसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतयोधूमावयवः तत्रधूमाभावाभावस्यसमवायेनवर्त्तमानत्वात्तत्प्रतियोगितावच्छे
दकंधूमाभावत्वमित्यव्याप्तेः। एवंचसत्तावान्जातेरित्यादौसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणेसामान्यादौहेतुतावच्छेदकसंबंधेनवृत्ति
त्वाऽप्रसिद्धाऽव्याप्तिः। एवञ्च यादृशस्थलेऽव्याप्त्यापूर्वोक्तलक्षणंपरित्यज्यएतादृशलक्षणंकृतंतादृशस्थलएवाव्याप्तिः सम्भवतीतितामु
पेक्ष्यकथंचैत्रत्ववान् तद्धूनादित्यादिस्थलांतरानुधावनेकृतं। एतंद्रव्यविशिष्टसत्वादित्यत्रसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणेगुणे
सत्तास्वरूपविशिष्टसत्ताभावाभावोवर्त्तते तत्प्रतियोगितावच्छेदकंविशिष्टसत्वाभावत्वमितितत्राप्यव्याप्तिःपरिहारएतादृशविवक्षायांन
सम्भवतीतिचेदत्राहुः। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकमत्रसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतयत्किं
चिद्व्यक्तिवृत्त्यधिकरणतानवच्छेदकंयद्भिन्नत्वरूपंनिवेशनीयं अत्रयत्किंचिद्व्यक्तिवृत्त्यधिकरणताहेतुमतायहविरोधितावघटकसंबंधा
वच्छिन्ना तथाचवन्हिमान्धूमादित्यत्रचधूमावयवनिष्ठायास्वरूपसंबंधावच्छिन्नाधिकरणतातदवच्छेदकत्वस्यैवसंयोगसंबंधावच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का·सिं· ऽप्रतियोगिताकधूमाभाववत्वेसत्वात्। एवंद्रव्यंविशिष्टसत्वादित्यादौद्रव्यत्वनिष्ठाधेयत्वानिरूपकाधिकरणोयोगुणः तद्वृत्तिर्यास्वरूपसं
का·श· बंधरूपहेतुमत्वग्रहविरोधिताघटकसंबंधावच्छिन्नाधिकरणतातदवच्छेदकत्वस्यैवविशिष्टसत्ताभाववत्वेसत्वात्। निरुक्तव्यापकतावच्छेद
७ कत्वंनक्षतमेव। धूमवान्वन्हेरित्यत्रधूमनिष्ठाधेयत्वानिरूपकाधिकरणंयद्योगोलकंतन्निष्ठायास्वरूपसंबंधरूपहेतुमत्ताग्रहविरोधिताघ
टकसंबंधावच्छिन्नाधिकरणतातदनवच्छेदकत्वस्यवन्ह्यभाववत्वेसत्वान्नसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतयत्किंचिद्व्यक्तित्वा
धिकरणतानवच्छेदकभिन्नत्वमस्तीतिनातिप्रसंगः यत्किंचित्पदमपि अतिव्याप्तिवारणार्थमेव अन्यथात्रपह्रदनिष्ठाधिकरणताव-
च्छेदकत्वस्यैववन्ह्यभाववेसत्वात्। वन्ह्यभाववत्वस्यव्यापकतावच्छेदकत्वापत्तेः। अत्रेदंचिंत्यते। द्रव्यगुणान्यतरत्ववान्कर्मत्वाभावादित्य
त्रव्यभिचारिण्यतिव्याप्तिः। तथाहिसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणपदेनजात्यादिकंधर्तुंनशक्यते। तन्निरूपितसमवायरूपहेतुम
त्ताग्रहविरोधिताघटकसंबंधावच्छिन्नवृत्तित्वाप्रसिद्धेः। यदिकर्मध्रियते तदासमवायरूपहेतुमत्ताग्रहविरोधिताघटकसंबंधावच्छिन्ना
धिकतावच्छेदकत्वस्यैवकर्मत्वाभावाभाववत्वरूपहेत्वभावाभाववत्वेसत्वान्निरुक्तव्यापकतावच्छेदकत्वस्याक्षतत्वात्। एतेनतादृशाधिक
रणताव्यापकत्वंनतद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वंकिंतुतादृशाधिकरणविशिष्टान्यत्वंवैशिष्ट्यंचस्वनिष्ठावच्छेदकताकभेदवत्वसंबं
धेन अवच्छेदकताच निरवच्छिन्नाधेयतासंबंधेन आधेयताच हेतुमत्ताग्रहविरोधिताघटकसंबंधेन। एवंसतिसत्तावान्द्रव्यत्वादि
त्यादौनाव्याप्तिसंभवइतिनिरस्तम्। द्रव्यत्वगुणत्वान्यतरवान्द्रव्यगुणान्यतरत्ववान्वाकर्मत्वाभावादित्यादावतिव्याप्तिः। तथाहि
तादृशनिरूपकाधिकरणपदेनजात्यादेर्धारणंनसंभवति। तन्निष्ठहेतुमत्ताग्रहविरोधिताघटकसंबंधावच्छिन्नाधेयत्वाप्रसिद्धेः किंतुता राम
दृशाधिकरणपदेनकर्मणएवग्रहणं। तद्विशिष्टान्यत्वंहेत्वभावेसत्वादिति। नचप्रतियोगिवैयधिकरण्यघटितव्यापकतायानिवेश्यत्वात् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापकत्वघटकतद्वन्निष्ठत्वांशेसंबंधनिवेशस्यवैकल्पात् तन्निवेशइतिवाच्यम्। अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसंग
यदि च साध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाधिकरणतासामान्येहेतुतावच्छेदकसंबंधावच्छिन्नयद्ध:
च्छिन्नप्रतियोगिताकाभाववत्त्वावच्छिन्नत्वहेतुमत्ताग्रहविरोधिताघटकसंबंधावच्छिन्नत्वएतदुभयाभावः। तद्धर्मभिन्नहेतुता
दकत्वसमेवव्याप्तिः। तथा च धूमवान्वन्हेरित्यादावयोगोलकनिष्ठाधिकरणतासामान्यएवविशेषणताविशेषसंबंधावच्छिन्नत्ववह्य:
त्वावच्छिन्नत्वएतदुभयाभावसत्त्वाद्यद्धर्मपदेनवन्हित्वंधर्तुंशक्यते तद्धर्मभिन्नोनहेतुतावच्छेदकः। वह्निमान् धूमादित्यत्रतुसाध
ष्ठाधेयत्वानिरूपकाधिकरणतायांधूमाभाववत्त्वावच्छिन्नविशेषणताविशेषरूपहेतुमत्ताग्रहविरोधिताघटकसंबंधावच्छिन्नत्वएत
योः सत्त्वात् यद्धर्मपदेनधूमत्वंधर्तुंनशक्यते। अधिकरणतात्वन्तुनिरवच्छिन्नंग्राह्यं अन्यथाधूमवान् वन्हेरित्यत्रसंयोगेनवन्हेरव्या
प्तित्वात् अयोगोलकनिष्ठाधिकरणतायांवन्ह्यभाववत्त्वावच्छिन्नत्वविशेषणताविशेषसंबंधावच्छिन्नत्वएतदुभयोः सत्त्वेऽपि [illegible]योगोल
निष्ठनिरवच्छिन्नाधिकरणतायांतादृशोभयोभावसत्त्वान्नातिव्याप्तिरित्युच्यतेतदास्यसामान्यपदघटितत्वेनयद्धर्मावच्छिन्नाधिकरणत्व
भावत्वेनसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वापेक्षयागुरुत्वेना ——— नुत्थितेः। वस्तुतःसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणा[illegible]रूपित
त्तितायांहेतुतावच्छेदकसम्बंधावच्छिन्नत्वंनदेयम्। किंतुवन्हिमान्धूमादित्यादावव्याप्तिवारणायहेतुनिष्ठत्वहेतुतावच्छेदकसंबंधाव
च्छिन्नत्वएतदुभयाभावनिवेश्यत्वान्नसंबंधान्तरावच्छिन्नवृत्तित्वमादायवन्हिमान्धूमादित्यादावव्याप्तिः। सत्तावान् द्रव्यत्वादित्या
समवायसंबंधावच्छिन्नतादृशवृत्तित्वाप्रसिद्धावपिस्वरूपसंबंधावच्छिन्नवृत्तित्वस्यतादृशत्वान्नदोषः। यद्यपिसत्तावान् समवायेन
यादित्यादौसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणसामान्यादिनिरूपितनिरुक्तोभयाभाववद्वृत्तित्वाप्रसिद्धिः। तथापिहेत्वभावाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·सिं च्छिन्नत्वहेतुतावच्छेदकसंबंधातिरिक्तसंबंधावच्छिन्नत्वएतदुभयाभावस्यविवक्षितत्वात्।सामान्यादिनिरूपितवाच्यत्वत्वावच्छि
का·शं वृत्तितायाःप्रसिद्धत्वान्नकोपिदोषः।परेतुसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणनिष्ठाधिकरणतानिरूपकतावच्छेदकीभूतानुयोगितानि
८ पितप्रतियोगितानवच्छेदकंयद्धूमावच्छिन्नाभावत्वंतद्धर्मवत्त्वस्यविवक्षितत्वात्। अधिकरणताचनसंबंधविशेषणानिवेशनीया संयोग
संबंधावच्छिन्नप्रतियोगिताकधूमाभावस्यसंयोगातिरिक्तसंबंधेनअधिकरणतानिरूपतानवच्छेदकत्वात्।वन्हिमान्धूमादित्यादावव
प्तेरभावाच्च।एकसंबंधावच्छिन्नप्रतियोगिताकाभावाभावत्वस्यान्यसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वास्वीकारा
अतएवकपालस्यसमवायेनघटत्वावच्छिन्नवत्वेपिसंयोगसंबंधावच्छिन्नघटाभावाभावत्वावच्छिन्नत्वाप्रसिद्ध्यैवतादृप्येणप्रमात्वा स
वात्संयोगादिसंबंधेनैवतादृशघटाभावाभावत्वावच्छिन्नाधिकरणतायाःपारमार्थिकत्वात्। इतिकेवलान्वयिग्रंथेजगदीशेनसम म
नमितितच्चिन्त्यम्।साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमित्यत्रसत्तावान् द्रव्यत्वादित्यादौतादृशाधिकरणनिरूपितहेतु ना
दकसंबंधावच्छिन्नाधेयत्वाप्रसिद्ध्याव्याप्तिरतोनिष्कृष्टकल्पउक्तः।नन्वत्रहेतुतावच्छेदसंबंधान्यहेतुनिरूपितसंबंधान्यसंबंधे क
शाधिकरणवृत्तित्वंविवक्षणीयम्। तथासति।सत्तावान्द्रव्यत्वादित्यादौतादृशसंबंधःस्वरूपएवतेनसंबंधेनतादृशावृत्तित्वाव्या वं
प्रसिद्धं। तद्धइदस्यहेतोःसत्वान्नाव्याप्तिसंभावनापीतिकेचित्।पूर्वपक्षइति। तन्नसत्तादौसाध्येसमवायेनप्रमेयत्वेनहेतावव्याप्तिः। हेतु दि
च्छेदकसंबंधान्यहेतुनिरूपितसंबंधान्यसंबंधः केवलसत्वायएव तेनसंबंधेनसत्तानिष्ठाधेयत्वानिरूपकाधिकरणंयत्सामान्यादि ह्रि
रूपितवृत्तित्वाप्रसिद्धेः।हेतुतावच्छेदकसंबंधान्यहेतुतावच्छेदकसंबंधप्रतियोगिप्रतियोगिकसंबंधान्यसंबंधेनवृत्तित्वोक्तौसत्तावान्प्र त्ता राम
दित्यादौतादृशसंबंधःस्वरूपएवतेनसंबंधेनसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणसामान्यादिवृत्तित्वस्यप्रमेयसत्वादितिध्येयम्। चर त् ७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·
का

धिकरणत्वांशस्यानतिप्रयोजनकतयाइत्यादिव्याख्यानं दीधितिकृता कृतम्। अथात्र तद्वत्त्वानुक्तौ यद्धर्मावच्छिन्नाभावः तादृशाधि
व्यापकः तद्वत्त्वमित्यर्थः। अत्र यद्धर्मावच्छिन्नाभावे हेतुतावच्छेदकसंबंधेनैव वाच्यः। अन्यथा धूमवान् वन्हेरित्यादौ स्वरूपादिसंबं
न्हित्वावच्छिन्नाभावस्यापि तादृशाधिकरणत्वव्यापकत्वाद् तिव्याप्तिः। नन्वेवं वृत्त्यनियामकसंबंधेन हेतुतायां तत्संबंधावच्छिन्न
योगित्वाप्रसिद्ध्या ऽव्याप्तिः। वन्ह्यादौ साध्ये संयोगेन रूपादिहेतौ तादृशसंबंधावच्छिन्नरूपाभावस्य केवलान्वयितया ऽतिव्याप्तिः।
धिकरणत्वांशस्योपादाने च हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नसंबंधित्वस्य स्वरूपसंबंधावच्छिन्नाभावस्य लक्षण
तयानाव्याप्तिः। संयोगसंबंधावच्छिन्नरूपत्वावच्छिन्नसंबंधित्वाप्रसिद्ध्यानातिव्याप्तिश्चेति चेन्न हेतुतावच्छेदकसंबंधावच्छिन्न
र्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्तादृशाधेयत्वानिरूपकाधिकरणत्वव्यापकस्तद्धर्मवत्त्वमित्यर्थकरणादेवाधिकरण
स्यानतिप्रयोजकत्वात्। वृत्त्यनियामकसंबंधेन हेतुतायां तत्संबंधावच्छिन्नावच्छेदकत्वस्वीकारान्नाव्याप्तिः। संयोगादिसंबंधेन रूपस्
ध्याप्रसिद्ध्या तत्संबंधावच्छिन्नरूपनिष्ठावच्छेदकत्वस्यालीकत्वात्। नातिव्याप्तिरिति गूढाभिप्रायः। साध्यानधिकरणानधिकरण
मिति लक्षणस्य साध्यं यदधिकरणानधिकरणतत्त्वाभाव इत्यर्थः। ननु निरुक्तमूले नैवतादृशार्थबोधनात् दीधितिग्रन्थासंगतिरि
चेन्न। अधिकरणमधिकरणं यस्येति समासेन तादृशार्थलभ्यत्वात्। तथाहि व्यासार्थो यन्निरूपिताधिकरणत्वावच्छिन्नप्रतियो
ताकभेदवदधिकरणं। समासार्थस्तु अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकं साध्यं अधिकरणानधिकरणं य
तिसाध्याधिकरणानधिकरणं। अत्र व्यासार्थस्तु। यन्निरूपिताधिकरणनिष्ठभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकं साध्यमि
समासार्थस्तु। साध्यनिरूपिताधिकरणत्वावच्छिन्नप्रतियोगिताकभेदाश्रयीभूताधिकरणवृत्तित्वस्याभाव इति श्रावप्रत्ययात्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·सिं
का·शं·
९

त्वलाभः। ततोसाध्याधिकरणानधिकरणमिति नञ्तत्पुरुषः। नञश्चसाध्यपदोत्तरनिपातः साध्यनिपातस्यभट्टाचार्येणलिखितत्वादि
लक्षणप्राप्तिः साध्यस्यानधिकरणंसाध्यवद्भिन्नमितियावत्। तादृशाधिकरणंआधेयतानिरूपकंयस्यततोभावप्रत्ययात्। साध्यानधिकरण
लाभः। ततोनञ्समासः। नञ्साध्यानधिकरणपदोपात्तः। इतिद्वितीयार्थस्यप्राप्तिः। तदुभयमपीत्यादौसाध्यइत्यादेः। साध्यंयदधिकरणानधिक
रणंतत्वाभावइतिदीधितिः॥ अत्रजागदीशी साध्यानधिकरणेत्यादौ नञव्यत्ययेन चरमाधिकरणत्वेनसहान्वयलाभाल्लाभइत्याहुः ननुसा
ध्यानधिकरणानधिकरणत्वशब्देनसाध्यंयदधिकरणानधिकरणंतत्वाभावस्याबोधनादसंगतिरितिचेन्नव्यमतेबहुव्रीहिस्थलेविग्रहवाक्य
यादृशार्थःप्रत्याय्यतेतत्पदार्थवैपरीत्येनान्वयावगाहिबोधःसमासेनजन्यतेइतिव्युत्पत्तेरधिकरणमनधिकरणंआधेयतानिरूपकंयस्यसाध्य
तिप्रथमंबहुव्रीहिः॥ ततोधिकरणानधिकरणंयस्यइति तदुत्तरं भावप्रत्ययाच्चनञ्तत्पुरुषः नञःसाध्यपदोत्तरंनिपातः भट्टाचार्ये
णसाध्यनिपातस्यचापिनयेनत्युत्पत्यविरोधात्। तत्रप्रथमबहुव्रीहिवाक्येनयत्पदार्थेसाध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नप्र
गिताकभेदवदधिकरणमितिबोधः। समासेनतुअधिकरणनिष्ठाभावप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावत्साध्यमि
बोधोजन्यते। द्वितीयबहुव्रीहिणावाक्येनतुयत्पदोत्तरषष्ठ्यर्थस्यवृत्तितानिरूपकत्वस्याधिकरणांशेवगाहिनात्तप्रकारएवबो
तीयबहुव्रीहिणातुपुनस्तत्पदार्थेनञव्यत्ययेनसाध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवदधिकरणनिरूपितत्वं
दार्थेबोध्यतेभावप्रत्ययेनतादृशवृत्तित्वमात्रंनञतत्पुरुषेणतदभावइतिरीत्याचरमाधिकरणांशविनिर्मुक्तस्यसाध्यनिष्ठाधेयतानिरूपकाधिकरणवृत्तित्वाभ
स्यप्रथमलक्षणार्थस्यावगतेः। द्वितीयलक्षणार्थावगतिस्तु। एवंरीत्यासाध्यस्यानधिकरणंसाध्यानधिकरणंसाध्यवद्भिन्नमितियावत्। तदेवाधिकरणमाधेयतानि
रूपकंयस्येतिवाक्येनयन्निष्ठाधेयतानिरूपकंसाध्यवद्भिन्नमितिबोधः। समासेनतुसाध्यवद्भिन्ननिरूपितवृत्तित्वयत्पदार्थेबोध्यतेइतिप्राचांसमाधानं। अत्रोत्पत्तिर्वव

स
मा
के
बं
दि
हि
ता
त

राम
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·सिं· देनघटे पृथिवीत्वेन रूपवद्वृत्तित्वं इति प्रतीत्या पृथिवीत्वादौ रूपवद्वृत्तित्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठावच्छेदकत्वं निरवच्छिन्नत्वं
का·श· तेन रूपवान् पृथिवीत्वादित्यादौनाव्याप्तिः। तत्र घटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदादिति ध्येयमिति जगदीशाः। अत्र केचि
१० पन्ति। न च हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणावच्छेद्यसाध्योपलक्षितवृत्तित्वाभावस्यैव लक्षणे निवेश्यतां। अन्यथाव
गभावे वह्निविशिष्टनिरूपितवृत्तित्वाभावस्य सत्वात् वह्निमान् वह्निप्रागभावादित्यादावव्याप्तिस्स्यात्। तथा च साध्यविशिष्टनि-
तवृत्तित्वाभावसत्वेपि साध्योपलक्षितनिरूपितवृत्तित्वाभावविरहेण वह्निमान्वह्निप्रागभावादित्यादावव्याप्तिविरहात्। कथं हेत
रणनिष्ठावच्छेदकतायां निरवच्छिन्नत्वनिवेशितमिति वाच्यम्। साध्योपलक्षितनिरूपितवृत्तित्वाभावस्य निवेशेऽपि वह्निमान्व
गभावादित्यादावव्याप्तिवारणार्थं हेत्वधिकरणनिष्ठावच्छेदकतायां निरवच्छिन्नत्वं देयम्। अन्यथा वह्न्यधिकरणकालावच्छे
न्त्वुपलक्षितनिरूपितवृत्तित्वाभावसत्वादव्याप्तिरिति ध्येयम्॥ ॥इति जागदीशी पंचलक्षणी टिप्पणं कालीशंकरी समाप्ता॥ छ
वाराणसीप्रसादस्य नियोगेन प्रयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयं शिलाक्षरैः॥ ॥श्रीकाशीजीमे ज्ञानवापीके पूर्वफाटकपर
श्वनाथजीके पास श्री ३ युत महाराज शिवलाल दूबेजीके मकानमे काशीसंस्कृतमुद्रायन्त्रमे छपि जिनको लेना हो य उन्होने इसछापे
के कार्यसंपादक बाबू वाराणसीप्रसादयाके चौरीगलीमे भाई प्रतापसिंहजीके दुकानपर मिलेगी॥ मितिज्येष्ठशुद्ध ८ मंदवासरे संवत् १९

CC-0. In Public Domain. Digitization by eGangotri

इतिजागदीशीपंचलक्षणीटिप्पणं कालीशंकरीसमाप्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथमाधुरीपंचलक्षणीटिप्पणंकालीशंकरीलिख्यते॥

Nepal Sanskrit University, Balmeeki ...

CC-0. In Public Domain. Digitization by eGangotri

म॰शु॰टी॰ ॥श्रीगणेशाय नमः॥ साध्यतावच्छेदकसंबंधावच्छिन्न साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववृत्तिसाध्यसामान्य
१ योगितावच्छेदकसंबंधेन साध्याभाववत्त्वं विवक्षितं मथुरानाथेन। अथात्र साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभाववृत्ति
त्वं। किं साध्यतावच्छेदकावच्छिन्न इत्यनेन आत्मत्वप्रकारकप्रमाविशेष्यत्वाभाववान् आत्मत्वादित्यादौ आत्मत्वप्रकारकप्रमाविशे
भावात्मकसाध्यस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वा
व्याप्त्यभावादिति चेन्न। तादृशाभावस्यापि समवायादिसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावनिष्ठस्वरूपसंबंधावच्छिन्नप्रति
कत्वात्। न च तथापि साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगि[illegible]साध्या– भावनिष्ठस्वरूपनिष्ठत्वनिवेशेनैवोक्ताव्याप्तिवारण
वात् ले साध्यतावच्छेदकावच्छिन्नत्वनिवेशेनेति वाच्यम्॥ आत्मत्वविशिष्टप्रमेयत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताक
वृत्तिस्वरूपसंबंधावच्छिन्नप्रतियोगिताया अपि तादृशसाध्यनिरूपितत्वात् तदवच्छेदकीभूतस्वरूपसंबंधेनात्मत्वप्रकारकप्रमादि
त्वस्वरूपसाध्याभावस्यात्मनि सत्त्वादुक्ताव्याप्तितादवस्थ्यात् साधतावच्छेदकावच्छिन्नत्वनिवेशे च आत्मत्वविशिष्टप्रमेयत्वावच्छि
भावस्य साध्यतावच्छेदकीभूतात्मत्वप्रकारकप्रमाविशेष्यत्वाभावत्वावच्छिन्नप्रतियोगिताकत्वविरहान्नाव्याप्त्यवकाश इति न चैषमपि
लिकसंबंधावच्छिन्ननिरवच्छिन्नाधिकरणत्वाप्रसिद्ध्या व्याप्तितादवस्थ्यमिति वाच्यं निरवच्छिन्नत्वपदेन निरवच्छिन्नवृत्त्यनियाम
संबंधानवच्छिन्नत्वावच्छिन्नत्वो भयाभाववत्त्वस्य विवक्षितत्वात्॥ कालिकसंबंधावच्छिन्नाधिकरणतायां निरवच्छिन्नवृत्त्यनियाम
कसंबंधानवच्छिन्नत्वविरहाद्वा –भयाभावस्याक्षतत्वात्। कालिकसंबन्धानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्त्वनिवेशेनैवोप
पत्तौ अनुगमोऽन्यथेइति चेन्न। दिक्कृतविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताकात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यादावव्याप्त्यापत्तेः दिक्कृतविशेषणताविशेषसंबंधावच्छिन्ननिरवच्छिन्नाधिकरणत्वाप्रसिद्धेः तादृशसंबन्धावच्छिन्नाधिकरणता
मुक्तोभयाभाववत्त्वविरहात् अथैवमपि कालिकसंबन्धावच्छिन्नप्रमेयाभावस्य स्वरूपसंबंधेन साध्यतायामात्मत्वादिहेतावव्याप्तिः ति य
कालिकसंबन्धावच्छिन्नप्रतियोगिताकतादृशप्रमेयाभावाभावस्यातिरिक्तत्वेपि प्रमेयत्वेन तादृशप्रमेयत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्र
न्नप्रतियोगिताकाभाववत्तयातन्निष्ठसाध्यीयप्रतियोगितावच्छेदकीभूतस्वरूपसंबंधस्यापि लक्षणघटकतयाहेतुमति प्रमेयात्मकसा
ध्याभावस्यसत्त्वादिति चेन्न। साध्यतावच्छेदकसंबंधावच्छिन्नइत्यादिकृत्यं तेन साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधाव
च्छिन्नप्रतियोगितानिरूपकीभूतानुयोगितावच्छिन्नत्वं विवक्षितत्वात् तथाच साध्यतावच्छेदकतादृशप्रमेयाभावत्वावच्छिन्नप्रति
रूपसंबंधावच्छिन्नप्रतियोगितानिरूपकत्वस्य प्रमेयाभावीयकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावत्वरूपानुयोगितायामस
त् तादृशप्रमेयाभावत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभावत्वरूपानुयोगितायाएवतन्निरूपकत्वात् तदवच्छिन्न
कसंबंधावच्छिन्नप्रतियोगितायाएवसाध्यनिरूपितत्वात् तदवच्छेदकीभूतकालिकसंबंधेनसाध्याभाववति काले आत्मत्वादेर
त्वान्नोक्ताव्याप्त्यवकाश इति ध्येयं॥१॥ साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसामान्यीयप्रतियोगिता
दकसंबंधेनसाध्याभावाधिकरणं वाच्यं अतो नाभावसाध्यकाव्याप्तिः साध्यसामान्यीत्वं च यावत्साध्यनिरूपितत्वं स्वानिरूप नसा
कभिन्नत्वमितियावत् तच्च प्रतियोगिताविशेषणं तेन समवायेन विषयितया प्रमेयसाध्यके ज्ञानत्वादिहेतौ प्रमेयाभावस्य कालि न्य
वच्छिन्नप्रतियोगिताको योभावस्तस्यापि प्रमेयतया तन्निरूपितप्रतियोगितावच्छेदककालिकसंबंधेन साध्याभावस्वाधिकरणे ध्या
व्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभाववृत्तित्वं प्रतियोगिताविशेषणं तेनात्मत्वप्रकारकप्रमाविशेष्यत्वस्यका सा
यक

CC-0. In Public Domain. Digitization by eGangotri

म·टि·मा नाभावस्य स्वरूपसंबंधेन साध्यत्वे आत्मत्वादिहेतौ नाव्याप्तिः। अत्र प्रतियोगितावच्छेदकवत्प्रतियोग्यप्यन्योन्याभावाभावस्त्वे
२ नघवादेः साध्यत्वे घटत्वादिहेतौ नाव्याप्तिः इत्थं चात्यंताभाववत्वं निरूपितत्वेनापि प्रतियोगिताविशेषणीया तेन घटभिन्नं घट
दित्यादौ नाव्याप्तिः॥ इति माथुरी॥ अत्रेदमाशंकते। घटभिन्नं कपालत्वादित्यादावव्याप्तिः साध्याभाववृत्तिसाध्यीयप्रतियोगिता
समवायसंबंधेन घटस्वरूपसाध्याभावस्य साधनाधिकरणे वृत्तेः अत्र विवक्षणीयसाध्याभावत्वविशिष्टनिरूपिताधिकरणत
लेऽसत्वात् तत्राव्याप्तिरिति चेन्न पक्षो घटभेदाधिकरणे विरोधिता घटकसंबंधेनैव घटभेदाभावाधिकरणत्वेन स्वीक्रियते तथा च तादा
त्म्यव्यक्त्या समं समवायेन घटव्यक्त्या च समं विरोधिता घटभेदे न समं घटभेदाभावस्य समवायेनैव विरोधिता न तु तादात्म्येनानुभ
धादिति तादात्म्येन घटभेदाभाववति घटत्वे हेतौ वृत्तेरव्याप्तिवारणाय अत्यंताभावत्वनिवेशः घटभेदाभावस्य विरोधिता घटकसम
कपाले स्वीकारात् घटभिन्नं कपालत्वादित्यादौ नाव्याप्तिरित्याहुः वस्तुतो यादृशसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वं तादृशसा
भावाधिकरणनिरूपितवृत्तित्वसामान्याभावस्य विवक्षितत्वात् न चात्यंताभावत्वनिरूपितप्रतियोगितानिवेशो व्यर्थ इति वाच्यं। तद्वि
क्षाया अत्रैव तात्पर्यात् घटभिन्नं पटत्वादित्यादावव्याप्तिमाशंक्य साध्याभाववृत्तिसाध्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छे
दकसंबंधेन साध्याभावाधिकरणं विवक्षितं मथुरानाथेन अत्र कालिकसंबंधेनाभाववतः संयोगेनाभावे साध्ये गुणत्वादिहेतावव्याप्
तिः साध्याभाववृत्तियत्साध्यीयप्रतियोगितावच्छेदकत्वं तदवच्छेदककालिकसंबंधेन साध्याभावाधिकरणे गुणादौ हेतोर्वर्तमानत्वा
त् एवं कालिकसंबंधेन प्रमेयविशिष्टस्य संयोगेनाभावे साध्ये गुणत्वादौ तादात्म्येन घटविशिष्टस्य संयोगेनाभावे साध्ये घटानधिकर
णत्वादौ चाव्याप्तिरिति चेन्न। साध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकत्वं भेदत्वं निरूपितत्वेन विशेषणीयमिति सर्वं सामंजस्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवं घटभिन्नं कपालत्वादित्यादौ अव्याप्तिरिति चेन्न। साध्याभाववद्वृत्तित्वघटकसाध्याभावपदेन साध्यनिष्ठात्यन्ताभावत्वनिरूपकप्रतियो
गिताश्रयस्य विवक्षितत्वात्॥ यद्वा साध्यव्यापकस्य साध्यसमव्यापकस्य यस्य कस्यचित्पदार्थस्यात्यन्ताभावत्वनिरूपकप्रतियोगिताश्र
यो यः साध्यतावच्छेदकावच्छिन्नाभावस्तस्य विवक्षणात् घटभिन्नं कपालत्वादित्यादौ तादृशसाध्याभावश्च न घटः पटभेदेन सह विशेष
णताविशेषसंबंधेन समव्यापको यो घटत्वात्यन्ताभावस्तत्प्रतियोगितायां घटे भावात्। घटभेदस्य चात्यन्ताभावत्वनिरूपितप्रतियोगि न घट
इति घटस्य साध्याभावपदेन संग्रहः इत्थं च समवायरूपतादृशसंबंधेन घटभेदाभावस्य घटस्याधिकरणे कपालत्वस्य वृत्तित्वेपि नाव्याप्ति
। घटत्वस्यैव तादृशसाध्याभावपदार्थत्वात् समवायरूपतादृशसंबंधे तदधिकरणे घटे कपालत्वस्यावृत्तेरिति ध्येयं। वस्तुतस्तु यद्वाव
ल्पे धर्म्मिणो भेदस्य धर्मात्यन्ताभाववत्त्वं न कल्प्यते एवं भेदाभावस्य प्रतियोगिस्वरूपं न कल्प्यते तदकल्पनेप्ययं घट एतत्वादित्यत्रान
व्याप्तिः घटभिन्नभेदस्य स्वरूपत्वेन घटभेदात्मकसाध्याभावस्य घटात्मसाध्यीयप्रतियोगितावच्छेदकतया तदवच्छेदकताघटक
रूपसंबंधमादाय लक्षणसंगमनसंभवादिति तत्त्वं। घटभिन्नं कपालत्वादित्यत्रापि नाव्याप्तिः घटभेदाभावस्य घटात्मकत्वादिति ध्येयं
भाववद्वृत्तित्वमित्यस्य साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेन सा
भावाधिकरणत्वं यद्वा साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तिसाध्यसामान्यीयप्रतियोगित्वतदवच्छेदकत्वान्य
च्छेदकसंबंधेन साध्याभावाधिकरणत्वं विवक्षितं मथुरानाथेन। अत्रोभयकल्पे घटभिन्नं कपालत्वादित्यादावव्याप्तिः साध्या
त्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसमवायेन घटरूपस्य साध्याभावस्याधिकरणे कपाले हेतोर्वृत्तित्वात्॥ प्रमेयसा
स्य घटत्वस्य साध्यसामान्यीयप्रतियोगितावच्छेदकत्वसत्त्वात्। तदवच्छेदकसमवायेन घटरूपस्य साध्याभावस्याधिक

CC-0. In Public Domain. Digitization by eGangotri

म॰टी॰क॰ हेतोर्वृत्तितयाचाव्याप्तिः। अथास्मद्गुरुचरणाः स्वावच्छिन्नत्वस्वावच्छिन्ननिरुक्तप्रतियोगितावच्छेदकत्वान्यतराश्रयनिरू
३ यसंबंधेन स्वविशिष्टसाध्याभावाधिकरणत्वस्य विवक्षितत्वाददोषः घटभिन्नं कपालत्वादित्यत्र कपालनिष्ठसाध्याभावाधिक-
समवायसंबंधावच्छिन्नत्वेपि समवायसंबंधावच्छिन्नान्यतरत्र यद्घटत्वादिनिष्ठमवच्छेदकत्वं तदाश्रयघटत्वनिरूपितत्व
भयसंबंधेन समवायविशिष्टत्वं एवं तदधिकरणत्वस्य तादात्म्यसंबंधावच्छिन्नान्यतरत्र यद्घटनिष्ठप्रतियोगित्वं तदाश्रयनिरू
तादात्म्यसंबंधावच्छिन्नत्वाभावान्नोभयसंबंधेन तादात्म्यविशिष्टत्वं किंतु घटनिष्ठाधिकरणत्वमेव तादृशवृत्तित्वस्य हेतौ सत्त्वान्न
रिति स्वनिष्ठास्यंताभावत्वनिरूपकतादृशतादृशप्रतियोगितावच्छेदकान्यतरावच्छेदकसंबंधेन स्वात्मकसाध्याभावाधिकरणय
त्वमर्थः॥ तेन घटभिन्नं कपालत्वादित्यादौ नाव्याप्तिरित्यपि कश्चित्। सत्तावान् जातेरित्यादौ हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वा
ध्याः व्याप्तिरतो हेतुतावच्छेदकसंबंधावच्छिन्नाधेयत्वीयस्वरूपसंबंधेनाधेयत्वसामान्याभावो विवक्षितो मथुरानाथेन। अत्रेयमनु
तादृशाविवक्षणे वह्निमान्धूमादित्यादौ शैवालादिनिष्ठतादृशसंबंधावच्छिन्नवृत्तित्वस्य कालिकसंबंधेन धूमे सत्त्वादव्याप्तिः सं-
तीति तत्परित्यागो नुचित इति मेवं हेतुतावच्छेदकसंबंधावच्छिन्नहेत्वधिकरणनिरूपिताधेयत्वीयसंबंधेन साध्याभावाधिकरणनिरूपि
त्तित्वसामान्याभावस्य विवक्षितत्वादिति साध्यवद्भिन्नसाध्याभाववदवृत्तित्वलक्षणे साध्याभाववत्वं न विशेषणताविशेषसंबंधेन घटत्
भाववान् पटत्वादित्यादावव्याप्तेः। किंतु साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेनाभाववत्वं विवक्षणीयं वह्निमान्धू
मादित्यादौ विशेषणताविशेषसंबंधेन प्रतियोगिताको वन्ह्यभावाभावो वन्हिस्वरूप एव तन्निरूपितवन्ह्यभावनिष्ठप्रतियोगितावच्छेदकसं
बंधश्च विशेषणताविशेष एव नाव्याप्तिः सामान्यपदोपादानात्समवायेन प्रमेयसाध्यकसत्ताहेतुकस्थले समवायसंबधावच्छिन्नप्रतिये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिताकप्रमेयाभावस्यपः कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यप्रमेयत्वेनसाध्यांतर्गततयातन्निरूपितसाध्याभाववृत्तिसाध्य
यप्रतियोगितावच्छेदकसंबंधावच्छिन्नसाध्याभाववतिहेतोर्वृत्तित्वेपिनक्षतिः ननुसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकप्रमे
यस्याभावोलाघवेनसत्तास्वरूपंकल्प्यते तन्निरूपितप्रतियोगितानसाध्यसामान्यनिरूपितेतिसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगिता
प्रसिद्धिरितिचेन्न साध्यतावच्छेदकसंबंधेनवर्त्तमानयत्किंचित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबंधेनसाध्याभाववत्वंविव
क्षितंतेनसमवायसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावाभावस्यसत्तास्वरूपत्वेपिनक्षतिः नचसमवायसंबंधावच्छिन्नप्रमेयसाम
न्याभावस्यविनिगमनाविरहेणप्रमेयसामान्यस्वरूपत्वंकल्प्यतेतिवाच्यं।सत्तास्वरूपकल्पनावश्यकत्वेइतरस्वरूपकल्पनानावश्यक
त्।नचैवंकालिकसंबंधेनप्रमेयसाध्यकेकालिकत्वादिहेतावव्याप्तिः।कालिकसंबंधावच्छिन्नप्रमेयाभावस्ययःकालिकसंबंधावच्छि
भावस्तस्यस्वाभावात्मकस्यप्रमेयत्वेनसाध्यस्यप्रतियोगितावच्छेदककालिकसंबंधेनकालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमे
वाधिकरणेहेतोर्वृत्तेरितिवाच्यं तादृशप्रतियोगितावच्छेदकयत्संबंधेनसाध्यवह्निन्नवृत्तित्वमभावस्यतत्संबंधेनसाध्याभावव
र्शनीयमित्येकोनिष्कर्षोगदाधरेण।तत्रेदंसमाधानंयत्रविशेषणतयाघटावृत्तीनांविशेषणताविशेषेणसाध्यत्वेघटत्वाभावश्चहेतुः
त्तिर्विशेषणताविशेषसंबंधावच्छिन्नघटावृत्त्यभावस्ययःकालिकसंबंधावच्छिन्नाभावस्तस्याविशेषणतयाघटावृत्तितयासाध्य
यातत्प्रतियोगितावच्छेदकीभूतघटात्मकसाध्यवह्निन्नवृत्तितावच्छेदकीभूतकालिकसंबंधेनविशेषणताविशेषसंबंधावच्छि
योगिताकघटावृत्त्यभावात्मकसाध्याभाववतिपटादौघटत्वाभावस्यवृत्तिरितिनिष्कर्षः॥५॥साध्याभाववदवृत्तित्वलक्षणेसा
वृत्तित्वाभावोपुत्रेतिबहुव्रीहिसमासादेवतादृशाधिकरणलाभाद्वृत्तिपदोत्तरंमत्वर्थीयप्रत्ययोनभवतुमर्हतीतिदोषाद्धटनं

CC-0. In Public Domain. Digitization by eGangotri

नकर्मधारयान्मत्वर्थीयोएवबहुव्रीहिरित्यादिनामथुरानाथेनकृतं अन्येयमाशंका ननुतदुत्तरं वस्तुतस्तुइत्यादिकस्येपिसाध्यस्ते
साध्याभावः सयत्रास्तिअसौसाध्याभाववानित्यत्रसाध्याभावोयत्रेतिबहुव्रीहिणातादृशार्थलाभसंभवात्कथंसाध्याभावपदोत्तर
यत्नः न चाभावोयत्रास्तिअसावभाववान् तदुत्तरं साध्याभाववानितिषष्ठीतत्पुरुषाश्रयणान्नदोषइतिवाच्यं नसापेक्षेकृतद्धिता
इत्यनेनैवविरोधादितिचेदुच्यते यत्रमत्वर्थीयप्रत्ययेनयद्यदर्थः प्रत्याय्यतेतत्रयदिबहुव्रीहिणातत्तदर्थः प्रत्याय्यतेतदैवतादृश
त्तिरादरणीयाइतिनसर्वत्र अत्रतुतादृशप्रत्ययस्ययथाधिकरणार्थतातथाप्रशंसार्थकताचप्रशंसाचात्राभावनिष्ठसाध्यतावच्छे
वच्छिन्नप्रतियोगिताकत्वं तथाचबहुव्रीहिणाधिकरणत्वेलाभेपितादृशार्थलाभसंभवः। नचप्राचीनमतेपिअवृत्तपदोत्तरंमत्वर्थीय
यस्यवृत्तित्वावच्छिन्नप्रतियोगिताकत्वरूपाभावनिष्ठप्रशंसाबोधकत्वसंभवान्नदोषइतिवाच्यं तत्रनञपदस्यैवान्वयितावच्छेद
धर्मावच्छिन्नप्रतियोगिताकाभा वत्वविशिष्टबोधकत्वात् नञपदस्यतादृशव्युत्पत्तिस्वीकारे पुनर्घटवत्यपिघटोनास्तीतिप्रत्यया
तिस्तत्रघटनिष्ठप्रतियोगिताकाभावसत्वात् नचसाध्याभाववानित्यत्राभावपदादेवतादृशार्थलाभः संभवतीतिवाच्यं। अभावपदस्
तादृशार्थबोधकत्वात्। एतदेवदीधितौसाकल्यघटितलक्षणेसाध्याभावपदेनसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावो
वक्षितः। अन्यथातत्रसाध्याभावपदेनैवतादृशार्थलाभसंभवाद्विवक्षया असिद्धत्वापत्तिरितिध्येयं साध्यवद्भिन्नेतिसाध्याभावेसाध्य
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशाद्ध्रदादिवृत्तिसमवायावच्छिन्नवन्ह्यभाववत्स्वेतादृशवृत्तेरसंभवस्यकालिकसं
बंधेनसमवायावच्छिन्नद्रव्यताभावस्यसाध्यत्वेकालत्वादौहेतौसाध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणताविशेषाव
च्छिन्नसाध्याभावात्मकद्रव्यत्वादौहेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वाप्रसंगादितिग दाधरीननुसाध्याभावाधिकरणतायांसाध्यताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकसंबंधेनसाध्यवत्ताबुद्धिविषयविधयाप्रतिबंधकतावच्छेदकसंबंधावच्छिन्नत्वस्यावश्यंनिवेशनीयतयातादृशसंबंधस्व
षणताविशेषएवकालिकसंबंधेनद्रव्यत्वाभाववत्ताबुद्धिंप्रतिदैशिकविशेषणताविशेषसंबंधेनकालिकसंबंधावच्छिन्नप्रतियोगिताक
त्वाभावप्रकारकज्ञानस्यबाधनिश्चयविधयाप्रतिबंधकत्वात्।तथाचद्रव्यत्वस्वरूपाभावाधिकरणाप्रसिद्धेर्वतादृशसाध्याभावमा
व्याप्तिरसंभवाद्व्याप्यवृत्तेरसंगतिरितिचेन्नतादृशाभावस्यातिरिक्तत्वमभ्युपेत्यव्यावृत्तिर्दत्तातन्नभद्रं।। ।।ननुवन्हिमान्धूमादित्यादौसाध्य
वाधिकरणधूमाधिकरणतानिरूपितवृत्तित्वस्यहेतौसत्वात्।अव्याप्तिरितिचेन्नस्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबंधे
साध्याभावाधिकरणविशिष्टस्यवृत्तितायांनिवेशान्नदोषइतिध्येयं।।९।।समाप्तेयं।। साध्याभाववदवृत्तित्वलक्षणे ननुवन्हिमान्धूमादित्या
वव्याप्तिःसाध्याभावाधिकरणीभूतधूमाधिकरणतानिरूपितवृत्तित्वंधूमेसत्वात्।वृत्तितायामधिकरणनिरूपितत्वस्यैवाधिकरणता
रूपितत्वस्यापिस्वीकारात्।साध्याभावाधिकरणतानिरूपितवृत्तित्वाभावविवक्षणेधूमवान्वन्हेरित्यादावतिव्याप्तेः।नचसाध्याभ
धिकरणनिष्ठाधिकरणतानिरूपितवृत्तित्वस्यहेतौसत्वात्।नचहेत्वधिकरणताभिन्नत्वंसाध्याभावाधिकरणविवक्षणीयमितिदोष
तिवाच्यम्।धूमाधिकरणताभिन्नधूमादित्यादावव्याप्तेः हेत्वधिकरणताभिन्नसाध्याभावाधिकरणाप्रसिद्धेरितिचेन्न।स्वनिरूपि
स्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबंधेनस्वविशिष्टयद्वृत्तित्वंतदवृत्तित्वस्यविवक्षितत्वात्दोषासंभवात् स्वप्रकृतसा
वाधिकरणंयद्यपिअवच्छेदकताभिन्नंअवच्छेदकत्वान्यत्वविशिष्टप्रमेयत्वादित्यादावव्याप्तिः साध्याभावाधिकरणंयदव
त्वंतन्निरूपितत्वस्यहेतुनिष्ठाधेयतायांसत्वात्।आधेयतायांआधेयतावच्छेदकतानिरूपितत्वात्।एवंतादृशावच्छेदकत्व
दधिकरणत्वनिरूपितत्वस्यचसत्तावच्छेदकत्वान्यत्वविशिष्टहेतौअवच्छेदकतानिष्ठाधिकरणतावृत्तित्वादितिनिरुक्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म·टि धेनसाध्याभावाधिकरणीभूतावच्छेदकताविशिष्टवृत्तित्वस्यहेतौसत्त्वादित्युच्यते।तदास्वनिरूपितत्वपदेनस्वनिष्ठावच्छेदकतात्वावच्छिन्ननि-
का·शं निरूपितत्वस्यविवक्षणीयतयावारणसंभवादितिध्येयं।अथसाध्याभावनिरूपिताभावोविवक्ष्यतांकिमाधेयतानिवेशेनेतिचेन्न।वन्हिमान्धूमादि
५ व्याप्तेःसाध्याभावधूमाभावस्तन्निरूपितप्रतियोगितायाहेतौसत्त्वात्।नचनिरुक्तोभयसंबंधेनसाध्याभावाधिकरणविशिष्टाभावविवक्षणेनैषदोषइ
।वन्हिमान्धूमाधिकरणत्वादित्यादावव्याप्तेःसाध्याभावाधिकरणह्रदतन्निष्ठाधिकरणत्वएतदन्यतरवृत्त्यभावस्यएतदन्यतरस्वरूपतयातन्निरू
प्रतियोगित्वस्यहेतौसत्त्वादितिध्येयं।नव्यास्तुधूमाभाववान्धूमाधिकरणत्ववह्निमत्त्वादित्यादावव्याप्तिः।धूमाधिकरणतावह्न्यभावस्यप्रतियोगि
च्छेदकोभयस्वरूपतयास्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबंधेनस्वविशिष्टवत्त्वस्यहेतौसत्त्वादित्याहुः।ननुसाध्यतावच्छेद
बंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकवृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेनसाध्याभावाधिकरणत्वंनिवेश्य
किमभावनिवेशेनेतिचेन्न।कालिकसंबंधावच्छिन्नप्रतियोगिताकविषयित्वसामान्याभावस्यविषयितासंबंधेनसाध्यत्वेतज्ज्ञानत्वेहेता
प्तिः तथाहि तत्रविषयित्वसंबंधप्रतियोगित्वस्यविषयित्वसंबंधावच्छिन्नाधेयत्वस्यानतिरिक्तत्वमतेसंसर्गविधयाविषयितासंबंधप्रतियोगि
पिसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नेतिताद्दशप्रतियोगिताकेविषयित्वेसाध्यसामान्यीयकालिकसंबंधावच्छिन्नप्रति
योगितास्तीतितदवच्छेदककालिकसंबंधेनसाध्याभाववत्तितज्ज्ञानेहेतौवृत्तेरतस्तन्निवेशः॥नचतथापितत्राव्याप्तिरेवाभावाभावविधयातत्राप्यभा
त्वस्यसत्त्वादितिवाच्यं।ताद्दशप्रतियोगितानिरूपितानुयोगितावतोनिवेशात्।नचतथापिकालिकसंबंधावच्छिन्नप्रमेयाभावस्यकालिकसाध्यतायां
कालत्वहेतावव्याप्तिः।कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रकृतसाध्याभावस्यातिरिक्तत्वेपियत्किंचित्प्रमेयस्वरूपतयातन्निष्ठापिसाध्यसामान्यीयकालिकसं
धावच्छिन्नप्रतियोगितेतितदवच्छेदककालिकसंबंधेनसाध्याभाववतिहेतौवृत्तेरतस्तद्वारणायसाध्याभावनिष्ठत्वपदेनसाध्याभावत्वव्याप्यत्वेभवतावश्यंवक्तव्यंतथाच।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थले कालिकसंबंधावच्छिन्नसाध्यीयप्रतियोगिता साध्यनिष्ठापि न साध्याभाववत्त्वव्याप्येति न दोषः। एवं च कालिकसंबंधावच्छि
यित्वाभावस्य विषयितासंबंधेन साध्यतामपि तादृशप्रतियोगिताकत्वव्याप्यत्वनिवेशेनैव न दोषः किमभावनिवेशेनेति वाच्यं
कसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य स्वरूपसंबंधेन साध्यत्वे आत्मत्वहेतावव्याप्तेः। तथाहि कालिकसंबंधावच्छिन्न
योगिताकोपः प्रकृतसाध्याभावस्तदभावस्यासाध्यस्वरूपतया तन्निष्ठा या साध्यसामान्यीय— स्वरूपसंबंधावच्छिन्नप्रतियोगि
पि साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकयावत्प्रमेयरूपसाध्याभावत्वव्याप्येति तद
दकस्वरूपसंबंधेन साध्याभाववव्यात्मनि हेतोर्वृत्तेरिति न च साध्याभावत्वसमनियतत्वं निवेश्यतामिति न दोष इति वाच्यं। का
कसंबंधावच्छिन्नप्रमेयाभावस्य कालिकेनयोभावस्तस्य स्वरूपसंबंधेन साध्यत्वे हेतावव्याप्तिः। कालिकसंबंधावच्छिन्नप्रमे
वच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ना या स्वरूपसंबंधावच्छिन्नप्रतियोगिता सापि साध्याभावसमनियता प्रमेयात्मक
सामान्यनिरूपिता चेति। तदवच्छेदकस्वरूपसंबंधमादाय साध्याभाव च तिहेतोर्वृत्तेरिति वाच्यं। साध्याभावनिष्ठत्वपदेन साध
त्वावच्छिन्नत्वस्य विवक्षितत्वान्न कोपि दोषः। न च तादृशप्रतियोगिताकत्वावच्छिन्नत्वनिवेशेनैव सकलदोषनिरासे किमभा
वेशेनेति वाच्यं। कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य स्वसमानकालिन कालिकसंबंधावच्छिन्नप्रतियोगिता
याभाववतासंबंधेन साध्यत्वे कालत्वहेतावव्याप्तेः। तत्प्रतियोगिता तत्संबंधावच्छिन्नाधेयत्वस्यैक्यमते संसर्गविधया
वच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वं यावत्प्रमेयेस्ति। तथा च समनियताभावयोरैक्य
रुक्तसंसर्गविधया साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व वत्प्रमेयं नास्तीति प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म· टी सिद्धाभावस्यसाध्यनिरूपतयासंसर्गविधयासाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताय
का· ६ साध्यसामान्यीयतयाधर्तुंशक्यतयाताद्दशप्रतियोगितावच्छेदकसंबंधेनसाध्याभाववतिकालेहेतो र्वृत्तेः साध्याभावत्व
न्नत्वनिवेशे निरुक्तप्रतियोगिताकत्ववत्वमेयत्वावच्छिन्नप्रतियोगितायाताद्दशाभावत्वेनधर्तुमशक्यतयानकोपिदोषइ
भावनीयंसुधिभिः॥ ॥ इतिमाथुरीपंचलक्षणीटिप्पणंकालीशंकरीसमाप्ता॥ ॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥
संस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥१॥श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासश्री३युतमहाराजशिव
दुबेजीकेमकानमेंछपीजिनकोलेनेकीदरकारहोयउन्होनेइसछापेखानेकेकार्यसम्पादकबाबूवाराणसीप्रसादयाकैचौरीगलीमेंकेद
तापसिंहजीकेदुकानपरमिलेगी॥मितिज्येष्ठकृष्ण१३बुधवासरेसंवत्१९३१॥ ॥ श्रीगजाननप्रसन्नोस्तु॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०९७ ४४६

॥ श्रीढुण्ढिराजाय नमः ॥

शक्तिवाद-व्युत्पत्तिवाद-विवृतिः ।

''ज्येष्ठत्ववाद-लकारार्थवाद-सादृश्यवाद-विवृतिश्च''

तर्ककाननपञ्चानन-मैथिलश्रीमद्विश्वनाथ

शर्म्म-निर्म्मिता० ॥

श्री५ मन्महाराजाधिराज-मिथिलेश-संस्थापित-वारा-
णसेय-पाठालयाध्यापकेन श्रीमत्सङ्गमलालशर्म्मणा
''परसरमा''-राजधान्यधिपति-राजकुमार-बाबू
श्रीकीर्त्तिधरनारायणसिंहविजयतो लब्धजी-
विकविद्वद्वर-श्रीमत्सदाशिवशर्म्मभिः संशो-
धय्यालोक्य-वाराणसेय-यज्ञेश्वर-य-
न्त्रालये मुद्रापय्य प्रकाशिता० ॥

सम्वत् १९५७ का० शु० ५ रवाविति शम्० ॥

अस्याः पुनर्म्मुद्रणादि प्रकाशकेन स्वायत्तीकृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीढुण्ढये नमः ३।

भूमिका।

विलसति खलु निखिलशास्त्रादिप्रधानतया परमप्रयतभूतमखण्डभूमण्डलप्रचलितं विशेषतो विद्यापीठेषु वाराणसी, मिथिला, नवद्वीपादिमान्यमान्यस्थलेषु तार्क्किक, शाब्दिकसाधारण्येन पठनपाठनातिगोचरीभूतं श्रीमद्योगिराजभगवद्गौतममुनि, कणाद, महामहोपाध्यायशास्त्रवर्य्यनास्तिककुलाटव्यनलमैथिलश्रीमदुदयनाचार्य्यादिप्रणीतं न्यायशास्त्रम्० तत्रोक्तमहर्ष्यादिभिः कृताङ्कुररोपणे महामहोपाध्याय श्रीमद्गदाधरभट्टाचार्य्यप्रणीतव्युत्पत्तिवादशक्तिवादादिपल्लवे श्रीमदनेकप्रबलाचार्य्यैर्दृढीकृतस्कन्धेऽत्र शाखिनि समारुरुक्षूणां तदुत्फलास्वादुरसिकानां सुखसमारोहणाय स्वस्ति विविधविरुदावलीत्याद्यखण्डभूमण्डलपण्डितमण्डलीमण्डलायमानसमुद्दण्डप्रचण्डपाण्डित्यचण्डद्युतिद्योतितनिखिलमहीमण्डल-के, सी, आइ, ईत्यादि—पदाङ्कितमहाराजाधिराजमिथिलेश्वरसदासमरविजयिश्री ५ मद्रमेश्वरसिंहविजयदेवदेवानामाज्ञातष्ठाढ़ीनिवास्तव्य महामहोपाध्याय झोपनाममैथिलकुलकैरवचन्द्रतार्क्किकश्रीमद्विश्वनाथशर्म्मरचितसोपानरूपोयं ग्रन्थो विद्वज्जनमनस्सन्तोषाय संशोध्य मुद्रापयित्वा प्रकाशितः अत्र मुद्रणादिदोषाद्यदशुद्धं कृपया विशोध्य सफलयन्त्वायासममत्सराः प्रेक्षावत्प्रवराः" इत्याशासाते,, "प्रकाशक-संशोधकौ"

नैया० झोप० मैथि० श्रीसङ्कमलाल शर्म्म,

परसरमा-वास्तव्य-पं०श्रीसदाशिवझाशर्म्माणौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

श्रीविश्वनाथीयशक्तिवादविवृतिः

श्रीढुण्ढये नमः ॥ गदाधरपदं ध्यात्वा कृत्वा पादार्च्चनं गुरोः० । करोमि विवृतिं तस्य धीराणां सुखहेतवे ० ॥ १ ॥ श्रीमन्मैथिलविश्वनाथविवृतिं ह्यालोक्य विद्वज्जना विद्वन्मण्डलमण्डितां नृपसभां नीत्वा वशं कौतुकात्०। श्रीमच्छम्भुपदारविन्दविमुखान् जित्वा हि वाक्यैर्वरैरानन्दं परमं भजन्त्यनुदिनं स्वर्गे यथा वाक्पतिः ॥ २ ॥ अथ ग्रन्थादौ सङ्केतो लक्षणा चार्थे पदवृत्तिरिति लिखनमनर्थकमिति चेन्न लक्षणायाः सङ्केतस्य च वृत्तित्वमनभ्युपगच्छतां ज्ञाने पदानां शक्तिः न त्वर्थे,, इत्यनेन पदार्थान्तरस्य वृत्तित्वमभ्युपगच्छतां मतमपाकर्त्तुमेव तस्य प्रणयनात्० तन्मतनिराकरणप्रकारस्य सङ्केतस्य लक्षणायाश्च वृत्तित्वसम्पादनप्रकारस्य च स्वयमेवाग्रे प्रतिपादनात्० ॥ केचित्तु लाघवात्तदर्थविषयकशाब्दबोधजनकत्वस्य पदे, अर्थवृत्तिमभ्युपगच्छतां लक्षणायाश्च वृत्तित्वमभ्युपगच्छतां वैयाकरणविशेषाणां मतमपाकर्तुमाह सङ्केतो लक्षणा चार्थ इति०। अयम्भावः । न च गङ्गायां घोष इत्यादौ तीरबोधस्यानुभाविकतया गङ्गापदस्य तीरस्य वाचकत्वापत्तिरिति वाच्यम्० । इष्टत्वात् सर्व्वे शब्दाः सर्व्वार्थवाचका इति सिद्धान्तात्' बोधकत्वस्यैव वाचकत्वरूपत्वात्० ॥ न चापभ्रंशादपि गाछ—माछ-शब्दार्थप्रत्ययात् वृक्षादिशाब्दबोधजनकत्वस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाछादिपदे सत्वेन तेषां वाचकत्वप्रसङ्ग इति वाच्यमिष्टत्वात् न च वाचकपदस्य साधुत्वेन तेषां साधुत्वं स्यात् इति वाच्यम् पुण्यजनकत्वस्य तस्य तत्र तत्रासत्वात्०।। अथ तीरन्न तङ्गापदशक्यमपि तु गङ्गापदशक्यसम्बन्धीत्यादिज्ञानदशायामपि गङ्गायां घोष इति वाक्याच्छाब्दबोधस्यानुभविकस्यानुपपत्तिस्तथाविधवृत्तिज्ञानासम्भवात्०।। परे तु वृत्तिं विभजयितुमाह" सङ्केतो लक्षणा चेति० न च विभागबोधकवाक्यस्य सङ्ख्यावाचकपदघटितत्वनियमात् प्रकृते सङ्ख्यावाचकपदाघटितत्वात् तस्य विभागपदत्वानुपपत्तिरिति वाच्यम्० चशब्दस्य द्वित्वबोधकत्वात् तस्य तत्र सत्त्वेनानुपपत्तिविरहात्० ।। स्मृतमनुभूतं चेत्यादौ द्वित्वबोधकस्य सर्व्वानुभविकत्वादित्याहुस्तन्न वृत्तिलक्षणमनुक्त्वा विभागासम्भवात्० लक्षणवाक्याधीन-सामान्यधर्म्ममजानतो विशेषजिज्ञासानुदयात्" लक्षणवाक्याधीनसामान्यधर्म्मप्रकारकज्ञानस्य सामान्यधर्म्मावान्तरधर्म्मप्रकारकज्ञानगोचरेच्छां प्रति स्वातन्त्र्येणेष्ट-साधनताज्ञानधर्म्मितावच्छेदकप्रकारकज्ञानसम्पादकतया वा हेतुत्वात्० अत एव सव्यभिचारे लक्षणतः सामान्यमप्रतीतिवतो विशेषजिज्ञासानुदयात् सामान्यलक्षणान्तरमेव विभागो युक्त इत्युक्तम् शिरोमणिना० ।। यत्तु सामान्यज्ञानाधीनो विभागो न तल्लक्षणप्रत्ययमपेक्षते सामान्यधर्म्मप्रकारकमानसज्ञानसम्भवात् न विभागानुपपत्तिरिति तत्तुच्छम्" वृत्तिलक्षणस्य उपायान्तरेण ज्ञानसम्भवे पदार्थोपस्थितिव्यापारकः सम्बन्धो वृत्तिरित्यनेनाग्रे तल्लक्षणप्रत्ययनस्य सन्दर्भविरुद्धत्वात्० ।। न च तात्पर्य्येऽतिव्याप्तिवारणाय तत्प्रदर्शितमिति वाच्यम्'तादृशवृत्तिलक्षणज्ञानवतस्तात्पर्य्येऽति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

०्याप्तिशङ्काया अनवतारात्० ॥ नव्यास्तु" वृत्तिशब्दस्य सङ्केतमात्रे प्रसिद्धतया तन्मात्रस्य लक्ष्यभावं जानद्भिर्ल्लक्षणायामलक्ष्यत्वभ्रमनिबन्धनातिव्याप्तिः प्रतीयते,, अलक्ष्यत्वभ्रमनिराशार्थं प्रथमतो लक्ष्यप्रदर्शनं करोति सङ्केतो लक्षणा चेत्यनेन० तथा चार्थे पदवृत्तिवक्ष्यमाणलक्षणलक्ष्यः संकेतो लक्षणा चेत्यर्थ इति प्राहुः ॥ न च गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः० ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् इत्यत्र, वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकमित्यत्र च गमनोत्तरकालिकावश्यकसम्भाविमरणे जन्मपदस्य दूतीसम्भोगार्थेऽधमपदस्य व्यञ्जनावृत्तिदर्शनात् व्यञ्जनावृत्तेर्ल्लक्ष्यत्वाप्रदर्शनेन न्यूनता स्यादिति वाच्यम् नैयायिकैर्व्यञ्जनाया वृत्तित्वानभ्युपगमात्" तत्र तत्र मानसोऽनुमित्यात्मको वा तादृशतादृशार्थगोचरबोधस्वीकारादिति० ॥ शाब्दबोधोपयिकसम्बन्धत्वं वृत्तित्वम्० औपयिकत्वं च, जनकतावच्छेदकविषयितानिरूपकत्वम् ० । एवं च, तात्पर्य्यज्ञानजनकतावच्छेदकसांसर्गिकविषयतानिरूपकत्वस्य स्वरूपसंसर्गे सत्वेन तस्यापि वृत्तित्वप्रसङ्ग इत्यत आह" अर्थेति० । निरूपकत्वं सप्तम्यर्थः निरूपकत्वं च, प्रतियोगित्वानुयोगित्वान्यतररूपम्० प्रकृते बोध्यम् स्वरूपसम्बन्धे उच्चारितत्वप्रतियोगिकत्वस्य इच्छीयविषयताप्रतियोगिकत्वस्य सत्वेनार्थे प्रतियोगिकत्वादिविरहेणातिव्याप्तिविरहः० । ननु घटमानयेत्यादौ कर्मत्वविशेष्यकवृत्तित्वसम्बन्धेन घटप्रकारकबोधेच्छयोच्चरित मिदं पदमित्याकारकतात्पर्य्यज्ञानजनकतावच्छेदकविषयितानिरूपकत्वस्य घटप्रतियोगिकत्वस्याधेयत्वसंसर्गे सत्वेन तत्रातिप्रसङ्ग इत्यत आह" पदेति० ॥ पदस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिः पदवृत्तिः प्रतियोगित्वं षष्ठ्यर्थः अनुयोगित्वं वा" तथा च,, क्त्वाधेयत्वे पदप्रतियोगिकत्वाभावान्नातिव्याप्तिः ॥ अथ समवायस्यैकत्वेन पदानुयोगिकत्वस्य घटाद्यर्थप्रतियोगिकत्वस्य शक्तिज्ञानादिनिष्ठजनकतावच्छेदकसांसर्गिकविषयताश्रयत्वस्य सत्वात्तत्रातिव्याप्तिरिति चेन्न, समवायस्यैकत्वानभ्युपगमात्० । नचैकत्वस्वीकारपक्षेऽप्रतीकार इति वाच्यम्" शाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतानिरूपितपदत्वावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितार्थप्रकारतानिष्ठावच्छेदकतानिरूपितावच्छेदकता वा सांसर्गिकविषयतावत्त्वस्य पर्य्यवसितत्वात्"समवायादौ तस्यासत्वेन प्रतीकारसम्भवात्० । घटपदं स्वविषयकबोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यतासम्बन्धेन घटवदित्याकारकज्ञाननिष्ठजनकतानिरूपितावच्छेदकत्वस्य सङ्केतविषयतायाम् गङ्गापदं स्वसम्बन्धिशक्तत्वसम्बन्धेन तीरवदित्याकारकज्ञानजनकतानिरूपितयथाविधावच्छेदकत्वस्य लक्षणानिष्ठविषयतायां सत्वेन तत्र तत्रलक्षणसमन्वयसम्भवात्०एवं देवदत्तः घटशब्दं शृणोतीत्यादौ घटशब्दत्वावच्छिन्नप्रतियोगिकविषयतानुयोगिकाधेयतायां पदप्रतियोगिकत्वस्याप्पदधर्म्मिकतात्पर्य्यज्ञानकारणतावच्छेदकविषयतावत्त्वस्य च सत्वात्०। निरुक्तविशेष्यत्वप्रकारत्वे विषयतारूपे ग्राह्ये नातो वाच्यत्वादावव्याप्तिरिति० ॥ अथ तात्पर्य्यादावतिव्याप्तिवारणायाग्रे पदार्थोपस्थितिव्यापारकसम्बन्धोवृत्तिरित्युक्तम् "तथा च" तात्पर्य्यज्ञानस्य योग्यताज्ञानस्य च पदार्थोपस्थितिद्वारा शाब्दबोधजनकत्वविरहेण स्वरूपाधेयत्वादौ अतिव्याप्त्यसम्भवात् पदार्थयोरुपादानमनर्थकमिति चेन्न, तयोः स्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपकथनत्वादर्थे पदवृत्तिवक्ष्यमाणलक्ष्यः कतिविध इति प्रश्नोत्तरवाक्यस्यार्थपदघटितत्वेनाकाङ्क्षा निवर्त्तकानुरोधेन तयोरुपादानादित्यपरे०॥ ननु पदार्थोपस्थितिव्यापारकः पदपदार्थयोःसम्बन्धो वृत्तिस्तत्र पदस्यार्थोऽभिधेयः पदार्थ इति व्युत्पत्त्या पदशक्य एव पदार्थो वक्तव्यः, अन्यथाऽन्यस्याप्यन्यपदार्थत्वापत्तिः । "इत्थञ्च" पदलक्ष्यार्थयोस्तथाविधसम्बन्धस्य वृत्तित्वासम्भवात् वृत्तिलक्षणलक्ष्यत्वानुपपत्तिरित्यत आह वृत्त्येति० वृत्तिपदं शक्तिलक्षणान्यतरपरम् विशेषतः पदार्थव्यवहार-विषयताप्रयोजकं, पदज्ञानजन्यवृत्तिज्ञानजन्योपस्थितिविषयत्वमेव "तच्च" शक्यलक्ष्योभयसाधारणमिति० ॥ गङ्गापदं तीरसम्बन्धिनीरे शक्तमितिज्ञानदशायां तीरं गङ्गापदशक्यसम्बन्धि इति ज्ञानदशायां च लक्ष्यार्थे नीरे गङ्गापदार्थत्वानभ्युपगमात्० ॥ अथ पदेन प्रतिपाद्यः पदार्थज्ञानजन्यत्वं तृतीयार्थः पदज्ञानजन्य उपस्थितिविषयत्वमेव तथाविधव्यवहारप्रयोजकमस्तु अलं वृत्त्येत्यस्याभिधानेन इति चेन्न घटपदसमवायस्याकाशादौ सत्वेन घटपदज्ञानजन्योपस्थितिविषयत्वस्याकाशादौसत्वेनाकाशादौ घटपदार्थत्वापत्तेः । वृत्तिपदोत्तरतृतीयायाः ज्ञानजन्यत्वमर्थः "तथाच" घटपदज्ञानजन्यवृत्तिज्ञानजन्योपस्थितिविषयत्वस्याकाशादावभावान्न दोषः । न च घटपदज्ञानजन्यत्वन्नोपादेयमिति वाच्यम्' आकाशपदवृत्तिज्ञानजन्योपस्थितिविषयत्वस्याकाशादौ सत्वेनोक्तदोषस्य तादवस्थ्यात्० ॥ न च पदज्ञानस्य वृत्तिज्ञानविधया शाब्दादिहेतुतया स्वतन्त्रपदजन्यत्वानुपपत्तिरिति वाच्यम्" श्रावणप्रत्यक्षस्यापि परम्परया हेतुत्वात्०॥ न च यदा घटपद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समवायज्ञानाकाशपदवृत्तिज्ञानाभ्यामाकाशोपस्थितिस्तदा आकाशे घटपदार्थत्वापत्तिर्दुर्वारा आकाशोपस्थितौ घटपदज्ञानजन्यत्वस्य वृत्तिज्ञानजन्यत्वस्य च सत्वादिति वाच्यम्" घटपदधर्म्मिकवृत्तिज्ञानजन्योपस्थितिविषयत्वस्य घटपदार्थत्वान्न दोषः ॥ न च घटपदवृत्तिज्ञानजन्यघटाद्युपस्थितौ उद्बोधकान्तरवशादाकाशादेर्भानं यत्र तत्र तथाविधोपस्थितिविषयत्वस्य सत्वेनोक्तापत्तिस्तदवस्थैवेति वाच्यम्" घटपदविशेष्यत्वनिष्ठावच्छेदकतानिरूपितवृत्तिप्रकारतानिष्ठावच्छेदकतानिरूपितज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकोपस्थितिविषयत्वस्य तथात्वादाकाशादिविषयतायां तथाविधजन्यतावच्छेदकत्वविरहान्न दोषः अथ लाघवात् वृत्याश्रयत्वमेवास्तु तत्' इति चेन्न" लक्षणाग्रहशून्यतादशायां तीरादौ गङ्गापदार्थत्वापत्तेः लक्षणायास्तत्र सत्वादिति दिक्० ॥ यत्तु वृत्तिवृत्तिस्वरूपादिनिरूपणे पदार्थव्यवहारविषयनिर्व्वचनस्यानाकाङ्क्षत्वेनार्थान्तरापत्तेरिति, तत्तुच्छम्" पदपदार्थसम्बन्धविचारावसरे कः पदार्थ इत्याकाङ्क्षोदयान्नानाकाङ्क्षत्वावकाश इति० ॥ अभिधीयत इत्यत्र प्राच्यैरिति शेषः ॥ सङ्केतं लक्षयति, इदम्पदममुमर्थं वोधयत्विति,, अस्माच्छब्दादयमर्थो वोद्धव्य इति वा० । इदं पदममुमर्थं वोधयत्वित्यत्र णिजर्थो जनकत्वं वुधधात्वर्थे वोधेऽन्वेति, "तथाचार्थविषयकवोधजनकत्वप्रकारतानिरूपितपदत्वावच्छिन-विशेष्यताशालिनीच्छाया वोधः । इतिपदे अर्थइतिपदे अर्थस्य स्वविषयकवोधजनकत्वप्रकारतानिरूपितेच्छीयविशेष्यतासम्बन्धः सङ्केतात्मकवृत्तिः,, परत्र च वोधान्वयिजन्यत्वं पञ्चम्यर्थः । तव्यप्रत्ययार्थो विषयत्वमत्र वोधस्य निरूपितत्वसम्ब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धेनान्वयः "तथा च" पदजन्यबोधविषयत्वप्रकारतानिरूपिताशालिनीच्छाया बोधः । एवञ्चार्थे पदस्य स्वजन्यबोधविषयत्वप्रकारतानिरूपितेच्छीयविशेष्यतापदस्यार्थे सङ्केतात्मकसम्बन्धो वृत्तिः प्रथमसम्बन्धस्य वाचकतारूपत्वं, द्वितीयसम्बन्धस्य च वाच्यतारूपत्वम् बोध्यमित्यग्रे स्वयमेव प्रतिपादयिष्यते । इदमुपलक्षणम्' पुष्पवन्तादिपदस्थले चन्द्रसूर्य्योभयविषयकबोधः । पुष्पवन्तपदजन्योभवतु' इत्यस्य पुष्पवन्तपदमुभयविषयकबोधं जनयतु" इतीच्छायाः सङ्केतरूपत्वं, तदादिसर्व्वनामस्थले च स्वोच्चारणानुकूलबुद्धिप्रकारतावच्छिन्नविषयकत्व, स्वजन्यत्वोभयसम्बन्धेन बोधस्तत्पदवान् भवतु'इती च्छायाः अस्मत्पदादिस्थले' स्वोच्चारणकर्तृतावच्छेदकावछिन्नविषयकत्व—स्वजन्यत्वोभयस-म्वन्धेन बोधः अस्मत्पदवान् भवतु"। स्वसम्बोध्यतावच्छेकधर्म्मावच्छिन्नविषयकत्व-स्वजन्यत्वोभयसम्बन्धेन बोधः युष्मत्पदवान् भवतु" इतीच्छायाः सङ्केतत्वं बोध्यम्० ॥ * ॥ सङ्केतं विभजते० । तत्रेति, तयोर्म्मध्ये इत्यर्थः ॥ पारिभाषिकं लक्षयति० । तयेति, तया परिभाषयेत्यर्थः । वाचकं लक्षयति० । शक्तिं लक्षयति० ईश्वरसंकेत इति० । ईश्वरत्वं सर्व्वविषयकनित्यज्ञानवत्त्वं, जगत्कर्तृत्वं वेति० । यः सर्व्वज्ञः सर्व्वविदिति श्रुतेः । यत इमानि भूतानि जायन्ते येन वा जातानि जीवन्ति तद्ब्रह्मेति श्रुतेश्च०। तयेति,, तया शक्त्येत्यर्थः । वाच्यं लक्षयति तद्बोध्य इति० वाचकगवादिपदबोध्यइत्यर्थः 'मुख्यार्थं लक्षयति, स एवेति वाच्य एवेत्यर्थः एवकारेणलक्ष्यार्थ-परिभाष्यार्थयोर्व्यवच्छेदः । मुख्यार्थश्च शक्त्या प्रतिपाद्यः । वक्तिवाचकमित्यादितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाब्दबोधं दर्शयति, वाच्यवाचकादिपदइति० घटकत्वं सप्तम्यर्थः बोधजनकत्वेनेत्यत्र प्रकारत्वं तृतीयार्थः, तच्च निरूपितत्वसम्बन्धेन विषयत्वेऽन्वेति, अत्रैवेश्वरेच्छान्वितषष्ठ्यर्थनिरूपितत्वस्यान्वयः। ननु ग्रन्थक्रमेण वाचकवाच्यपदे इत्येव वक्तुमुचितमिति चेन्न, अल्पाच्तरमित्यनेन वाच्यपदस्यैव पूर्व्वनिपातसम्भवात्० । अथ गोपदं घटं वक्तीत्यस्यापि प्रामाण्यप्रसङ्गः, गो, घट, विषयकसमूहालम्बमबोधजनकत्वप्रकारतानिरूपितभगवदिच्छाविषयत्वस्य गोपदे सत्वात्" न च मुख्यविशेष्यताशून्यद्वयबोधजनकत्वप्रकारतानिरूपितभगवदिच्छाविषयत्वस्य धात्वर्थत्वात् समूहालम्बनबोधत्वार्थानन्तर्गततत्वान्न दोषः। न च तथापि पुष्पवन्तपदं चन्द्रसूर्य्यौ वक्तीति वाक्यात् शाब्दबोधानुपपत्तिस्तत्र नियमत उभयविषयकबोधस्यैवोपपत्तेः। किञ्च गामानयेत्यादिवाक्यजन्यकर्म्मत्वादिबोधे गोपदजन्यत्वस्य सत्वेन कर्म्मत्वबोधजनकत्वस्य गोपदे सत्वाद्गोपदं गां वक्तीतिवत् कर्म्मत्वं वक्तीत्यपि स्यादिति वाच्यम्" द्वितीयार्थगवान्वितविषयत्वस्य बोधेऽन्वये पारतन्त्र्येणबोधजन्यतायाः सवच्छिन्नत्वसम्बन्धेन भानं भवति,, एवञ्च कर्म्मत्यनिष्ठविषयत्वावच्छिन्नजन्यतानिरूपितजनकत्वस्य गोपदेऽसत्वेन निरुक्तेच्छाविषयकजन्यतायां गोनिष्ठविषयत्वावच्छिन्नत्वस्य सत्वेन कर्म्मत्वविषयत्वावच्छिन्नत्वस्य बाधात्० । अथ वा, अवच्छेदकतानिरूपितबोधनिष्ठजन्यतानिरूपितजनकताप्रकारतानिरूपितेच्छाविषयत्वस्य धात्वर्थत्वात्० ॥ धात्वर्थघटकावच्छेदकतायां प्रकृत्यर्थान्वितद्वितीयार्थविषयत्वस्य वृत्तित्वसम्बन्धेनान्वयात्' नोक्तदोषाणामवकाशइति० "कर्म्मप्रत्ययस्थले शाब्दबोधमुपपादयति"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदेन गौरुच्यत इत्यादिना० । तादृशविषयताया इत्यस्य, बोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविषयताया इत्यर्थः ॥ परम्परानिरूपकत्वं स्पष्टयति, तच्चेति० "अयम्भावः" प्रकारत्वावच्छिन्नविशेष्यतानिरूपितजन्यत्वप्रकारत्वावच्छिन्नविशेष्यतानिरूपितबोधप्रकारत्वावच्छिन्नविशेष्यतानिरूपितविषयत्वसम्बन्धावच्छिन्नप्रकारतावत्त्वात्मकनिरूपकत्वैकदेशे धात्वर्थस्य तादृशभगवदिच्छीयविशेष्यत्वस्यान्वयः । धात्वर्थे च पदान्वितृतीयार्थवृत्तित्वस्यान्वयः । तथाच, गोपदवृत्तिर्या बोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यता तन्निरूपितप्रकारत्वावच्छिन्नविशेष्यतानिरूपितबोधप्रकारत्वावच्छिन्नविशेष्यतानिरूपितविषयित्वसम्बन्धावच्छिन्नप्रकारतावत्त्ववान् गौरित्याकारकः शाब्दबोधः तत्र बोध्यः " इदं च गोपदं विषयितासम्बन्धेन गोविशिष्टबोधनिष्ठजन्यतानिरूपितजनकतावद्भवतु,, इत्याकारकेच्छाभिप्रायेणोक्तमिति बोध्यम्० । द्वितीयेच्छायाः सङ्केतत्वे शाब्दबोधमुपपादयति,, वैपरीत्यमिति० वैपरीत्यस्य सङ्केततो धात्वर्थे वैपरीत्यमित्यर्थः । यत्तु" वैपरीत्यमित्यस्य कर्तृप्रत्ययस्थले परम्परया निरूपकत्वं कर्तृप्रत्ययार्थः,, आश्रयत्वं कर्म्मप्रत्ययार्थः "इति न शाब्दबोधानुपपत्तिः ॥ अन्यथा बोधविषयत्वप्रकारतानिरूपितविशेष्यत्वस्य पदे बाधाच्छाब्दबोधानुपपत्तिस्तत्तुच्छम्० कर्त्तुर्द्धात्वर्थत्वाश्रयत्वविरहे कर्तृत्वानुपपत्तिः कर्म्मणि तस्य सत्वेन कर्तृत्वापत्तेः, कर्म्मत्वानुपपत्तेश्च० ॥ अथ पदधर्म्मिकार्थविषयकबोधजनकत्वप्रकारकेश्वरज्ञानस्यैव विनिगमकाभावात्सङ्केतरूपतास्त्विति चेन्न वेदतात्पर्य्यज्ञाननिष्ठक्लृप्तहे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुतया च तथाविधात्मकसङ्केतज्ञानस्य हेतुत्वात्० अतिरिक्तहेतुत्वाकल्पनात्तथाविधज्ञानसङ्केतज्ञानस्यातिरिक्तकारणताकल्पनेन गौरवप्रसङ्गादिति दिक्॥ सङ्केतेत्वेति,, अत्र न्यायसिद्धान्तोपरि-मीमांसकानुयायिन इत्यस्याग्रिमवदन्तीत्यनेनान्वयः " अपभ्रंशादेर्व्वाचकत्वस्येष्टापत्तौ दोषान्तरमाह., साधुत्वं च स्यादिति,, साधुत्वञ्चात्र शक्तिभ्रमाधीननिरूढलक्षणेतरलक्षणाग्रहाधीनशाब्दबोधजनकत्वरूपं वोध्यम्० न च साधुत्वमपीष्टमिति वाच्यम् अपभ्रंशादेः साधुत्वे साधुभिः सम्प्रयोक्तव्यन्नापभ्रंशितमित्यस्यासङ्गतत्वापत्तेः अपभ्रंशादेरपि साधुत्वेन प्रयोगार्हत्वान्मिश्रमतमुपहसन्नाह "यत्त्विति" अतिव्याप्तिं वारयति, उच्चरितजातीयत्वेति०॥ अथात्र "किमुच्चरितजातीयत्वम्" यदि चोच्चरितवृत्तिजातीयत्वं तदा सत्तागुणादिकमादायातिव्याप्तिः "न चोच्चरितवृत्तित्वविशिष्टजातिमत्वन्तदिति वाच्यम्,, भगवदुच्चरितवृत्तित्वविशिष्टजातेः अस्मदाद्युच्चरितादावसत्वेनाव्याप्तितादवस्थ्यादिति चेदुच्यते,, तादृशोच्चरितवृत्त्यानुपूर्व्वीमत्त्वस्य तथात्वात्० ॥ परिष्कृतेप्यतिव्याप्तिं प्रदर्शयति वेदस्थेत्यादि, वेदस्थलाक्षणिकेषु आयुर्व्वै घृतमित्यादिवेदघटकायुः पदे घृतपदेष्वित्यर्थः आयुः पदस्यायुर्ज्जनके घृतपदस्य घृतकर्म्मकभक्षणे लक्षणा "तथा च,, घृतकर्म्मकं भक्षणमायुर्ज्जनकमित्यर्थस्तस्य घृतकर्म्मकार्थादिवाचकत्वापत्तिः घृतादिपदस्येत्युक्तम्० । ननु वोधो घृतकर्म्मकभक्षणविषयको भवतु घृतपदं तद्बोधजनकं भवत्विति भगवदिच्छाभ्युपगमे तदर्थविषयकत्वविशिष्टवोधजनकतात्वावच्छिन्नप्रकारताशालिनोच्छेत्युक्तावतिव्याप्त्यभावादाह सादीति० । अव्याप्तिं योजयति द्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशेत्यादिना द्वादशेह्नि पिता नाम कुर्य्यात्० कस्येत्याकाङ्क्षायां पुत्रस्य "तथाच" पुत्रपदं पुत्रत्वावान्तरधर्म्मावच्छिन्नपरम्० विषयत्वं विषयित्वं वा षष्ठ्यर्थः । नामपदं बोधजनकतावन्नामत्वव्याप्य धर्म्मावच्छिन्नविषयकसङ्केतपरम्० कृधात्वर्थः कृतिः । इष्टसाधनत्वं विध्यर्थः ।. अह्नीत्यत्राधिकरणत्वं सप्तम्यर्थः । "द्वादशाधिकरणकपुत्रत्वावान्तरत्वोपलक्षितधर्म्मावच्छिन्नविषयकबोधजनकतावन्नामत्वव्याप्यधर्म्मावच्छिन्नविषयकेष्टसाधनतावत्सङ्केतानुकूलकृतिमान्पितेहान्वयबोधः "अथ वा,,कृधातोरेव सङ्केतार्थः "तथा च,, तादृशः सङ्केतः पितृकर्त्तृक इत्यन्वयबोधः "स्वमते' सादिदेवदत्तादिपदेऽव्याप्तिवारणं च, बुबोधयिषात्मकभगवदिच्छाविषयत्वस्य नामत्वव्याप्यधर्म्मावच्छिन्ने देवदत्तादौ सत्वेन बोध्यम्० "सादित्वं च" स्वतादात्म्य, स्वाश्रयध्वंसासमानकालीनप्रागभावप्रतियोगिवृत्तित्वोभयसम्बन्धेन० धर्म्मविशिष्टधर्म्मवत्वं सजातीयध्वंसव्याप्यत्वमनादित्वं तदन्यत्वं वा सादित्वम्०"अथ वा" पदविशिष्टपदं सादिपदम्० स्वतादात्म्य, स्वजातीयध्वंसानधिकरणक्षणोत्पत्तिकत्वोभयसम्बन्धेनेति० अत्र मिश्रमतं मद्दूषितं तन्न सम्यक्,, संसारस्यानादितया सादिपदस्याप्रसिद्धत्वात्० । संसारस्यानादित्वमुक्तमाचार्य्यैः "तथा हि,, प्रवाहोनादिमानेष न विजात्येकशक्तिमान्० । तत्त्वेयत्तनवता भाव्यमन्वयव्यतिरेकयो,, रित्यनेन प्रथमस्तवके कुसुमाञ्जलाविति० । नैयायिकसिद्धान्तोपरि मीमांसकमतेन दोषमाह एवमिति" एतद्दोषमुद्धरयति "अथेति" शाब्दबोधोपयोगितायामित्यस्य शाब्दबोधजनकतावच्छेदककोटावित्यर्थः ।। ईश्वरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्वानुपादाने तात्पर्य्ये वृत्तित्वलक्षणातिव्याप्तिमाशङ्कते न चेति"। उत्तरयति "यतः पदार्थो व्यापारक इति ॥ मीमांसकमतसिद्ध- वृत्तिं दूषयितुं तन्मतं दर्शयति "यस्त्विति । ज्ञाने (अर्थविषयक- ज्ञाने) अनुकूलत्वं सप्तम्यर्थः शक्तावन्वेति० । पदानामित्यत्र निष्ठत्वं षष्ठ्यर्थः सोपि शक्तावन्वेति "तथाच,, अर्थविषयकशा- ब्दबोधानुकूला पदनिष्ठशक्तिरित्यर्थः ॥ वाचकत्वं लक्षयति तथा चेति० । तच्चेत्यस्य तद्वाचकत्वमर्थः । लाक्षणिकेऽतिव्याप्तिं वारयति "लाक्षणिकं चेति,०॥ नन्वेतन्मते ज्ञानस्य मितिमा- तृविषयकत्वेन मितिमातृविषयकघटशाव्दानुभवजनकत्वस्य घट- पदे सत्वात् घटपदे मितिमातृवाचकत्वापत्तिरतो वाचकत्वं परि- ष्करोति,, तद्विषयकत्वावच्छिन्नेति० । अथात्र विषयकत्वस्य प्र- त्यक्षादिसाधारणत्वेनातिप्रशक्त्या शाब्दनिष्ठजन्यतावच्छेदकत्वा- भावेनासम्भव इति चेन्न,, केवलविषयकत्वस्यातिप्रसक्तत्वेपि वि- षयकत्वशाब्दत्वयोरनतिप्रसक्तत्वेनावच्छेदकत्वधौव्यात्०। 'यथा, महानसीयवह्न्यभावप्रतियोगितायाः अतिप्रसक्तत्वेपि वह्नित्वस्य महानसीयत्ववह्नित्वोभयस्मिन् तदवच्छेदकत्वं तथा प्रकृतेपीति० । न च पर्य्यायपदजन्यशाव्दबोधे व्यभिचारवारणाय कारणानन्त- र्य्यस्यावश्यं कार्य्यतावच्छेदककोटौ विवक्षणीयतया प्रयोजनविर- हेण विषयनिवेशस्यानावश्यकत्वात् ०। घटादिविषयकत्वेन शा- व्दजन्यतानवच्छेदकत्वादसम्भवस्तदवस्थ एवेति वाच्यम्,. प- र्य्यायशव्दे शाव्दावैलक्षण्येनैकशक्तेरेव स्वीकारात्० ॥ घटपद- स्य कलशपदस्य च घटविषयकशाव्दानुकूलशक्तिमत्त्वेन कारण- त्वात् न दोषः॥ न च घटपदं घटविषयकत्वावच्छिन्नशाव्दनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठजन्यतानिरूपितजनकतावच्छेदकशक्तिमदित्याकारकाप्रामाण्यज्ञानास्कन्दितज्ञानाच्छाब्दबोधवारणाय अप्रामाण्यज्ञानस्योत्तेजकत्वस्यावश्यकत्वेनैकरूपेण कथमपि कारणत्वस्य वक्तुमशक्यत्वेनाव्यवहितोत्तरत्वस्य कार्य्यतावच्छेदककोटावश्यं वक्तव्यमिति वाच्यम्० एतन्मते ज्ञानस्य स्वतः प्रामाण्यतया भ्रमत्वास्वीकारात्०॥ एतेन पटपदे टघशक्तिभ्रमाच्छाब्दबोधान्त०र्भावेण व्यभिचारवारणाय कार्य्यतावच्छेदककोटावश्यमव्यवहितोत्तरत्वं निवेशनीयमित्यपि प्रत्युक्तम्० भ्रमात्मकज्ञानस्यैतन्मतेऽभावात्० ॥ घटादिपदे मितिमातृवाचकत्वं वारयति० मितिमातृविषयकत्वेन ज्ञानस्य न किञ्चित्पदशक्यतेत्यनेन "अयम्भावः" ज्ञानसामान्यसामग्र्या आत्ममनस्संयोगादेः तद्भासकत्वात् मितिमातृभासकत्वाच्छाब्दनिष्ठजन्यतायां मितिमातृविषयताया अनवच्छेदकत्वात्० ॥ ननु घटमानयेत्यादौ शाब्दबोधस्य कर्म्मत्वादिविषयकतया कर्म्मत्वविषयकत्वावच्छिन्नशाब्दानुकूलशक्तिमत्त्वस्य घटपदे सत्त्वेन कर्म्मत्ववाचकत्वापत्तिरित्यत आह पदान्तरस्य चेति" पदान्तरस्यास्पदस्य पदार्थान्तरभासकतया "तथाच, कर्म्मत्वविषयत्वावच्छिन्नशाब्दानुकूलशक्तिमत्त्वम्" अम्पदे न तु घटादिपदे इति,,न तत्र वाचकत्वापत्त्यवकाशः । प्रभाकरमतमुत्थापयति । कार्य्यान्वितेति० । गामनयेत्यत्र गवानयनं कार्य्यमित्यन्वयबोधे आनयनविषयतायां साक्षात्कार्य्यत्वविषयतानिरूपितत्वलाभार्थं साक्षादिति० । गवादिविषयताया परम्परया तन्निरूपितत्व-लाभार्थं परम्परेति० ॥ एतन्मते घटादिपदे कार्य्यत्वविषयत्वावच्छिन्नशाब्दजनकतावच्छेदकत्वसत्वात्कार्य्यतावाचकत्वमेतन्मते परिष्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोति,. "तद्विषयत्वावच्छिन्नेत्यनेन० । "अयम्भावः" निरूपितत्वांशेऽविशेषणीभूय यन्निष्ठविषता यादृशजन्यतावच्छेदिका तादृशजन्यतानिरूपितजनकतावच्छेदकधर्म्मवत्त्वं तद्वाचकत्वं निष्कृष्टम्० ॥ एवञ्च कार्य्यत्वविषयतानिरूपितघटविषयकत्वावच्छिन्नजन्यतायां निरूपितत्वांशे विशेषणतयैव कार्य्यत्वविषयताया अवच्छेदकत्वं न त्वविशेषणतयेति न टघत्वादौ तद्वाचकत्वापत्त्यवकाशः । अथात्र विनिगमकाभावात् घटविषयतानिरूपितशाब्दं प्रत्यपि घटादिपदानां कारणता वक्तव्यतया तत्रापि तथाविधावच्छेदकत्वानपायादुक्तापत्तिर्दुर्व्वारेति चेन्न,, एतद्दोषस्यैव विनिगमकत्वात्० ॥ यद्वा कार्य्यत्वविषयतानिरूपितत्वानवच्छिन्नत्व,, कार्य्यत्वविषयतात्वपर्य्याप्तावच्छेदताकान्यत्वोभयाभाववतो निरूपितत्वांशेऽविशेषणोयद्विषयतानिष्ठा यादृशजन्यतावच्छेदकता भवति तादृशजन्यतानिरूपितजनकतावच्छेदकधर्म्मवत्वस्य विवक्षितत्वात्० ॥ तथाच,, घटविषयतानिरूपितकार्य्यत्वविषयत्वावच्छिन्नजन्यतावच्छेदकतायां कार्य्यत्वविषयतानिष्ठायां निरुक्तोभयस्यैव सत्वेन विनिगमकाभावप्रयुक्त-जन्यताया ग्रहणासम्भवान्नापत्तिरिति सुधियो, विभावयन्तु शिवम्० ॥*॥

इति महामहोपाध्यायतार्किकमैथिल श्रीविश्वनाथशर्म्मरचित-मैथिलनैयायिकवैयाकरण, श्रीसङ्कमलालशर्म्म, श्रीसदाशिवशर्म्म, संशोधित-शक्तिवादविवृतिग्रन्थः समाप्तः

॥ शम्भूयात्० ॥

—०*०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥

विश्वनाथं नुतं विश्वनाथान्वितं विश्वनाथासुतं विश्वनाथः सुतम्० ।
विश्वनाथोपमं विश्वनाथप्रभुं कर्त्तुमुच्चक्करीति प्रणम्याऽऽधियाम्०१॥
व्युत्पत्तिवादविवृतिग्रन्थं श्रीमिथिलेश्वरात्० ।
आज्ञां प्राप्यसुविश्वेशेशमैथिलगुणागूणीः ॥ २ ॥

शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति गादाधरी" एतद्वाक्याच्छाब्दबोधोत्तरसप्तम्या वृत्तित्वं निरूपितत्वञ्चार्थ, स्तयोर्भासधात्वर्थविषयताया मन्वयोऽत्रैव च संसर्गमर्यादापदार्थाकाङ्क्षाप्रयोज्यविषयत्वान्विततृतीयार्थभेदस्या न्वयोऽथवा संसर्गमर्यादापदार्थाकाङ्क्षान्वितप्रयोज्यत्वस्य तृतीयार्थस्य तत्रान्वयः तस्य चाख्यातार्थाश्रयत्वेऽन्वयः तस्य च सप्तम्यन्तार्थैकपदार्थानुयोगिकत्वान्वितषष्ठ्यन्तार्थापरपदार्थप्रतियोगिकत्वान्वित संसर्गपदार्थेऽन्वयः" तथाच,, एकपदार्थानुयोगिकत्वविशिष्टापरपदार्थप्रतियोगिकत्वविशिष्टः संसर्गः शाब्दबोधनिरूपिताकाङ्क्षाप्रयोज्यविषयत्वाभिन्नविषयताश्रयत्ववानित्याकारकः शाब्दबोध इति ॥ अथात्रापरत्वंयदि एकपदभिन्नत्वन्तदा एकत्वत्यनैकत्वस्य सर्वत्र सत्वेनैकपदत्वावच्छिन्नप्रतियोगिताकभेदस्य पदेऽसत्वेनासम्भवप्रसङ्गात् इत्युच्यते तदा पदविशिष्टः संसर्गः निरुक्तविषयताश्रयत्ववानितिपरमार्थः वैशिष्ट्यञ्च,, स्वार्थानुयोगिकत्व, स्वभिन्नपदप्रतिपाद्यार्थप्रतियोगिकत्वोभयसम्बन्धेन,, स्वमत्र पदमेतल्लाभायैव चैकपदमिति न तद्वैयर्थ्यशङ्कापि "ननु पचतीत्यत्र एवमेवकारस्थले आख्यातार्थयत्नवर्तमानत्वयोश्च यः स्वरूपसम्बन्धः स कथं शाब्दबोधे भासितु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थस्तस्य निरुक्तोभयसम्बन्धेन पदविशिष्टाभावादिति चेन्न एकपदार्थविशिष्टसंसर्ग इत्यादिरीत्या विवक्षितत्वात्‘वैशिष्ट्यञ्च’ स्वानुयोगिकत्व स्वभिन्नपदार्थप्रतियोगिकत्वोभयसम्बन्धेन स्वमत्रार्थपरं ‘तथाच’यत्न वर्तमानत्वयो र्भेदान्न दोषः॥ न च नीलोघट इत्यादावगतिः घटेनीलभेदवाधादिति वाच्यम्पदार्थतावच्छेदकविशिष्टः संसर्ग इत्यादिक्रमेण विवक्षितत्वात् ‘वैशिष्ट्यञ्च’ स्वावच्छिन्नानुयोगिकत्व स्वभिन्नपदार्थतावच्छेदकधर्मावच्छिन्नप्रतियोगिकत्वोभयसम्बन्धेच स्वमत्र पदार्थतावच्छेदकपरन्तथाच घटत्वनीलत्वयो र्भेदान्नोक्तागतिरिति ‘न च’ विधेयांशेऽधिकावगाहिशाब्दानुभवस्य नवीनैः स्वीकारात्'' घटोनीलघट इत्यादौ जातित्वविशिष्टजातिमत्परकसर्वनामघटितसघट इत्यादौ चागतिः घटत्वभेदस्य घटत्वे वाधात्'' एवञ्चैतस्य गुरुकुलमित्यादौ निरूपितत्वसंसर्गे पदार्थतावच्छेदककुलत्वावच्छिन्नानुयोगिकत्वाभावाचागतिरेवं धान्याद्धनमित्यादौ विभक्तेः साधुत्वार्थकतानामप्रयोज्यत्वस्य संसर्गतया भानसम्भवात्'धान्यत्वे धान्यत्वभेदविरहात् एवङ्कुलात्कुलमित्यादौ देहाद्देहोऽभिजायत इत्यत्र च जन्यत्वसंसर्गस्य भानानुदयप्रसंगाच्चेति वाच्यं पदजन्यप्रतिपत्तिविषयताविशिष्टसंसर्गता इत्यादि रीत्यावक्तव्यत्वात् ‘वैशिष्ट्यञ्च स्वाश्रयानुयोगिकत्वस्वविशिष्टविषयताश्रयप्रतियोगिकत्वोभयसम्बन्धेन सम्बन्धघटकवैशिष्ट्यञ्च स्वभिन्नत्व,स्वप्रयोजकपदसाकाङ्क्षपदप्रयोज्यत्वोभयसम्बन्धेन स्वंविषयता विशेष्यतात्मकविषयतामादाय सर्वत्र समन्वयान्न दोष इति,, ननु समवायस्यैकत्वनये घटत्वसमवायस्यापि घटपदजन्यप्रतीतीयघटत्वावच्छिन्नविषयताश्र-

CC-0. In Public Domain. Digitization by eGangotri

यानुयोगिकत्वस्य घटपदसाकाङ्क्षस्वपदप्रयोज्यैकत्वविषयताश्रयप्रतियोगिकत्वस्य च सत्वादाकाङ्क्षाभास्यत्वं स्यात्तथाच किन्तत्र शक्तिकल्पन इति चेन्न एकपदार्थ इत्यत्र सप्तम्यर्थो विशेष्यताऽपरपदार्थस्येत्यत्र षष्ठ्यर्थः प्रकारता तयोर्लक्षणया संसर्गपदार्थे संसर्गविषयत्वे निरूपितत्वसम्बन्धेनान्वयः तत्रैव च शाब्दबोधनिरूपिताकाङ्क्षाप्रयोज्यविषयत्वाभेदस्य चान्वयः । तथा च पदजन्यप्रतितीयविषयताविशिष्टसांसर्गिक विषयताकाङ्क्षाप्रयोज्यशाब्दबोधनिरूपितविषयत्वाभिन्न इति पर्य्यवसितोर्थः वैशिष्ट्यञ्च स्वनिरूपितत्व स्वविशिष्टविषयता निरूपितत्वोभयसम्बन्धेन सम्बन्धघटकवैशिष्ट्यञ्च स्वभिन्नित्व स्वनिरूपितपदसाकाङ्क्षपदप्रयोज्यत्वोभयसम्बन्धेन स्वम्विषयता प्रकारताभेदेन सांसर्गिकविषयतायां भिन्नत्वेन एकत्वविषयतानिरूपितसमवायनिष्ठसांसर्गिकविषयतातोघटत्वनिष्ठप्रकारतानिरूपितसमवाय निष्ठसांसर्गिकविषयताया भिन्नत्वात् तत्र च शक्तेस्स्वकारस्यावश्यकत्वादिति प्रकारतानिरूपितत्वस्य सांसर्गिकविषयतायामनभ्युपगमे संयोगेन पर्वते वह्निरवृत्तिरिति बुद्धिमति समवायेन पर्वतोवह्निमान्नितस्यापि प्रतिबन्धकत्वापत्तेः प्रतिवन्धकता च वह्नित्वावच्छिन्नप्रकारतानिरूपित, पर्वतत्वावच्छिन्नविशष्यताशालिनिश्चयत्वेनैवातो न दोषः 'विशेष्यतानिरूपितत्वस्य सांसर्गिकविषयतायामनभ्युपगमेनायोग्यत्वादिति वाच्यम् संयोगेन वन्ह्यभाववान्निति बुद्धित्वावच्छिन्नम्प्रति संयोगेन वह्निमान्पर्वत इति ज्ञानस्येव स्वसंयोगिसंयोगेन वह्निमान् पर्वत इति निश्चयस्य प्रतिबंधकत्वापत्तिभिया तदावश्यकत्वात्संयोगत्वमात्रावच्छिन्नत्वस्य संसर्गतायां निवेशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महानसीयसंयोगेन वह्निमान्पर्वत इति ज्ञानस्य प्रतिबन्धकत्वानुपपत्तिः इति पक्षता सिद्धान्तसारे विस्तरेण० । शाब्दबोधे चेत्यत्र चस्त्वर्थे तथा चायम्भावः । अनुमितौ सांसर्गिकविषयतायाः प्रयोजकत्वं यथा परामर्शीयविषयतायास्तथा प्रकृते शाब्दबोधे सांसर्गिकविषयतायाः प्रयोज्यत्वन्न शक्ते तज्ज्ञानीय विषयतायाः किंतु आकाङ्क्षाज्ञानस्यैवेति,, अत एवान्विताभिधानवादिमते शाब्दबोधे चेत्यपि ग्रन्थादौ सङ्गच्छते येषां संसर्गतायां विवादस्तेषां स्वमते संसर्गत्वसूचनाय,, विशेषोल्लेखमाह सत्वविषयेत्यादिना "आदिना" जन्यजनकभावादीनां परिग्रहः । तथा च घटं पश्यति ग्रामं गच्छति इत्यादौ कर्म्मत्वे आधेयत्वस्य चैत्रस्य धनमित्यादौ आश्रयत्वात्मकाधारत्वस्य घटः पटो नेत्यादौ नञर्थभेदे प्रतियोगित्वस्यानुयोगित्वस्य वा सन्प्रत्ययार्थेच्छायां विषयत्वस्य विषयित्वादेर्वा चिकीर्षति बुभुक्षत इत्यादौ गमधात्वर्थव्यापारे जनकत्वस्य गमधात्वर्थे फले व्यापारस्य कर्त्तृप्रत्ययस्थाने कर्म्मप्रत्ययस्थले शाब्दबोधे घट ग्राम पट कृतिभोजनफलव्यापारसंसर्गमर्य्यादयाभानमित्यग्रे मूले व्यक्तीभविष्यतीति भावः । स्वसमानविभक्तिकत्वं च विभक्तिविभाजकप्रथमात्वादिनेति गादाधरी, ननु विभक्तिविभाजकधर्म्मादिनेत्येवोक्त्या सर्वसामञ्जस्येऽलं प्रथमात्वादिनेत्युक्त्या इति चेन्न (संख्यात्वव्याप्य सामान्ये शक्तिमान् प्रत्ययस्तु यः०। सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङौ चेति भेदत, इत्यनेन) विभक्तिश्च सुप्तिङ्भेदेन द्विधा इत्यग्रिमग्रंथेन च विभक्तिविभजनात् । विभक्तिविभाजकत्वं" सुप्तिङ्त्वे च प्राप्तमिति सुप्त्वादिना स्वुब्विभक्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साजात्यस्य ङस् विभक्त्यादौ सत्वेन नीलस्य घट इत्यादौ नीलघटयोरभेदान्वयप्रसङ्गात्" प्रथमात्वादिनेत्यभिधानस्यावश्यकत्वं. तथा च विभक्तिपदं सुप्परमिति सुब्विभाजकधर्म्मादिना साजात्यस्य नाभावान्न दोषः । न च किंतत्सुब्विभाजकत्वं,, येन सुप्त्वस्य सुब्विभाजकधर्म्मपदेन गृहीतुं न शक्यते इति वाच्यम् । सुप्त्वव्याप्यत्वे सति सुप्त्वव्याप्याव्याप्यत्वस्य तदर्थत्वात्" स्वस्मिन् स्वव्याप्यत्वविरहान्न सुप्त्वे सुब्विभाजकत्वमित्यदोषात्० ॥ न च स्वाभाववद्वृत्तित्वस्य स्वव्याप्यत्वस्य स्वस्मिन्नपि सत्वादिति वाच्यम् । स्वभिन्नत्वे सति स्वाभाववद्वृत्तित्वस्य, स्वसमानाधिकरणत्वे सति भेदप्रतियोगितावच्छेदकत्वस्य वा प्रकृते व्याप्यत्वपदेन विवक्षितत्वात्" स्वस्मिन् स्वभिन्नत्वविरहेण समानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य च विरहेण स्वस्मिन् स्वव्याप्यत्वविरहान्न दोष इति,, न च सुप्त्वव्याप्यस्य प्रथमा, द्वितीयान्यतरत्वस्य व्याप्यत्वं, प्रथमात्वेप्यस्तीति सुप्त्वव्याप्याव्याप्यत्वस्य प्रथमात्वे विरहेणासम्भवप्रसङ्गादिति वाच्यम्, सुप्त्वव्याप्यजात्यव्याप्यत्वस्य विवक्षितत्वादन्यतरत्वे जातित्वविरहेणासम्भवानवकाशात्" भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वमन्यतरत्वमखण्डोपाधिर्वा० न च सुप्त्वव्याप्यत्वस्य तादृशाव्याप्यत्वस्य प्रथमाषष्ठ्यन्यतरत्वे सत्वेन तस्यापि विभक्तिविभाजकधर्म्मपदेन धर्त्तुं शक्यतया नीलस्य घट इत्यादावुक्तदोषस्य तादवस्थ्यादिति वाच्यम् । "सुप्त्वव्याप्यत्वे सति सुप्त्वव्याप्यजात्यव्याप्यत्वे सति जातित्वस्य सुब्विभाजकत्वेत्यनेन विवक्षितत्वात्तथा च, स्वप्रकृतिकविभक्तिवृत्तित्वोपलक्षितविभक्तिविभाजकधर्म्मवद्विभक्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतित्वं,, स्वसमानविभक्तिकत्वस्य फलितमिति दिक् ॥*॥ मैवं,, विशेष्यवाचकपदोत्तरविभक्तितात्पर्य्यविषयसंख्याविरुद्ध-संख्याया यत्राविवक्षितत्वमिति "गादाधरी"। अथात्र विशेष्य-वाचकपदोत्तरं यत् तत्तात्पर्य्यविषयसंख्याविरुद्धेत्यादिरीत्या वि-वक्षणादेव सर्वसामञ्जस्येऽलंविभक्तिपदोपादानेनेति चेन्न, दधिप्र-मेयं वस्तुप्रमयश्च, इत्यादौ विशेष्यवाचकदधि, वस्तुपदोत्तरप्रमेय, वस्तुतात्पर्य्यविषयसंख्याविरुद्धसंख्याया अप्रसिद्ध्या समानवचन-त्वासम्भवादतस्तदुपात्तं 'तथा'च प्रमेयपदस्य विभक्तित्वाभावान्ना-प्रसिद्धिरिति" "नत्वविशेष्यवाचकपदोत्तरविभक्त्यर्थसंख्यावि-रुद्धेत्यादिकमेवोच्यतामलं तात्पर्य्यविषयपर्य्यंतानुशरणेनेति चे-न्न,, सुपांसुवित्यनेन सुब्विभक्त्यर्थत्वस्य शक्त्या लक्षणया वा एकत्वद्वित्वबहुत्वेपि सत्वात्। विभक्त्यर्थभिन्नत्वस्य सं-ख्यायामसत्वादेवं जस्विभक्तेरपि बहुत्ववदेकत्वद्वित्वार्थकत्वात् जस्विभक्त्यर्थभिन्नसंख्याया अप्रसिद्धत्वादसम्भवप्रसङ्गादत-स्तात्पर्य्येति, केचित्तु। यत्र बहुत्वतात्पर्य्येण सुपदप्रयोगो भ्रान्त-स्य यथा वेदाः प्रमाण न्तत्र भ्रान्तपुरुषस्य वेदः प्रमाणमिति वा-क्याच्छाब्दबोधो भवति तदानीं विशेष्यवाचकपदोत्तरसुविभक्त्य-र्थ एकत्वभिन्नसंख्यायाः द्वित्वबहुत्वादे र्विशेषणवाचकपदोत्तरवि-भक्त्या अविवच्छितत्वात्तदनुपपत्तिरस्त स्तदुपस्तमित्याहुः 'नन्वत्र-विरुद्धत्वमेकाधिकरणावृत्तित्व न्तच्च न घटत्वे यतो बहुत्वाधिक-रणे वेदे स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वस्वसम्बन्धेन प्रमाणपदोत्तर-विभक्त्यर्थस्यैकत्वस्यापि सत्वादिति चेन्न प्रकृते विरुद्धत्वन्नैका-धिकरणावृत्तित्वं'किन्तु'भिन्नत्व न्तथा च लक्षणया विरुद्धपदस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नार्थकत्वे तादृशसंख्याभिन्नसंख्येति पर्य्यवसितोर्थो वोध्यः॥ केचित्तु साक्षात्सम्बन्धेन वृत्तित्वस्य विवक्षणे प्रमात्वगतैकत्वस्य प्रमाणे तेन सम्बन्धेनासत्वात् यथाश्रुतस्यैव सम्यक्त्वादित्याहुः॥ ननु'यत्र'विशेषणवाचकपदोत्तरविभक्त्यर्थ" संख्याया अविवक्षितत्वन्तत्रैव समानवचनत्व मित्युक्त्यैव सर्व्वत्र सामञ्जस्ये विरुद्धान्तविशेषणमनर्थकमिति चेन्न प्रमाणपदोत्तरवहुत्वविवक्षायामपि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्येव साधु न तु प्रमाणमपि" इदानी न्तस्यापि प्रमाणत्वं स्यात् अतो विरुद्धेति, तथाच प्रत्यक्षानुमानोपमानशब्दोत्तरजस्विभक्तितात्पर्य्यविषयवहुत्वविरुद्धत्वस्य वहुत्वेऽसत्वात्सत्वाच्च एकत्वादौ तस्य प्रकृतेऽविवक्षितत्वात्समानवचनत्वं तत्र निरावाधमिति एवं घटो घटपदार्थ इत्यत्र पदार्थत्वे एकत्वविवक्षायामपि समानवचनत्वमन्यथा" विशेषणपदोत्तरविभक्त्या एकत्वस्य विवक्षितत्वादसम्भवादिति विरुद्धान्तनिवेशः॥ ननु मृदुपचतः।मृदुपचावित्यादौ विशेषणवाचकपदोत्तरविभक्त्या संख्याया अविवक्षितत्वात्तत्र समानवचनत्वविरहात्कथं तादृशनियमोपपद्यत इति चेन्न विशेष्यवाचकपदोत्तरविभक्तितात्पर्य्यविषयविशेष्यगतसंख्याविरुद्धसंख्यायाः यत्राविवक्षितत्वमित्यस्य विवक्षितत्वात्तथा प्रकृते विशेष्ये धात्वर्थे संख्याया अनन्वयादस्य एतन्नियमानाक्रान्तत्वादिति भावनीयम् (अथ त्रिभुवनजयलक्ष्मीर्म्मैथिली तस्य दारा) इत्यत्र दारपदोत्तरविभक्त्यर्थस्य वहुत्वस्याविवक्षितत्वात्तथा चात्राविवक्षितत्वस्य सत्वेन समानवचनत्वस्याभावेन व्यभिचारप्रसङ्ग इति चेन्न, दार इत्यस्यैव विशेष्यवचनत्वम् तथा च विशेष्यवाचकपदोत्तरजस्विभक्तिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पर्य्यविषयत्वस्य संख्यायामभावेन विशेष्यवाचकपदेन दारापदस्य धर्तुमशक्यत्वेन नियमानाक्रान्तत्वात्" नियमस्तु व्याप्तिः "सा च" (विशेष्यवाचकपदोत्तरतात्पर्य्यविषयसंख्याविरुद्धसंख्याया विशेषणवाचकपदोत्तरविभक्त्या अविवक्षितत्वात् ॥) व्यापकस-मानवचनत्व) सामानाधिकरण्यरूपा सा च निराबाधेति दिक्० ॥ वेदाः प्रमाणमित्यत्र विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितम् " तच्च " प्रकृत्यर्थतावच्छेदकप्रमितिकरणत्वेऽन्वेति-शाब्दप्रमितिकरणत्वं शब्दत्वावच्छिन्नयावच्छब्दनिष्ठमेकमेवेति नायोग्यतेति 'गादाधरी'। अथ प्रमाणे अनेकैकत्वान्वयसम्भवात्कथम योग्यतेति चेन्न न हि एकत्वत्वावच्छिन्नमेकवचनार्थः अपि तु स-जातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहि-तत्वं 'साजात्यं च' समभिव्याहृतपदार्थसंसर्गित्वविशिष्ट प्रकृत्यर्थ-तावच्छेदकरूपेण 'अत एव चाग्रे ग्रन्थे स्पष्टमभिधानात्तथा च, चालि-नीन्यायेन प्रमाणगतैकत्वे तादृशभेदप्रतियोगितावच्छेदकत्वस्यैव सत्वादनवच्छेदकत्वस्य विरहेणायोग्यत्वप्रसङ्गात् ॥न च तादृश प्र-कृत्यर्थतावच्छेकरूपेण सजातीयप्रमाणेप्रमाणत्वगतैकत्वस्यासत्वेन तत्रापि सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकत्वविरहेणायोग्य-त्वस्य तथाप्यनुद्धार इति वाच्यम्, यत्र प्रकृत्यर्थतावच्छेदके संसर्गे स्वार्थान्वयस्तत्र सामानाधिकरण्यघटितसानाधिकरण्यसम्बन्धने स-मभिव्याहृतपदार्थसंसर्गित्वविशिष्टस्वार्थानुयोगितावच्छेदकरूपेण साजात्यं तथा च प्रकृते वेदानुयोगिकाभेदसंसर्गित्वविशिष्टप्रमाण-त्वरूपेण सजातीयत्वात्० ॥ वस्तुगत्या वेदनिष्ठप्रमाणत्वं तद्वृत्तिभे-दप्रतियोगितानवच्छेकत्वस्य एकत्वे सत्वेन योग्यत्वस्याक्षतत्वादत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव 'चार्व्वाकादिनिर्म्मित आगमे' अयोग्यशंकानिराशार्थमेवैकवचनप्रयोग इत्यपि साधु संगच्छते अत एव वाचस्पतिमिश्रैः शाक्यभिक्षुकनिगून्थिकसंसारमोचकादीना मागमाभासाः परिकृताभवन्तीत्यत्रागमाभासत्वं सांख्यतत्वकौमुद्यां तदपि संगच्छते प्रामाण्याभावेनाभासत्वस्य तत्राक्षतत्वात् ॥ न च वेदानुयोगिकभेदविशिष्टप्रमितिकरणतात्वस्य चार्वाकाद्यागमनिष्ठप्रमितिकरणतायां विरहेण तस्य सजातीयानन्तर्गतत्वात् स्वातन्त्र्येण तेषामागमे प्रामाण्यसत्वेपि तादृशैकत्वस्य प्रकृते प्रमितिकरणतायां सत्वात्कथं तेषामागमे प्रामाण्यशङ्का निराकृताभवतीति वाच्यं प्रकृते स्वार्थानुयोगितावच्छेदकरूपेणैव साजात्यं तथा च यदि चार्वाकाद्यागमे प्रामाण्यं स्यात्तदा साजात्यन्तत्राक्षतन्तन्निष्ठभेदप्रतियोगितानवच्छेदकमेकत्वन्नभवेत्तस्यैव नेति एकवचनेन दृढतरं कृतं, न च स्वार्थानुयोगितावच्छेदकप्रमितिकरणतात्वं अनुमितिकरणतायां सत्वेन तद्घति भेदप्रतियोगितानवच्छेदकत्वस्य प्रकृते एकत्वे विरहेणायोग्यत्वन्तादवस्थ्यमेवेति वाच्यं एतदस्वरसेन शब्दत्वावच्छिन्नयावच्छब्दनिष्ठमेकमेव शाब्दप्रमाकरणत्वमित्युक्तं तथाचायम्भावः ॥ अनुयोगितावच्छेदकं शब्दत्वावच्छिन्नशाब्दप्रमितिकरणत्वं तच्च, नानुमितिप्रमितिकरणतायामस्तीति नायोग्यतेति ॥ केचित्तु प्रमितिकरणत्वे अन्वेतीत्यस्य प्रमितिकरणत्वघटकप्रमितावन्वे इत्यर्थः ॥ तथाचायं भावः, सकलवेदानां संसारनिदानमिथ्याज्ञानोन्मूलनक्षमे परमात्मकनुभवे तात्पर्य्यं नत्वनेकवैजात्यविशिष्टानेकानुभवे इति अथ सकलवेदजन्यपरमात्मविषयकज्ञानस्यापि व्याससुकवामदेवादिभेदेन नानात्वात्कथं तादृशैकत्यान्वययोग्यतेति चेन्न,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमितित्वे एकत्वस्याबाधादत एव दशमस्त्वमसीति वाक्यात् प्रत्यक्षात्मिकाप्रमितिजन्यतेति०वेदे प्रत्यक्षप्रमितिकरणत्वमभ्युपगच्छतास्मतमपाकर्त्तुमेकवचनप्रयोगः 'साध्वीति'; न च इषेत्वेत्यादिमंत्राणां सहस्रशीर्षापुरुषसूक्तानां अग्नीषोमीयं पशुमालभेदित्यादि वाक्यानां विभिन्नप्रतिपादकानां कथं परमात्मपरतेति वाच्यं यथा निगमनार्थविशिष्टविषयकबोधजनयतोपि प्रतिज्ञादेः तत्तद्वाक्यप्रयोजकाकाङ्क्षोत्थापकतया इह धूम इति वचनसामानुमानीकवह्निधीपरतावत्तद्विशिष्टार्थविषयकधीपरत्वं तथा परस्परमन्त्राणां तत्तद्वाक्यानां चाकाङ्क्षात्थापकतया परमात्मधीपरतानिर्व्वहत्येवं-सर्व्ववेदा यत्पदमामनन्तीति श्रुत्या वेदानां परमात्मपरत्वस्याक्षतत्वात् इत्याहुरिति दिक् ॥ अथ तत्तदर्थान्विततत्तदर्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्तत्पदसाकाङ्क्षतत्तत्पदत्वेन कारणत्वाच्छाब्दस्य वह्निना सिंचतीत्ययोग्यशब्दापभ्रंशशब्दवदसाधारणत्वेनातिप्रसक्ततया प्रमितिकरणतानवच्छेदकत्वात्कथं शब्दत्वावच्छिन्नप्रमितिकरणतेत्युक्तं एवं शब्दत्वं न कमपि शाब्दं प्रतिजनकतावच्छेदकं अतिप्रसक्तत्वादिति चेन्न सकलवेदतात्पर्य्यार्थविषयकविजातीयप्रमितित्वावच्छिन्नं प्रति स्वतंत्रपुरुषोच्चरितशब्दत्वावच्छिन्नप्रमितिकरणत्वमेकमेवेति न काप्यनुपपत्तिरिति ॥ वेदत्वं च,, स्वतन्त्रपुरुषोच्चरितशब्दत्वं "अथवा" शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं इति सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वविवक्षावेदत्वमित्यधिकं मदीयसर्व्वसंग्रहे आलोचनीयमिति ॥ न च पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशे इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्युत्पत्तिविरोधः ॥ सम्पन्नो व्रीहिरिति अनेकव्रीहितात्पर्य्यकेप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वादिति गादाधरी। अत्र पदार्थत्वमाश्रयत्वसम्बन्धावच्छिन्नपदजन्यबोधविषयत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यत्वं "अन्यद्वेतीत्यन्यदेतत्" संकोचश्चात्र तदर्थविशेष्यकतत्पदवृत्तिज्ञानजन्यत्वस्य कार्य्यतावच्छेदके निवेशेन बोध्यः 'तथा च' तत्पदविशेष्यकतत्पदवृत्तिज्ञानजन्यतदर्थोपस्थित्यव्यवहितोत्तरजायमानशाब्दबुद्धित्वावच्छिन्नं प्रति तदर्थविशेष्यकतत्पदवृत्तिज्ञानजन्यतदुपस्थितित्वेन कारणत्वं बोध्यम् ॥*॥ S. Sadashib jha. ॥*॥

अथ वेदाः प्रमाणमित्यस्य एकत्वविवक्षायां प्रामाण्योपपादने एकत्वविवक्षायां घटाः नील इत्यस्यापि प्रामाण्यं स्यात् तद्युक्तेस्तौल्यादिति चेदत्र काशीस्थाः दाक्षिणात्यादयः। विभक्त्यर्थैकत्वस्य स्वाश्रयसमानाधिकरणोद्देश्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वसम्बन्धेन, 'प्रकृत्यर्थतावच्छेदके' 'अथवा" तादृशानवच्छेदकप्रकृत्यर्थतानवच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थेऽन्वयसम्भव,, स्तथा" च, एकत्वाश्रयनीलसमानाधिकरणत्वोपलक्षितघटत्वाधिकरणपीतवृत्तिभेदप्रतियोगितानवच्छेदकत्वस्य नीलत्वे बाधात् नैकत्वान्वयविवक्षा सम्भवतीति,, न घटानील इत्यस्य प्रामाण्यं०। एकत्वाश्रयप्रमाणत्वसामानाधिकरण्यस्योपलक्षितवेदत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वस्य प्रमितिकरणत्वेनान्वययोग्यत्वस्याक्षतत्वादित्याहुस्तन्न घटाः प्रमेयो वाच्यो घटाः कम्बुग्रीवादिमान् घट इत्यादेरेकत्वविवक्षायां प्रामाण्यं स्यात् युक्तेस्तौल्यात्० ॥ "वस्तुतस्तु" ब्राह्मणत्वसमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य शतत्वे सत्वेन एवं विश्वदेवत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य पुरोरवमाद्रवसोभयगतद्वित्वे सत्वेन शतत्वे एकत्वान्वयस्य पुरोरवमाद्रवसोभये द्वित्वान्वयस्यायोग्यतया शतं ब्राह्मणाः पुरोरवोमाद्रवसविश्वेदेवा इत्यस्य चाप्रामाण्यप्रसङ्गात्॥*॥"अथात्र मैथिलाः" नीलो घटा इत्यादौ नीलपदस्य नीलगुणविशिष्टे लक्षणा लक्ष्यतावच्छेदकस्य नीलस्यानेकत्वेन सजातीयद्वितीयराहित्यात्मकैकत्वस्यान्वययोग्यतायाः विरहेण प्रामाण्याभावान्न दोषः ॥ लक्ष्यतावच्छेदकतावच्छेदकनीलत्वजातौ एकत्वस्य सत्वेपि तदर्थताव च्छेदकतावच्छेदके विभक्त्यर्थान्वयस्यादृष्टचरत्वात्। दृष्टचरत्वे वा तत्र एकत्वविवक्षायाः किं प्रयोजनं तद्वक्तव्यं यथा पशुनायजेतेत्यादौ नानापशुकरणकयागजन्यादृष्टिसिद्धिर्म्मा भवत्वेतदर्थं यथा जात्याकृतिविभक्तयः पदार्थ इत्यत्र शक्तित्रयशङ्कानिराशार्थं 'सम्पन्नो व्रीहिरित्यादौ यवादिसम्पन्नत्वशंकानिराशार्थंत्रयः समुदिता हेतुरित्यत्र यथा तृणारणिमणिन्यायेन हेतुत्वशंकानिराशार्थं एकत्वविवक्षादरस्तथात्र नास्त्येव मुक्तलज्जैस्तैर्व्वक्तव्यमिति एकत्वस्याविवक्षितत्वात्समानवचनत्वमेव तत्र, नत्वसमानवचनत्वमिति नाप्रामाण्यशङ्काकलंकोपोति प्राहुः,, ननु प्रमितिकरणत्वं वेदेन प्रमित्यव्यवहितपूर्व्वक्षणावच्छेदेन प्रमितिसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं चालिनीन्यायेन सकलवेदे तादृशाभावप्रतियोगित्वस्यैव सत्वात्किन्तु तादृशाभावप्रतियोगितामवच्छेदकधर्म्मवत्वं स च सर्व्वधर्म्मवेदशब्दत्वमिति वेदशब्दत्वात्मकप्रमितिकरणताया अविवक्षितत्वं कथं वेदशब्दत्वेन हि स्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यावच्छेदकत्वं स्वस्मिन्नात्माश्रयप्रसङ्गादिति चेन्न,, उपहितानुपहितभेदेनावच्छेद्यावच्छेदकभावोपपत्तेरिति ध्येयम् ॥*॥ अथ सम्पन्नो व्रीहिरित्यत्र कथमेकत्वस्य व्रीहित्वेऽन्वयः निर्द्धर्म्मितावच्छेदककशाब्दबोधस्यानभ्युपगमात्" ०। विशिष्टबुद्धित्वावच्छिन्नं प्रति धर्म्मितावच्छेदकरूपेण धर्म्मिण उपस्थितेः कारणस्य विरहाच्चे ति चेन्न. व्रीहिपदस्य व्रीहित्वत्वविशिष्टे लक्षणामभ्युपेत्योक्तत्वादनभ्युपगमेत्वाह यदि च स्वाश्रयप्रकृत्यर्थतावच्छेदकसम्बन्धेनेत्यादि अथ लक्षणापक्षे व्रीहित्वे कथमेकवचनार्थस्य वक्ष्यमाणस्यान्वयः समभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकव्रीहित्ववन्निष्ठभेदप्रतियोगितानवच्छेदकत्वस्य एकत्वे बाधात्तथाविधि एकवचनार्थस्याप्रसिद्धत्वादिति चेन्न,, यत्र प्रकृत्यर्थे अन्वयस्तत्र तादृशप्रकृत्यर्थतावच्छेदकरूपेणैव साजात्यं 'यत्र प्रकृत्यर्थतावच्छेदकेऽन्वय स्तत्र तादृशसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकतावच्छेदकरूपेणसाजात्यं अविवक्षितत्वात् तथाच नाप्रसिद्धिरिति ध्येयम् ॥ ननु द्वितीयपक्षे स्वसजातीयव्रीहिनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य व्रीहित्वगतैकत्वे सत्वेनाप्रसिद्धिभिया भेदीयप्रतियोगितावच्छेदकतायां येन सम्बन्धेनैकत्वस्यान्वयो विवक्षितस्तत्सम्बन्धावच्छिन्नत्वस्य निवेशे पुनस्तादृशसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकसजातीयनिष्ठभेदस्याप्रसिद्धत्वात्तद्वाक्यार्थाप्रसिद्धिरिति चेन्न, भेदीयप्रतियोगिता न केनापि सम्बन्धावच्छिन्नाऽपि तु तादृशभेदीयप्रतियोगितावच्छेदकत्वाभाव एव स्वाश्रयप्रकृत्यर्थतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तथाच प्रकृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताद्दशाभावस्य च व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकतया सर्वत्र सत्वादप्रसिद्ध्यभावात् केचित्तु स्वसजातीयनिष्ठभेदप्रतियोगितावच्छेदकतासामान्ये यत्सम्बन्धावच्छिन्नत्व यन्निष्ठत्वोभयाभावस्तत्सम्बन्धेन तद्धर्त्वं समुदितार्थः न काप्यनुपपत्तिरिति अन्येतु स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व-प्रकृत्यर्थतावच्छेदकवृत्त्येकत्वोभयाभाववतीयास्वसजातीयनिष्ठभेद-प्रतियोगितावच्छेदकता तदभाववदेकत्वं सजातीयद्वितीयराहित्यमाहुः 'ननु' तथाप्यत्र एकत्वविवक्षायाः किंफलं यवव्रीह्युभयसम्पन्नदशायां सम्पन्नौ व्रीहियवौ इत्येव साधु न तु सपन्नोव्रोहिरित्यपि साधुरिति वक्तुन्न शक्यते प्रकृत्यर्थतावच्छेदकव्रीहित्वस्य यवादौ असत्वेन यवसम्पत्तिदशायामपि सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्य स्वाश्रयव्रीहित्वसम्बन्धेन प्रकृत्यर्थे सत्वात् योगत्वस्याक्षतत्वादिति चेन्न, यत्र परम्परासम्बन्धेन प्रकृत्यर्थे एकत्वान्वयस्तत्र समभिव्याहृतपदार्थसंसर्गित्वरूपेणैव साजात्यं यत्र तु साक्षात्सम्बन्धेनान्वयस्तत्र ग्रन्थकृदुक्तरूपेण तदिति तथा यवव्रोहिसम्पत्तिदशायां सम्पन्नोव्रीहिरित्यस्य समभिव्याहृतपदार्थः सम्पन्नस्तत्प्रतियोगिकतादात्म्यसंसर्गित्वविशिष्टयत्नवृत्तिभेदप्रतियोगितावच्छेदकत्वव्रीहिगतैकत्वे सत्वेन वाक्यार्थस्याप्रसिद्ध्याऽप्रामाण्यप्रसङ्गात् केवलव्रोहिसम्पत्तिदशायां तु साजात्यं व्रीह्यावेव तन्निष्ठभेदप्रतियोगितानवच्छेदकत्वस्य व्रोहित्वगतैकत्वेसत्वेनान्वययोग्यत्वस्य तत्राक्षततया प्रामाण्यमुपपद्यते न चानुपयुक्तवस्तुसम्पत्तिदशायां ताद्दशप्रयोगस्य साधुत्वप्रसङ्गः अनुपयुक्ते साजात्यसत्वादिति वाच्यं सम्पन्नोव्रोहिरिति कदा प्रयोगस्तद्विविच्योच्यतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदा भोचैत्र तव क्षेत्रे किं किं सम्पन्नं इति मैत्रप्रश्नवाक्यं तदा संपन्नोव्रीहीरित्यस्य उत्तरवाक्यतया प्रयोगः तदा चैत्रीयस्वत्वविशिष्टव्रीह्यादावेव सम्पत्तिर्धीरिति ॥ प्रकृते स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टवक्तृतात्पर्य्यविषयवक्तृसम्बन्धविशेषरूपेणैव साजात्यं तथा चानुपयुक्तेस्तादृशसम्बन्धविरहेण तस्य सजातीयानन्तर्गतत्वाददोषात् यवसम्पत्तिदशायां च तादृशसम्बन्धविशेषस्य यवादौ सत्वेन साजात्यस्य यवेऽपि सत्त्वात् यवसम्पत्तिदशायान्न तादृशप्रयोग इति यवसम्पत्तिनिराशार्थमेकवचनप्रयोगः "नव्यास्त्वेकत्वस्य स्वाश्रयवत्त्व स्वाश्रयप्रकृत्यर्थतावच्छेदकवदितरावृत्तिसम्पत्त्यवच्छिन्नाभेदवत्त्वोभयसम्बन्धेनैकत्वस्य प्रकृते प्रकृत्यर्थेऽन्वयस्तथाच केवलव्रीहिसम्पत्तिदशायामेव तादृशप्रयोगा न यवसम्पत्तिदशायामपीत्याहुः यत्तु सम्पन्नोव्रीहिरित्यादावेकवचनोपस्थितानि नानैकत्वानीत्यादि,, एतद्देशे वहुघटसत्वदशायान्तादृशवाक्यप्रयोगस्तु जात्येकत्वादेव समर्थनीय इति "गादाधरी" अत्र ग्रन्थार्थस्तु स्पष्टएव तावद्यो विशेषस्सोभिधीयते अर्थतस्तल्लाभादित्यस्य शाब्दवोधस्विनैव तद्बाधात् तथाच तद्बोधनाय न शब्दप्रयोगादर इति भावः०॥ अथ पशुनायजेदित्यत्र समभिव्याहृतपदार्थीयागकरणता तस्य यागेऽन्वयो न तु पशौ तत्संसर्गित्वविशिष्टत्वस्य प्रकृत्यर्थतावच्छेदकविरहेण योग्यत्वप्रसङ्गादिति न च तुल्यवित्तिवेद्यतया पशोरपि करणत्वभानान्नायोग्यत्वमिति वाच्यम्, प्रत्यक्ष एव तथानियमो न तु शाब्देपीत्युक्तदोषतादवस्थ्यान्नच प्रकृतिशाब्दसमानाकारकप्रत्यक्षीयविशिष्टार्थप्रतियोगिकसंसर्गित्वविशिष्टस्य प्रकृत्यर्थतावच्छेदकसाजात्यघटके विवक्षणान्न दोष इति वाच्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यागांशे तत्ताभासकपदाभावात्सामान्यतो यागकरणत्वस्य यागान्तरकरणपशुसाधारणतयाऽयोग्यत्वस्य तादवस्थ्यादिति चेन्न न च स्वाश्रयपशुनिष्ठभेदप्रतियोगिपश्वकरणकत्वस्वाश्रयपशुकरणकत्वोभयसम्बन्धेन संख्यारूपैकत्वस्य यागेऽन्वयोपगमान्नानुपपत्तिरिति वाच्यं प्रकृत्यर्थानन्वयभंगप्रसङ्गादिति चेदथ स्वाश्रयपशुकरणकयागकरणपशुनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य तादात्म्ये उभयसम्बन्धेन एकत्वविशिष्टत्वैकत्वमेकवचनेन बोध्यते तादृशैकत्वस्य प्रकृत्यर्थे पशावन्वयइति न पूर्व्वोक्तनियमभङ्गप्रसङ्गावकाश इति यद्वा यागपदस्य स्वभिन्नपशुकरणत्वसम्बन्धेन पशुविशिष्टान्ययागेन लक्षणा तत्र पशुकरणकत्वान्वयः करणतासम्बन्धेन वा पशोरन्वयः तृतीयान्तजजिपदस्य लक्षणात्वान्तात्पर्य्यग्राहकमिति विभावनीयम्।नव्यास्तुस्वानाश्रय पशुकरणकयागकरणपशुभिन्नत्वस्वाश्रयत्वोभयसम्बन्धेनै कत्वसंख्यायाः पशावन्वयोपगमान्न काप्यनुपपत्तिरित्याहुः।अन्येतु स्वसमभिव्याहृतपदार्थ संसगित्वमित्यत्र पदार्थस्य संसर्गित्वमिति षष्ठ्यर्थप्रतियोगिकत्वमात्रमविवक्षितञ्च प्रतियोगि, त्वानुयोगिकत्वान्यतरं, यद्वा विशेष्यवाचकपदोत्तरैकवचनसाजात्यघटके स्वसमभिव्याहृतपदार्थप्रतियोगिकसंसर्गित्ववैशिष्ट्यस्य प्रवेशः विशेषणवाचकविशेषणतावच्छेदककोटिप्रविष्टवाचकपदोत्तरैकवचनसाजात्यघटके स्वसमभिव्याहृतपदार्थानुयोगिकसंसर्गित्वविशिष्टस्यैव निवेशनीयत्वात्।। यथा श्रुतस्यैव सम्यक्त्वात् प्रकृतशाब्दबोधसमानाकारकप्रत्यक्षेत्यादि पूर्व्वोक्तस्याविवक्षितत्वादित्याहुस्तच्चिन्त्यम्०। ननु साजात्यघटके पदार्थवैशिष्ट्यं परित्यज्य संसर्गित्ववैशिष्ट्यपर्य्यन्तानुशरणस्य निःप्रयोजकत्वमिति चेन्न एकघटसत्त्वदशाया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्र घटोस्तीत्यस्याप्रामाण्यप्रसङ्गात्तथाहि स्वसमभिव्याहृतपदार्थस्य एतादृशनिरूपिताधेयत्वस्य कालिकादिसम्बन्धेन देशान्तरस्थित-घटसाधारणतया तद्विशिष्टघटत्वव वृत्तिभेदप्रतियोगितानवच्छेदकै-कत्वस्याप्रसिद्धत्वादतस्तदुपादानं, न च तदुपादानेपि कालिकादौ संसर्गत्वं चास्त्येव तदादायोक्तस्वदवस्थ एवेति वाच्यं संसर्गित्व-स्याकाङ्क्षाप्रयोज्यत्वार्थकत्वादिति वैशिष्ट्यघटकस्वाधिकरणस्या-काङ्क्षाप्रयोज्यत्वसम्बन्धेन निवेशात्कथं जातावेकत्वविवक्षया स-मथनमिति चेन्न घटपदस्य घटत्वविशिष्टे लक्षणामभ्युपेत्य समर्थनी-यत्वात् स्वाश्रयघटत्ववत्तासम्बन्धेन घटे एवैकत्वस्यान्वयतात्प-र्य्यात् अत्राप्यन्यत्सर्व्वं सम्पन्नोव्रीहिरित्युक्तदिशा ग्राह्यम् ॥ न च बहुघटसत्वदशायां घटोस्तीत्यत्रैकत्वविवक्षया न किंचिदपि फलं सजातीयघटान्तराव्यवच्छेदकत्वादिति वाच्यं यदा एक-स्थानान्मैत्रः स्वकीयमन्यद्धनं गृहीत्वा स्थानान्तरङ्गतस्तदा भोचै-त्र तत्र तव किमस्ति इति मैत्रप्रश्नानन्तरमुक्तं घटोस्ति घटसत्वे तादृ-शप्रयोगः न तु घटपटोभयसत्वदशायामपि तादृशप्रयोगस्तथाच प-टसत्वनिराशार्थमेकवचनप्रयोगः ॥ तथाचात्र चैत्रस्वत्ववत् घट-विषयकधीर्म्मैत्रस्य भवत्वेवेति एवञ्च न च पूर्व्ववदत्रापि स्वसमभि-व्याहृतपदार्थसंसर्गित्वविशिष्टघटत्वस्य पटादावसत्वेन पटस्य सा-जात्यानन्तर्गतत्वादिति वाच्यं ॥ अस्योत्तरयुक्तमधस्तादिति दि-क् । यद्यप्युक्तरूपेण साजात्यं यागान्तरकरणपशुसाधारणन्तत्त-द्यागकरणत्वञ्च'न समभिव्याहृतपदार्थस्तेन रूपेण पदानुपस्थितेः ॥ तथापि स्वाश्रयनिष्ठभेदप्रतियोगि पशुकरणकत्वस्वाश्रयपशुकरण-कत्वोभयसम्बन्धेनैकत्वस्य यागेऽन्वयोपगमान्नानुपपत्तिरिति ध्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यम्। इत्यादि गादाधरी "अथात्र" संख्यायाः प्रकृत्यर्थेऽन्वयस्य सर्व्वानुभवसिद्धस्य विलयप्रसङ्ग इति चेन्न॥ अत्र मैथिलाः एकवचनस्यैकत्वत्वावच्छिन्नार्थकत्वमेव परन्तु प्रकृते एकत्वस्य स्वाश्रयत्वस्वनाश्रयपशुकरणयागकरणत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वोभयसम्बन्धेन एकत्वान्वितपशुकरणत्वान्वयबोधसाकाङ्क्षत्वमेकवचनान्तस्याभ्युपगमाद्नुपपत्तिविरहात्। एवं सम्पन्नो व्रीहिरित्यादौ स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वस्वाश्रयाश्रयभिन्नो यः प्रयोक्तृस्वत्ववान्तद्वृत्तिसम्पन्नत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वोभयसम्बन्धेन एकत्वप्रकारकव्रीहिविशेष्यकान्वयबोधे एकवचनसाकाङ्क्षत्वाभ्युपगमात्॥ यवव्रीह्युभयसम्पत्तिस्थले सम्पन्नौ व्रीहियवौ इत्येव प्रयोगो न तु सम्पन्नो व्रीहिरिति॥ एवं बहुतरघटसत्वदशायां घटोस्तीत्यादावपि स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वस्वाश्रयाश्रयभिन्नवृत्तिसमभिव्याहृतपदार्थसंसर्गित्वविशिष्ट तात्पर्य्यविषयप्रयोक्तृस्वत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वोभयसम्बन्धेन एकत्वप्रकारकघटविशेष्यकान्वयबोधे एकवचनस्य साकाङ्क्षत्वाभ्युपगमान्न प्रयोक्तृस्वत्ववत्पटादिस्वत्वस्थले पटोस्तीति वाक्यं प्रमाणमित्याहुः॥ (अथ नीलस्य घट) इत्यादावुपस्थित्यादिकारणसमवधानसम्भवादित्यारभ्यकार्य्यतावच्छेककोटौ कारणाव्यवहितोत्तरत्वनिवेशान्नोक्ताकाङ्क्षाज्ञानयोः परस्परबोधे व्यभिचार इति "गादाधरो"। ननु कार्य्यतावच्छेदककोटौ विषयानिवेशपक्षे निरुक्ताकाङ्क्षाजन्यशाब्दः किञ्चिद्धर्म्मावच्छिन्नविशेष्यककिञ्चिद्धर्म्मावच्छिन्नविधेयक स्तत्र नियामकाभावादिति चे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्न योग्यताज्ञानस्यैकविधस्य सहकारिणः कार्य्यतावच्छेदककोटौ विषयविशेषस्य निवेशात् सहकारिफलनिश्चयादेव आकाङ्क्षायाः फलनिश्चयसम्भवादिति "मैथिलाः" ॥ (अथ अभेदो यदि) भेदत्वावच्छिन्नाभावस्तदाऽप्रसिद्धिः इति "गादाधरी" अथ घटभेदत्वावच्छिन्नप्रतियोगिताकत्वभेदत्वोभयधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य तादृशस्य पटादौ प्रसिद्धतया कथमप्रसिद्धिरित्युक्तमिति० । न च यदि भेदत्वमात्रावच्छिन्नप्रतियोगिताकाभावोऽभेदस्तदाऽप्रसिद्धिरित्यर्थ इति वाच्यम्० । भेदत्वेन घटाभावस्य तादृशस्य प्रसिद्धत्वात् कथमप्रसिद्धमिति,, न च भेदत्वमात्रावच्छिन्नभेदप्रतियोगिताकाभावस्य तथात्वेऽप्रसिद्धिरिति वाच्यम् । भेदत्वेन भेदघटोभयाभावस्य तादृशस्य प्रसिद्धत्वात् ०। न च भेदत्वमात्रावच्छिन्नभेदमात्रवृत्तिप्रतियोगिताकाभावस्य तथात्वेऽप्रसिद्धिरिति वाच्यम् भेदत्वेन तावद्भेदाभावस्य तादृशस्य प्रसिद्धत्वान्न च भेदत्वमात्रावच्छिन्नभेदत्वव्यापकप्रतियोगिताकाभावस्य तथात्वेऽप्रसिद्धिरिति वाच्यम् । पूर्वोक्तोभयाभावस्य तादृशस्य प्रसिद्धत्वात्० । न च भेदत्वेन भेदत्वसमनोयतप्रतियोगिताकाभावस्य तथात्वेऽप्रसिद्धिरिति वाच्यं,, भेदत्वेन तद्भेदतद्भेदभिन्नभेदोभयाभावस्य भेदत्वेन यावद्भेदाभावस्य वा तादृशस्य प्रसिद्धत्वादिति चेन्न । भेदत्वगतैकत्ववृत्तिप्रतियोगिताकाभावस्य तथात्वेऽप्रसिद्धिरिति परमार्थः "वृत्तित्वञ्च,, स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्व, स्वनिरूपकानुयोगितानिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वोभयसम्बन्धेन स्वं प्रतियोगिता "तथा च"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरुक्तोभयसम्बन्धेन भेदत्वगतैकत्ववृत्तिप्रतियोगित्वप्रसिद्ध्या तन्निरूपकाभावस्य सुतरामप्रसिद्धत्वात्०। ननु संयोगसम्बन्धावच्छिन्नभेदत्वावच्छिन्नप्रतियोगितायास्तादृशतया तन्निरूपकाभावस्य प्रसिद्धत्वादिति चेन्न निरुक्तोभयसम्बन्धेन भेदत्वगतैकत्ववृत्तिस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य तदर्थत्वेऽप्रसिद्धिरित्यस्य पर्य्यवसितार्थत्वात् न च स्वरूपसवायाद्युभयसम्बन्धावच्छिन्नप्रतियोगिताकभेदसामान्याभावस्य प्रसिद्धत्वादिति वाच्यं, स्वरूपत्वेतरधर्म्मानवच्छिन्नसंसर्गताकभेदत्वावच्छिन्नप्रतियोगिताकाभावस्य तदर्थतयाऽप्रसिद्धिसम्भवात्०। (अथ अभेदो यदि भेदत्वावच्छिन्नाभावस्तदाऽप्रसिद्धिरित्यस्य कोऽर्थः) प्रसिद्धत्वाभाववान् भेदत्वावच्छिन्नाभावस्य च न संभति० निरुक्तरीतया भेदत्वावच्छिन्नाभावस्यालीकतयाऽधिकरणाप्रसिद्धिरिति चेन्न स्वरूपसंसर्गमात्रावच्छिन्नप्रतियोगितायान्निरुक्तोभयसम्बन्धेन भेदत्वगतैकत्ववृत्तित्वाभावस्य निष्कृष्टार्थत्वान्नासंगतिः० । संयोगसंसर्गावच्छिन्नप्रतियोगितायां भेदत्वगतैकत्ववृत्तित्वस्य प्रसिद्धतया तदभावस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगितायां सत्वान्न काप्यनुपपत्तिरिति दिक् ॥*॥

न च निरुक्तोभयसम्बन्धेन भेदत्वगतैकत्वप्रसिद्धिरिति वाच्यं,, भेदत्वगतैकत्वाभावस्य निरुक्तोभयसम्बन्धावच्छिन्नस्वनिरूपितवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकस्य व्यधिकरणसम्बन्धावच्छिन्नाभावस्य तदर्थस्य प्रसिद्धत्वात् यदि च निरुक्तसम्बन्धस्य वृत्त्यनियामकतया तत्संवन्धावच्छिन्नत्वस्य प्रतियोगितायामसत्वान्न दोष इत्युच्यते तदा निरुक्तोभयसंबन्धावच्छिन्नभेदत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतैकत्ववृत्तित्वप्रकारतानिरूपितविशेष्यत्वाभावस्य प्रमेयविशेष्यताप्रतियोगिकस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकस्य प्रसिद्धत्वात्० प्रमेयविशेष्यतायास्तथाभिधतया तदभावस्य केवलान्वयित्वात्० महीरुहङ्गच्छति नाभावमिति प्रयोगानुरोधेन वृत्तिनियामकसंबन्धाभावप्रतियोगितावच्छेदकत्वस्यावश्यमभ्युपगमादित्यग्रे स्वयमेव स्पष्टमभिधानाच्चेति० । एवं नीलपटपरनीलशब्दघटितनीलो घट इति वाक्यस्यापि प्रामाण्यापत्तिः० नीलत्वादिना नीलपटादिभेदाभावस्य नीलघटे सत्वादिति गादाधरी० ननु नीलस्य नीलावच्छिन्नपरतया नीलभेदाभावस्य च नीलगुणस्वरूपतया तस्य नानात्वात् परिनिष्ठनीलस्य नीलघटादौ बाधान्न प्रामाण्यापत्तिरिति चेन्न एकधर्म्मावच्छिन्ननिरूपकत्वस्यैक्यमते नीलत्वावच्छिन्नपटगतनीलनिष्ठनिरूपकत्वस्य घटगतनीलनिष्ठनिरूपकत्वस्य चैक्यतया निरुक्तवाक्यजन्यबोधे तन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वरूपस्य प्रामाण्यसत्वेन तज्जनकवाक्ये प्रामाण्यस्य निराकरणायोगात् वस्तुतस्तु पटपरद्रव्यशब्दघटितद्रव्यं घट इति वाक्यस्य प्रामाण्यापत्तिः । द्रव्यत्वात्मकस्य द्रव्यभेदाभावस्य घटे सत्वेन तज्जन्यबोधस्य प्रमात्मकबोधजनकस्वरूपस्य वाक्यनिष्ठप्रामाण्यस्याक्षतत्वादिति० ॥ S. S. J.

अभेदस्तादात्म्यन्तच्च स्ववृत्त्यसाधारणोधर्म्मः । "असाधारणत्वञ्च" एकमात्रवृत्तित्वं "एकमात्रवृत्तित्वञ्च" स्वप्रतियोगिवृत्तित्व, स्वसामानाधिकरण्योभयसंबन्धेन भेदविशिष्टयँत्तदन्यत्वमिति गादाधरी० । अत्र भेदत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । तादात्म्यं चेति रीत्या आत्माश्रयेत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दि दोषप्रसङ्ग इति० न च निरुक्तोभयसंवन्धेनाभावविशिष्टान्यत्वमेव तदिति वाच्यम् "अभावत्वश्च" द्रव्यादिघटकान्योन्याभावत्वं "तत्रापि" अन्योन्याभावत्वं किमित्यादिरीत्या तद्दोषाक्रान्तत्वादेवमभावपदेन तद्व्यक्तिर्नास्तीति प्रतीतिसाक्षिकाभावस्यापि धर्त्तुं शक्यतया तत्सामानाधिकरण्यस्य तत्प्रतियोगिवृत्तित्वस्य च तद्व्यक्तित्वे सत्वात्स्वस्मिन् स्वात्यन्ताभावसत्वाद्विशिष्टान्यस्याप्रसिद्धत्वात्० । न चात्यन्ताभावविशिष्टान्यत्वस्य विवक्षितत्वाद्वैशिष्ट्यं च स्वसमानाधिकरणवृत्तित्व, स्वप्रतियोगिवृत्तित्वोभयसंवन्धेनेति नात्माश्रयासिद्ध्योरवकाश इति वाच्यम्" अत्यन्ताभावत्वं तदा तत्संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वं अत्र भेदव्युदासाय संसर्गस्तादात्म्यभिन्नो ग्राह्यः । "तथाच" तादात्म्यं स्ववृत्यसाधारणो धर्म्म इत्यादिना आत्माश्रयतादवस्थ्यादिति चेन्न,, भेदत्वन्तादात्म्यसंवन्धावच्छिन्नप्रतियोगिताकाभावत्वं (अनुयोगिताविशेषो वेत्यन्यदेतत् ॥) उक्तदोषभियैव जगदीशेन सिद्धान्तलक्षणे,, अनुयोगिताविशेषो वेत्युक्तं " तथा च" भेदत्वमनुयोगिताविशेष इति उक्तदोषावकाशाभावादिति ध्येयम्० अथ तद्व्यक्तिरेतद्व्यक्तिरेतदुभयभेदस्य वैशिष्ट्य तद्व्यक्तित्वे सत्वादुभयभेदस्य केवलान्वयित्वाद्विशिष्टान्यधर्म्माप्रसिद्धिरिति० न च स्वसामानाधिकरण्यस्वप्रतियोगिताव्याप्यत्वोभयसंवन्धेन वैशिष्ट्यस्य विवक्षितत्वात्० "तद्व्यक्तित्वे उभयनिष्ठप्रतियोगिताव्यापकत्वविरहेण विशिष्टान्यत्वस्य सत्वान्न दोष इति वाच्यम्० द्रव्यत्वादेरपि निरुक्तसाधारणधर्म्मपदेनेदानीं धर्त्तुं शक्यतया पटपरद्रव्यशब्द शब्दघटितद्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यं घट इति वाक्यस्याप्रामाण्यापत्तेस्तथाहि घटादिभेदस्य घटत्वाभावस्य चैकतया घटादिभेदप्रतियोगित्वस्य घटत्वादावपि सत्वेन तत्र द्रव्यत्वस्यासत्वेन प्रतियोगिताव्यापकत्वसम्बन्धावरहेण घटादिभेदविशिष्टान्यत्वस्य च द्रव्यत्वे सत्वादिति० न च स्वप्रतियोगिताव्यापकत्वेत्यनेन स्वनिरूपितभेदत्वनिरूपकप्रतियोगिताव्यापकत्वस्य विवक्षितत्वात् घटत्वनिष्ठप्रतियोगिताया मत्यन्ताभावत्वनिरूपितत्वसत्वेन भेदत्वनिरूपकत्वविरहान्न व्यापकत्वस्य-द्रव्यत्वयिशिष्टहानिरिति वाच्यम्" अभावप्रतियोगिकाभावाधिकरणकाभावस्याधिकरणकस्वरूपतानायि घटभेदस्य घटभेदविष्टपदभेदाभेदस्य चैक्यात्० घटादिभेदनिरूपितप्रतियोगित्वस्य पटभेदे सत्वेन व्यापकत्वस्य द्रव्यत्वे विरहेणोक्तातिप्रसङ्गतादवस्थ्यात्० पटभेदप्रतियोगितायां च भेदत्वनिरूपकत्वं स्यादिति चेन्न यत्किञ्चित्प्रतियोगितानिरूपितभेदवृत्त्यनुयोगिताविशिष्टान्यत्वस्य विवक्षितत्वाद्वैशिष्ट्यं च स्वाश्रयसामानाधिकरण्य, स्वनिरूपितप्रतियोगिताव्यापकत्वोभयसंबन्धेन तथा च घटत्वादिभेदत्वाख्यानुयोगितानिरूपितत्वस्य पटादिभेदभेदीयप्रतियोगितायां विरहेणातिप्रसङ्गविरहात् न च तद्व्यक्तित्वेपि तादृशविशिष्टान्यत्वासम्भवस्तथाहि० नीलघटनिष्ठतद्व्यक्तित्वे नीलघटभेदनिष्ठोयःपटभेदभेदस्तस्यापि तदात्मकत्वेन नीलघटभेदत्वाश्रयतया तदधिकरणतापटभेदभेदत्वे सत्वेन स्वाश्रयसामानाधिकरण्यस्यापि सत्वादिति वाच्यम्० स्वावच्छिन्नाधिकरणवृत्तित्वस्य प्रथमसंबन्धेन विवक्षितत्वान्न दोषः । अथ स्वावच्छिन्नभेदस्य स्वस्वरूपतया घटभेदत्वाख्यानुयोगितानिरूपितत्वस्य घटनिष्ठप्रतियोगित्ववत्० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटभेदभिन्ननिष्ठप्रतियोगितायां घटभेदभेदाभावस्य घटभेदत्वस्वरूपतया तदीयप्रतियोगितायां च सत्वेन द्रव्यत्वे व्यापकत्वविरहेणातिप्रसङ्गताद(१)वस्थ्यादिति चेन्न स्वनिरूपितत्व,स्वनिष्ठानुयोगितत्वानिरूपितत्वोभयसंबन्धेन स्वविशिष्टप्रतियोगिताव्यापकत्वस्य द्वितीयसंबन्धेन विवक्षितत्वान्न कोपि दोषः०। किञ्च स्वसामानाधिकरण्य, स्वीययत्किञ्चित्प्रतियोगिताव्यापकत्वोभयसंन्धेन भेदविशिष्टान्यत्वस्य यथाश्रुतस्यैव सम्यक्त्वात्प्रतियोगिभेदेन प्रतियोगितायाः भेदे मानाभावस्तथाचोभयभेदमादायासम्भवान्यप्रतियोगितातिप्रसङ्गयोरनवकाशादिति भावनीयम्०। "केचित्तु" प्रतियोगिवृत्तिभेदविशिष्टान्यत्वस्य विवक्षितत्वादुभयभेदमादायासम्भवाभावादिति०। न च प्रतियोगित्वस्य केवलान्वयितया वृत्तिमति प्रतियोगिवृत्तित्वस्य सम्भव इति वाच्यम्। स्वप्रतियोग्यवृत्तित्वस्यैव निवेशनीयत्वान्न च स्वस्वस्यानुगतत्वाननुगतत्वशङ्काकवलितत्वादिति वाच्यम्०। स्वस्वप्रतियोगिवृत्तयो ये ये भेदास्तत्तद्भेदकूटत्वच्छेदविशिष्टान्यत्वस्याविवक्षितत्वान्नच सर्वज्ञस्य तादृशभेदकूटज्ञानाभावात्तादृशनिवेशासम्भव इति वाच्यम्०। स्वनिरूपकत्व,,स्वसामानाधिकरण्योभयसंन्धेन प्रतियोगिताविशिष्टान्यत्वस्य विवक्षितत्वान्न दोप इति यत्तु व्यासज्य-

(१) यैव घटभेदत्वाख्यानुयोगिता स एव घटभेदत्वाख्यानुयोगितावद्भिन्नभेदः। एवं घटभेदाभावः। एवं च तदीयप्रतियोगितायां घटभेदत्वाख्यानुयोगितानिरूपितत्वसत्वात्०। इतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिधर्म्मावच्छिन्नप्रतियोगिताकभेदविशिष्टान्यत्वमेव ग्रन्थकृतोभिप्रेतमिति तन्न तद्व्यक्तित्वेन तद्व्यक्तिगगनोभयभेदादिकमादाय सम्भववारणस्यासम्भवादिति । वस्तुतस्तु एकत्ववृत्तिप्रतियोगिताकभेदविशिष्टान्यत्वमेव तत् "प्रतियोगितायामेकत्ववृत्तित्वं च" स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्व, स्वनिरूपकानुयोगितानिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वोभयसंबन्धेन स्वं प्रतियोगिता तथाचोभयभेदादिप्रतियोगितायामेकत्ववृत्तित्वविरहेण तेषां धर्तुमशक्यत्वात्० । तद्व्यक्तिभेदीयप्रतियोगितायां चैकत्ववृत्तित्वसत्वेन तेषां धर्त्तुं शक्यतया तद्विशिष्टत्वस्य द्रव्यत्वादौ तद्विशिष्टान्यत्वस्य च तद्व्यक्तित्वादौ सत्वेनेति प्रसङ्गाप्रसङ्गयोरभावादिति । अथ नीलनिष्ठतद्व्यक्तित्वे पटभेदसामानाधिकरण्यस्य तादात्म्येन स्ववद्भिन्नभेदानतिरिक्ततया स्वनिरूपितस्ववद्भिन्ननिष्ठप्रतियोगिताश्रयवृत्तित्वस्य सत्वेन निरुक्तोभयसंबन्धेन भेदविशिष्टत्वस्य सत्वेन भेदविशिष्टान्यत्वस्याप्रसिद्ध्या नीलो घट इति वाक्यस्याप्रामाण्यं स्यादिति चेन्न किञ्चित्प्रतियोगितानिरूपकभेदवृत्त्यनुयोगिताविशिष्टान्यत्वस्य विवक्षितत्वात्०। "वैशिष्ट्यं च" स्वाश्रयसामानाधिकरण्य, स्वनिरूपितप्रतियोगिताश्रयवृत्तित्वोभयसम्बन्धेन,० स्वमत्वानुयोगिता न च स्ववद्भिन्नभेदत्वाख्यानुयोगिता विशिष्टत्वस्यैव तद्व्यक्तित्वे सत्वात्तथाहि । स्वाश्रयीभूतपटभेदसामानाधिकरण्यस्य स्वनिरूपिततादात्म्येन यःपटभेदवान्तद्भिन्ननिष्ठप्रतियोगिताश्रयवृत्तित्वस्य एव सत्वादसम्भवस्तादवस्थ्य एवेति वाच्यं स्वावच्छिन्नाधिकरणवृत्तित्वस्य प्रथमसंबन्धेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षिततत्वात्तथाच पटभेदव्यक्तिमद्भिन्नभेदत्वावच्छिन्नाधिकरणत्वस्य नीलघटे बाधान्नाप्रसिद्धिरिति० न च घटभेदनिष्ठतद्व्यक्तित्वे घटभेदत्वावच्छिन्नाधिकरणघटभेदभेदवृत्तित्वस्य घटभेदत्वनिरूपितायां घटभेदभेदाभावीयप्रतियोगितासामानाधिकरण्यस्य सत्वेन भेदविशिष्टान्यत्वविरहात्० । घटभेदभेदः प्रमेयः एवन्तादृशभेदो ऽभाव इत्यादेः प्रामाण्यापत्तेरिति वाच्यम् । अनिरूपितत्व,,स्वनिष्ठानुयोगित्वानिरूपितत्वोभयसम्बन्धेन स्वविशिष्टप्रतियोगितासामानाधिकरण्यस्य द्वितीयसंबन्धेन विवक्षिततत्वात्तथा च, घटभेदत्ववृत्तिघटभेदभेदाभावत्वनिरूपितस्यैव तादृशप्रतियोगितायां सत्वेनानिरूपितत्वविरहान्नोभयसंबन्धेन घटभेदत्वविशिष्टत्वं निरुक्तप्रतियोगितायामपितु घटनिष्ठप्रतियोगितायामेवेति तत्सामानाधिकरण्यस्य घटभेदभेदनिष्ठतद्व्यक्तित्वे विरहेणाप्रसिद्धिविरहादिति० । न च घटभेदभेदत्वघटनिष्ठप्रतियोगित्वान्यतरवतः स्वरूपसंबन्धेनाभावस्य लाघवेन घटभेदत्वस्वरूपतया घटभेदत्ववृत्तितादृशान्यतरावच्छिन्नप्रतियोगिताकाभावत्वाख्यानुयोगितानिरूपितत्वस्यान्यतरावच्छिन्नप्रतियोगितायां सत्वेनानिरूपितत्वविरहेणोभयसंबन्धेनानुयोगिताविशिष्टत्वस्याप्रसिद्ध्या संबन्धघटकस्वविशिष्टप्रतियोगित्वाप्रसिद्ध्याऽसम्भवप्रसङ्गादिति वाच्यम्० । स्ववृत्त्यनुयोगितात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतासाक्षादवच्छेदकत्वस्य वृत्त्यनुयोगितानिरूपकतानिरूपितनिरूप्यत्वावच्छेदकत्वोभयसंबन्धे स्वविशिष्टं यत्किञ्चिद्धर्म्मावच्छिन्नप्रतियोगितात्वं तदवच्छेदकतात्वावच्छिन्नसामानाधिकरण्यस्य द्वितीयसंबन्धेन विवक्षिततत्वात् "त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाच" प्रकृते तादृशनिरूप्यतावच्छेदकत्वं अन्यतरावच्छिन्नप्रतियोगितात्वे एवास्ति न तु घटत्वावच्छिन्नप्रतियोगितात्वे, इति । तादृशनिरूपकतावच्छेदकत्वस्य तत्र सत्वान्नाप्रसिद्ध्यवकाश इति (अन्यत्सर्वं स्वयमूह्य०) अथ स्वाश्रयाधेयतासंबन्धेन स्वस्मिन्ननुयोगिताकाङ्क्षाविरहेण भेदविशिष्टान्यवान् प्रमेय इत्यस्याप्रामाण्यं स्यात्प्रत्ययार्थे भेदविशिष्टान्यधर्म्मे प्रकृत्यर्थस्य भेदविशिष्टान्यधर्म्मवतोरनन्वयादिति० । न च तत्र वतुप्रत्ययेन संबन्ध्युल्लेखात्० । भेदविशिष्टान्यधर्म्मसंबन्धिवृत्तिभेदविशिष्टान्यधर्म्मवान् प्रमेय इत्याकारकस्तत्राधिकावगाहिशाब्दबोधस्सम्भवादिति वाच्यम्० । भेदविशिष्टान्यः प्रमेय इत्यादावगत्यापत्तेरिति चेन्न यथा भेदविशिष्टान्यत्वे विशेषणविभक्तेः शक्तिस्तथा स्ववृत्तित्व, स्वभिन्नवृत्तित्वोभयसंबन्धेन वस्तुविशिष्टान्येपि शक्तिः स्वीक्रियते यथा च, प्रकृते भेदविशिष्टान्यवृत्तिवस्तुविशिष्टान्यधर्म्मवान् प्रमेय इत्याकारकः शाब्दबोधः सम्भवादिति न काप्यनुपपत्तिरिति अथ सर्व्वपरिष्कारेप्ययं पूर्वपक्षः । "तथाहि" प्रथमे तद्व्यक्तित्वे तद्व्यक्त्यात्मकप्रतियोगिवृत्तित्वस्य तद्व्यक्तिभेदाधिकरणपटादिनिरूपितकालिकादिसंबन्धावच्छिन्नवृत्तित्वस्य च सत्वेन भेदविशिष्टान्यत्वविरहादेवं रीत्या वस्तुविशिष्टान्यत्वस्य च विरहादसम्भवप्रसङ्गान्न च स्वरूपसंबन्धेनोभयवृत्तित्वस्य विवक्षितत्वान्न दोष इति "वाच्यम्" स्वरूपसंबन्धावच्छिन्नवृत्तित्वस्य द्रव्यत्वे विरहेण भेदविशिष्टान्यत्वस्य सत्वात्पटपरद्रव्यपदघटितद्रव्यं घट इति वाक्यस्य प्रामाण्यापत्तिरिति चेन्न,, स्वरूपसंबन्धेनैव विभक्त्यर्थस्य पदार्थान्तरान्वयसाकाङ्क्षत्वस्वीकारादापत्तिविर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हान्नच तथापि स्वाधिकरणनिरूपितप्रमेयत्वावच्छिन्नवृत्तित्वस्य प्रमेये सत्वेन तद्व्यक्तित्वे सत्वाद्भेदविशिष्टान्यधर्म्माप्रसिद्धिरिति वाच्यं, वृत्तितायां केवलान्वयिधर्म्मानवच्छिन्नत्वस्य विवक्षितत्वान्न दोषः॰। न च केवलान्वयित्वं वृत्तिमदत्यन्ताभावाप्रतियोगित्वं "अत्यन्ताभावत्वं च" सदातनससर्ग्गाभावत्वम्॰। संसर्गाभावत्वञ्च ससर्गारोपजन्यप्रतीतिविषयाभावत्वं॰ संसर्गस्तादात्म्यभिन्नो ग्राह्य स्तादात्म्यञ्च, स्ववृत्यभावसाधारणोधर्म्म इत्याद्युक्तरीत्यान्योन्याश्रयप्रसङ्ग इति वाच्यम्॰। स्वाधिकरणनिरूपितवृत्तितायामुभयवृत्तिधर्म्मावच्छिन्नत्वस्य निवेशादेव प्रमेयत्वावच्छिन्नवृत्तितामादायोक्तदोषवारणसम्भवादिति॰ वस्तुतस्तु स्वप्रतियोगिविशिष्टवृत्तितावत्व"स्वाधिकरणविशिष्टवृत्तितावत्वोभयसंवन्धेन भेदविशिष्टत्वस्य विवक्षितत्वाद्वैशिष्टयञ्चोभयत्व स्वनिरूपितत्व, स्वभिन्नानिरूपितत्वोभयसंवन्धेन प्रथमस्वपदस्प्रतियोगितापरं द्वितीयञ्च स्वपदमधिकरणपरं "तथाच" प्रमेयत्वावच्छिन्नवृत्तितायां वस्तुद्वयनिरूपितत्वसत्वेन निरुक्तोभयसंवन्धेन प्रतियोगिताविशिष्टत्वस्याधिकरणविशिष्टत्वस्य चाभावान्नतदादायासंभवावकाश इति ॥*॥ अथ वस्तुतःस्थित्यादिकल्पे कपि संयोगवन्निष्ठतत्तद्व्यक्त्यवच्छिन्नप्रतियोगिताकभेदस्याव्याप्यवृत्तितया तत्प्रतियोगिवृत्तित्वस्य मूलावच्छेदेन तत्सामानाधिकरण्यस्य च सत्वात्तन्निष्ठतद्व्यक्तित्वे भेदविशिष्टान्यत्वस्य विरहेण कपिसँय्योगी वृक्ष इति वाक्यस्याप्रामाण्यं स्यादिति। चेन्न,, तद्व्यक्तेः स्वरूपतो भानानभ्युपगमान्निरुक्तोभयसंवन्धेनैकत्ववृत्तित्वस्य तद्व्यक्त्यवच्छेदेन प्रतियोगितायां विरहेण निरुक्तभेद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य धर्त्तुमशक्यत्वात्तद्व्यक्तित्वस्य च व्याप्यवृत्तितया तदवच्छिन्नप्रतियोगिताकभेदस्य व्याप्यवृत्तित्वान्न दोषः । किञ्च स्वाधिकरणत्वस्य निरवच्छिन्नस्वरूपेण विवक्षितत्वान्न कोपि दोषः । पदमादधातीत्यलव्विँस्तरेणेति० ॥*॥ स्तोकं स्थीयते इत्यादौ भावाख्यान्तस्य वर्त्तमानार्थकत्वान्नच वर्त्तमानत्वाविवक्षायां द्वितीयानुपपत्तिरिति "वाच्यम्" वर्त्तमानत्वविवक्षास्थानेऽन्वयबोधप्रयोजकाकाङ्क्षाशालित्वेन, तदविवक्षास्थलेपि भावाख्यातस्यार्थकत्वादित्युक्तं गदाधरेण अथात्रत्वन्ययुक्त्याऽधिकरणार्थकघञ्स्थलीयान्वयबोधप्रयोजकाकाङ्क्षाशालित्वेन भावस्थलीयघञ्प्रत्ययस्य सार्थकत्वात्कथं स्तोकःपाक इति चेन्न,, धातुभिन्नार्थे प्रत्ययविधायकशास्त्रप्रयोज्यप्रत्ययान्तधातूपस्थाप्य क्रियाविशेषणानां कर्म्मत्वमित्यस्य विवक्षितत्वादधिकरणार्थकप्रत्ययविधायकशास्त्रप्रयोज्यत्वस्य भावार्थकप्रत्यये विरहाद्वर्त्तमाने लडिति शास्त्रेण स्थीयते इति प्रत्ययस्य सम्पत्तितया वर्त्तमानत्वविवक्षाऽविवक्षा एतदुभयत्र तादृशशास्त्रप्रयोज्यत्वस्य सत्वान्न कोपि दोषः । ननु तदुत्तरमनुमितौ मानसज्ञाने वा इत्यत्रोत्तरमिति द्वितीया न स्यात्० ॥ अनुपूर्वकमाधातोःक्तिन्प्रत्ययस्य भावार्थकत्वादिति० । ज्ञाधातूत्तरल्युट्प्रत्ययस्य भावार्थकत्वाच्चेति चेन्न,, भावविहितक्तिन्प्रत्ययस्य स्त्रीत्वार्थकत्वेन सार्थकत्वात्० । ज्ञाधातूत्तरल्युट्प्रत्ययस्य करणाधिकरणयोश्चेत्यनेन सार्थकत्वादिति दिक्० ॥ तदर्थबोधकपदोत्तरविभक्त्या संख्यान्वयबोधने अभेदसम्बन्धावच्छिन्नप्रकारताभिन्नतदर्थविषयताशालिशाब्दबोधसामग्र्यपेक्षितेत्युक्तम्भट्टाचार्य्येण ननु वेदाःप्रमाणमित्यत्र प्रमाणे कथमेकत्वसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यान्वयबोधः प्रमाणपदार्थनिष्ठविषयतायामभेदसम्बन्धावच्छिन्नप्रकारताभिन्नत्वविरहादिति चेन्न,, तदर्थकपदोत्तरविभक्त्या साक्षात्संबन्धेन संख्यान्वयबोधने इत्युक्तावन्वयबोधसम्भवात्० स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वात्मकपरम्परासंबन्धेनैकत्वस्य प्रमाणेन्वयो न तु साक्षात्समवायादिसंबन्धेन यद्वाऽभेदसंबन्धावच्छिन्नतदर्थनिष्ठप्रमाणत्वावच्छिन्नप्रकारताभिन्नस्य प्रमाणत्वनिष्ठविषयतायां सत्वेन तच्छालिशाब्दसामग्र्यास्तत्र सत्वात्०। तदर्थत्वस्य तदर्थतदर्थतावच्छेदकसाधारणत्वादित्यादिकमूहनीयमिति दिक्० ॥ अथात्र नीलो घट इत्यादौ नीलपदोत्तरविभक्त्या संख्यान्वयबोधने नीलपदार्थभिन्नघटनिष्ठविशेष्यतायान्नीलपदार्थनिष्ठत्वस्य तत्प्रकारताभिन्नत्वस्य च सत्वेन तन्निरूपकबोधसामग्र्याः प्रयोजिकायाः सत्वेन कथं नीलपदार्थे नैकत्वस्यान्वय इति चेन्न,, तदर्थनिष्ठेत्यस्य तदर्थतावच्छेदकधर्म्मावच्छिन्नेत्यर्थः ॥ तथा च घटविशेष्यताया घटत्वावच्छिन्नत्वमेवास्ति नत्वन्यधर्म्मावच्छिन्नत्वमिति तादृशप्रयोजकत्वविरहान्नापत्तिरिति० न च नीलो घटः घटो द्रव्यमिति वाक्यद्वयजन्यबोधे द्रव्यविशेषणतापन्ने घटे कथं नैकत्वान्वयः तादृशसामग्र्याः सत्वादिति वाच्यं तत्पदोत्तरविभक्त्या तत्पदार्थतावच्छेदकधर्म्मावच्छिन्नविशेष्यकसंख्यान्वयबोधने तत्पदप्रयोज्या या तदर्थतावच्छेदकीभूततद्धर्म्मावच्छिन्नाभेदसंबन्धावच्छिन्ना प्रकारताभिन्नविशेष्यता तन्निरूपकसामाग्र्या अपेक्षितत्वात् ॥ नीलविशेष्यतापन्ने घटे एव एकत्वान्वयो न तु विशेषणतापन्ने घटेपोति ध्येयम्० ॥ प्रमाणत्वे एकत्वान्वयोपगमे तु तदर्थबोधकपदोत्तरविभक्त्या स्तदर्थनिष्ठ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेष्यतानिरूपितसंख्यानिष्ठप्रकारताशालिबुद्धिं प्रति तादृशसामग्र्या अपेक्षितत्वं नह्यत्र पदार्थान्वयः किन्तु तदर्थतावच्छेदके एव तथा च कार्य्यतावच्छेदकानाक्रान्तत्वादिति ॥ स्वाधीनेऽपि कलत्रे नीचः परदारलम्पटोभवति सम्पूर्णेऽपि तडागे काकः कुम्भोदकं पिबति । जीवनग्रहणे नम्राः ॥*॥ अभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिः ॥ घटो घट इत्यादि अथ नीलघटो घटः दण्डवान्रक्तदण्डवान् इत्यादौ तादृशबोधस्य प्रसिद्धिः विधेयकोटावधिकावगाहिनः शाब्दबोधस्य नवीनै रुपगमादिति चेत्तर्हि घटाद्यंशे विशेष्यतावच्छेदकविधया नीलादिभाननियामकनीलाद्युपस्थितितात्पर्य्यज्ञानविशेषादिघटितैव सामग्री घटत्वावच्छिन्नविशेष्यकघटत्वावच्छिन्नान्वयबोधप्रयोजिका तदभावादेव न घटो घट इत्यादौ तादृशापत्तिरित्यन्तं गदाधरेणोक्तं ॥ अथ घटत्वावच्छिन्नविशेष्यकघटत्वावच्छिन्नप्रकारताकान्वयबुद्धित्वात्मके सामान्यधर्म्मावच्छिन्नस्यापत्तेर्दुर्व्वारत्वान्नीलाद्युपस्थितेः पीतघटो घट इत्यत्रासत्वेनाप्रयोजकत्वादिति चेन्न ॥ नीलपीताद्युपस्थितिं विना तथाविधसामान्यधर्म्मावच्छिन्नस्यानुदयेन तथाविधबाधे घटत्वान्यधर्म्मप्रकारकोपस्थितिघटितसामग्र्याः प्रयोजकत्वोपगमात्" "न च" एकत्वाद्युपस्थिते सत्वात्तदापत्तेर्व्वज्रलेपत्वादिति वाच्यं, प्रातिपदिकपदजन्यत्वोपस्थितिविशेषणत्यादेकत्वाद्युपस्थितेर्ग्रहणासम्भवात् "यदि च" घटो घटः प्रमेयः पट इत्यादौ प्रमेयाद्युपस्थितेस्तथाविधस्य सत्वादुक्तदोषस्तदवस्थ इत्युच्येत तदा सामान्यधर्म्मावच्छिन्नोत्पत्तौ सामान्यघटितविशेषधर्म्मावच्छिन्नोत्पादकसामग्र्यपेक्षिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"अयम्भावः" । सामान्यधर्म्मावच्छिन्नोत्पत्तौ सामान्यधर्म्मवत्प्रसिद्धनिष्ठयत्किञ्चिज्जन्यतानिरूपितयावज्जनकताश्रयस्यापेक्षितत्वात्" प्रसिद्धनीलघटो घटः पीतघटो घटः शुक्लघटो घट इत्यादिजन्यबोधान्यतमजनकसामग्र्याः घटो घटः इत्यादावसत्वेनापत्तिविरहादिति दिक् ॥ ननु समवायसंबन्धस्यैव शाब्दबोधनिष्ठकार्य्यतावच्छेदकतया धर्म्मितावच्छेदकत्वस्य तदनवच्छेदकतया कथं द्रव्यत्वे शाब्दबोधस्य प्रसिद्धिरिति तटस्थशङ्कामाह धर्म्मितावच्छेदकताया इति ॥ तटस्थशङ्कान्निरस्यति द्रव्यत्वादिनिष्ठाया इत्यादिना "अयं भावः" कारणतावच्छेदकधर्म्मघटकप्रत्यासत्या इतरकारणसमवहितयोग्यताज्ञानं यत्र तत्र कार्य्यतावच्छेदकधर्म्मघटकप्रत्यासत्या कार्य्यस्योत्पत्तिरित्यपि नियमान्तरं तदवलेनापत्तिं प्रदर्शयति, कार्य्यतावच्छेदकसंबन्धताविरहेपीत्ति ॥ आपत्त्यभावं ज्ञापयति तस्या आत्मनिष्ठप्रत्यासत्त्येत्यादिना०। समूहालम्बनस्थलीयापत्तिं वारयति स्वजनकज्ञानीयवृत्तिप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासंबन्धेन हेतुतां स्वीकृत्येत्यनेनेति० ॥ अथ पदधर्म्मिकवृत्तिज्ञानजन्योपस्थितिस्थले त्वापत्तिस्तत्र तथाविधसंबन्धाभावादिति चेन्न, वाच्यत्वादिज्ञानस्यैव शाब्दबोधजनकत्वाभिप्रायेण तथा प्रतिपादनात् "केचित्तु" स्वविशिष्टप्रकारतासंबन्धेनोपस्थितेः कारणत्वात्० वैशिष्ट्यं च स्वजनकज्ञानीयवाच्यत्वात्मकवृत्तिप्रकारतानिरूपितविशेष्यतावच्छेदकतासामानाधिकरण्य स्वजनकज्ञानीयवाच्यत्वसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासामानाधिकरण्य स्वजनकज्ञानीयपदत्वावच्छिन्नविशेष्यतानिरूपितवाचकत्वनिष्ठप्रकारत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नविशेष्यतानिरूपितत्वसंबन्धावच्छिन्नप्रकारतावच्छेदकतासामानाधिकरण्य स्वजनकज्ञानीयवाचकत्वसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासामानाधिकरण्य स्वजनकज्ञानीयलक्ष्यत्वप्रकारतानिरूपितविशेष्यतावच्छेदकसामानाधिकरण्य स्वजनकज्ञानीयपदविशेष्यतानिरूपितलक्षकत्वप्रकारतावच्छिन्नविशेष्यतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासामानाधिकरण्य स्वजनकज्ञानीयपदत्वावच्छिन्नविशेष्यतानिरूपितलक्ष्यत्वसंबन्धावच्छिन्नप्रकारतावच्छेदकतासामानाधिकरण्यैतदन्यतमसंबन्धेनेत्याहुः ॥*॥ कार्य्यकारणभावं व्यभिचारं दर्शयति न च पदार्थेपीति॰ ॥ व्यभिचारं वारयति,, परामर्शकारणताविचारदर्शितदिशेत्यादिना॰ "अयम्भावः" विशेष्यत्वानवच्छिन्नत्वस्य निरवच्छिन्नत्वस्य वा प्रकारतायां निवेश्य व्यभिचारोवारणीय इति वस्तुतस्तु स्वजनकोपस्थितीयप्रकारताविशिष्टस्वीयप्रकारतासंबन्धेन शाब्दबोधं प्रति स्वजनकज्ञानीयवृत्तिप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासंबन्धेनोपस्थितिः "कारणम्" पदार्थे तादृशप्रकारताया असत्वेन व्यभिचारानवकाश इति॰ । घटत्वे आपत्तिवारयति इति चेत्तर्हि तद्धर्म्मावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधं प्रति तद्धर्मभेदस्यापि हेतुतायाः स्वीकरणीयतयेत्यादिना । अत्र कल्पे नीलघटो घट इत्याद्यन्वयबोधस्य प्रामाणिकत्वे घटत्वावच्छिन्नप्रकारतायां घटत्वान्यधर्म्मानवच्छिन्नत्वविशेषणदानेन सोप्युपपादनीय इत्युक्तं गदाधरेण तत्र नीलघटो नीलघट इति वाक्याद्बोधप्रसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गः नीलघटो घट इति वन्निरुक्तकार्य्यकारणभावानाक्रान्तत्वादुभयभेदस्य केवलान्वयितया नीलघटत्वोभयभेदस्य नीले घटत्वे च सत्त्वाच्च०। अथ वाचालाः तद्रूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकाभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्रूपभेदः कारणमित्युक्त्वा, तद्वारयन्ति० द्वित्वभेदस्य दित्वे बाधात्०। ननु द्वित्वस्य नानात्वेनैकद्वित्वभेदस्यापरद्वित्वे सत्वेन तद्दोषतादवस्थ्यमिति वाच्यम्, निरुक्तसंबन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्रूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकप्रकारताविशिष्टान्यत्वस्य कारणत्वात्० "वैशिष्ट्यं च" स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन 'तथा च, विनिगमनाविरहेण नीलघटत्वगतसकलद्वित्वे, तादृशपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य सत्वेन तथाविधप्रकारताविशिष्टान्यत्वविरहात्०। न च उद्देश्यां शेअधिकावगाहिशाब्दबोधस्याप्रामाणिकत्वं सर्वसम्मतमिदानीं नीलघटो घट इति वाक्यादपि शाब्दबोधः स्याद्घटत्वगतैकत्वभेदस्य नीलघटत्वगतद्वित्वे सत्वादिति वाच्यं स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकव्यापकत्वसंबन्धेन प्रकारताविशिष्टस्य विवक्षितत्वाद्घटत्वगतैकत्वव्यापकत्वस्य निरुक्तद्वित्वे सत्वेन तथाविधप्रकारताविशिष्टान्यत्वविरहात्०। ननु तथापि नीलसुन्दरः सुन्दरनील इत्यादावगतिः सुन्दरनीलत्वोभयत्वे नीलसुन्दरत्वोभयव्यापकत्वात्० इति चेन्न,, नीलसुन्दरत्वोभयस्मिन सुन्दरनीलत्वोभयत्वस्य विरहान्न व्यापकत्वावकाश इत्याहु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तच्चिन्त्यम् (मैथिलास्तु) नीलघटो घटनील इत्यस्य नापत्तिर्नीलत्वावच्छिन्नावच्छेदकताकाभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितावच्छेदकतासंबन्धेन शाब्दबोधे नीलत्वभेदः कारणमित्युक्त्यैव ग्रन्थकारोक्तप्रकारेण तद्वारणसम्भवात्० लाघवादाहुः । वस्तुतस्तु तद्धर्म्मान्यवृत्तिविषयतासंबन्धनेत्यादिना० । नन्वेतत्कल्पे घटोनघट इत्याद्यनुमितेः शाब्दबोधस्य च वारणायेत्युक्तं गदाधरेण तच्चासङ्गतं घटभेदव्याप्यस्य घटत्वस्य च विरुद्धतया परामर्शस्याहार्य्यत्वादनुमितिकारणस्यासत्वात्कथं तादृशानुमितेस्सम्भावनेति चेन्न,, भेदव्याप्यवान् घट इति परामर्शस्य घटभेदानुमितौ लाघवमिति लाघवज्ञानस्वीकृतस्यानुमितिजनकत्वात् निरुक्तपरामर्शस्यानाहार्य्यत्वाच्च० ॥ ※ ॥ अथ अन्यादृशप्रत्यक्षस्थलीयप्रतिबन्धकतया च न त्वन्मते(२)निर्व्वाह इत्यादिभट्टः अथात्र विषयतासंबन्धावच्छिन्नप्रतियोगिताकेच्छाभाव-

(२) टि० न च भवन्मतेपि राजस्वत्वाभाववान् पुरुषः सुन्दर इति प्रत्यक्षं प्रति घटपटाद्यनेकविषयकशाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनमावश्यकं एवञ्च मन्मतेपि सर्व्वासां शब्दसामग्रीणां राजस्वत्वाभाववान् पुरुषः सुन्दर इति प्रत्यक्षं प्रति स्वीयविषयताशून्यतादृशप्रत्यक्षेच्छाविरहविशिष्टशाब्दसामग्रीत्वेनैकरूपेणैव लाघवात्प्रतिबन्धकत्वं एवञ्च राज्ञः पुरुष इति शाब्दसामग्र्यामपि प्रतिबन्धकत्वावच्छेदकाक्रान्तत्वेन नाधिकप्रतिबन्धकताकल्पनं संसर्गतावादिनामिति वाच्यं यत्र शाब्देच्छाशाब्दसामग्री राजस्वत्वाभाववान् पुरुषः सुन्दर इति प्रत्यक्षेच्छाप्रत्यक्षसामग्री तत्र प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टभिन्नविषयकप्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्री प्रतिवन्धिकेत्युक्तौ नान्यस्येच्छाकालेऽन्यस्यापत्तिर्न्न वाननुगमः कथं गौरवोत्कोर्त्तनमिति न च भिन्नविषयकत्वस्याव्यावर्त्तकतया राज्ञः पुरुष इति प्रत्यक्षसामग्रीकाले राज्ञः पुरुष इति वाक्याच्छाब्दापत्तिः राजस्वत्वस्य पुरुषस्य च भिन्नतया तद्विषयकत्वस्य निरुक्तप्रत्यक्षे सत्वादिति वाच्यं शाब्दविशिष्टान्यप्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिवन्धकतेत्यस्य विवक्षितत्वान्निरुक्तप्रत्यक्षस्य निरुक्तशाब्दविशिष्टत्वेन प्रतिवध्यतावच्छेदकानाक्रान्तत्वान्नापत्तेरवकाशः वैशिष्ट्यं च,, स्वविशिष्टविशेष्यतानिरूपकत्वसंसर्गेण विशेष्यतायां स्ववैशिष्ट्यञ्च स्वीयप्रकारतावच्छेदकधर्म्मावच्छिन्नप्रकारतानिरूपितत्वस्वीयविशेष्यतावच्छेदकधर्म्मावच्छिन्नत्वोभयसंवन्धेन स्वमत्र शाब्दपरः न च तथापि घटवद्भूतलं राजस्वत्वाभाववान् पुरुषः सुन्दरः इत्यादि प्रत्यक्षादेः स्वसमानाकारकशाब्दविशिष्टत्वेन निरुक्तविशिष्टान्यत्वासम्भवात् तथा च राज्ञः पुरुष इति वाक्यज्ञानघटितशाब्दसामग्रीकाले स्वसामग्रीतः राजस्वत्वाभाववान् पुरुषः सुन्दर इति प्रत्यक्षापत्तिरिति वाच्यं, संसर्गतावादिनये स्वत्वसंवन्धावच्छिन्नराजत्वावच्छिन्नप्रकारतानिरू-

---

त्यक्षापत्तिभयेन शाब्देच्छाया उत्तेजकत्वं वाच्यं तच्च प्रत्येकमेवान्यशाब्देच्छासत्वेन प्रत्यक्षानुपपत्तिः एवञ्च संसर्गतावादिनां राज्ञः पुरुष इति शाब्देच्छाविरहविशिष्टराजस्वत्वाभाववान् पुरुषः सुन्दर इति प्रत्यक्षेच्छाविरहविशिष्टायाः शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनमधिकमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितपुरुषत्वावच्छिन्नविशेष्यताशून्यनिरुक्तेच्छाभावविशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति राज्ञः पुरुष इति वाक्यज्ञानघटितशाब्दसामग्री प्रतिबन्धिकेति "एवं प्रकारतावादिनये" राजस्वत्वविशिष्टपुरुषत्वावच्छिन्नविषयताशून्यतादृशविषयतासंबन्धावच्छिन्नेच्छाभावविशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति राज्ञः पुरुष इति वाक्यज्ञानघटितशाब्दसामग्री प्रतिबन्धिकेत्यनुगतसंभवादिति चेन्न, यत्र घटादिप्रत्यक्षत्वेन शाब्दवृत्तीच्छा तद्घटितघटादिप्रत्यक्षसामग्री राज्ञः पुरुष इति शाब्दसामग्री तत्र घटादिप्रत्यक्षानुपपत्तेः निरुक्तप्रत्यक्षस्य इच्छाविषयत्वविरहेण प्रतिबध्यतावच्छेदकाक्रान्तत्वा न्न च स्वीयविषयतावच्छेदकवत्त्वसंबन्धावच्छिन्नप्रतियोगिताकेच्छाभाववत्त्वस्य, प्रतिबध्यविशेषणत्वाद्घटादिप्रत्यक्षत्वस्य इच्छाविषयतावच्छेदकतया तद्वत्त्वस्य तत्र सत्वेन निरुक्तप्रत्यक्षस्य प्रतिबध्यत्वानाक्रान्तत्वान्नानुपपत्तिरिति वाच्यम्,, पटादिप्रत्यक्षादि जायतामितीच्छादशायां निजेच्छारहित-घटादिप्रत्यक्षसामग्रीवलात् निरुक्तशाब्दसामग्रीकाले घटादिप्रत्यक्षापत्तेः निरुक्तेच्छाविषयतावच्छेदकस्य प्रत्यक्षत्वस्य पटप्रत्यक्षेपि सत्वात् यदि स्वीयवियतावच्छेदकतापर्य्याप्त्यधिकरणरूपवत्त्वसंबन्धावच्छिन्नप्रतियोगिताकेच्छाभाववत्त्वस्य तत्र प्रवेशान्न दोषः तादृशपर्य्याप्त्यधिकरणस्य पटविषयकत्व,विशिष्टप्रत्यक्षत्वस्य घटादिप्रत्यक्षे बाधात् न च परमाणुविषयकालौकिकप्रत्यक्षातिरिक्तघटवद्भूतलप्रत्यक्षं जायतामिति विसम्वादिनी प्रत्यक्षेच्छा घटवद्भूतलप्रत्यक्षसामग्री राज्ञः पुरुष इत्यादिशाब्दसामग्रीकाले घटवद्भूतलप्रत्यक्षस्य सर्व्वानुभवसिद्धस्यानुपपत्तिः परमाणुविषयकालौकिकप्रत्यक्षस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धत्वेन निरुक्तेच्छाविषयतावच्छेदकस्याप्रसिद्धेः किं च तादृशेच्छायास्तादृशसंबन्धस्य व्यधिकरणतया तदभावस्य केवलान्वयित्वेन निरुक्तप्रत्यक्षस्य प्रतिबध्यतावच्छेदकाक्रान्तत्वादेवं स्थिते घटादिप्रत्यक्षं प्रति घटादिप्रत्यक्षेच्छाविरहविशिष्टराज्ञः पुरुष इति वाक्यज्ञानघटितशाब्दसामग्री प्रतिबन्धिकेति भिन्नभिन्नरूपेण प्रतिबन्धकभावस्यावश्यकतया गौरवस्य दुर्वारत्वात् किञ्च इच्छाघटितपटप्रत्यक्षसामग्री इच्छाघटितघटादिप्रत्यक्षसामग्री राज्ञः पुरुषइति वाक्यज्ञानघटितशाब्दसामग्री यत्र तत्र घटपटादिगोचरसमूहालम्बन प्रत्यक्षस्यापत्तिस्तस्य प्रतिबध्यतावच्छेदकानाक्रान्तत्वादतस्तद्वारणाय घटादिविषयकप्रत्यक्षत्वावच्छिन्नं प्रति घटादिविषयकप्रत्यक्षत्वप्रकारताविरहविशिष्टराज्ञः पुरुषः इति वाक्यज्ञानघटितशाब्दसामग्री प्रतिबन्धिका इति रीत्याऽन्यत्रापि विशेषरूपेण प्रतिबन्धकताकल्पनस्यावश्यकत्वेनैकरूपेण प्रतिबध्यबन्धकभावस्य वक्तुमशक्यत्वात् "प्रकारतावादिनां गौरवं दर्शयति संसर्गतावादो स्वत्वोपस्थित्यादीति" संसर्गतावादिनां गौरवं दर्शयति प्रकारतावादी भवन्मतेपीत्यादिना, अथात्र तुल्ययुक्त्या राजस्वत्वाभावव्याप्यस्वत्वसंबन्धावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुष इति निश्चयस्य तादृशशाब्दबोधं प्रति प्रकारतावादिनयेपि तदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वेन तदभावस्य सामग्र्यन्तर्गतत्वेन साम्यसंभवात् कथं गौरवोत्कीर्त्तनमिति चेन्न, स्वत्वसंबन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्याश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकस्वत्वसामान्याभाववान् पुरुष इति निश्चयस्यापि संसर्गतावादिमते तथा प्रतिबंधकतया तदभावस्य सामग्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधया प्रवेशेनैव साम्यं पूर्वोक्तस्याधिक्यात् "प्रकारतावादिनां" तु बाधाभावेनैवोपपत्तिसंभवात् न च प्रकारतावादिनयेपि आश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकस्वत्वसामान्याभावव्याप्यस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुष इत्याकारकनिश्चयस्य प्रतिबन्धकत्वेन तदभावस्य सामग्रीविधया प्रवेशेन साम्यमिति वाच्यं "संसर्गतावादिनये" राज्ञः पुरुष इति वाक्यजन्य विशिष्टवैशिष्ट्यावगाहिबोधे स्वत्वांशे नियतोराजप्रतियोगिकत्व भासते एवं च राजप्रतियोगिकत्वाभावव्याप्यनिरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववत्स्वत्वमिति निश्चयस्य स्वत्वसंसर्गकतथाविधबुद्धिप्रतिबन्धकत्वेन तदभावस्यापि तथाविधशाब्दसामग्र्यां प्रवेशाद्गौरवं 'प्रकारतावादिनये' आश्रयासिद्धिविधयैवोपपत्तिसम्भवान्न च प्रकारतावादिनयेपि तादृशवाक्याद्विशिष्टवैशिष्ट्यावगाहिशाब्दबोधे आश्रयत्वांशे राजस्वत्वत्वावच्छिन्नप्रतियोगिताकत्वस्य नियमतो भानेन तादृशशाब्दबुद्धौ राजस्वत्वप्रतियोगिकत्वाभावव्याप्यराजाभाववदाश्रयत्वमिति ज्ञानस्य तदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वेन तदभावस्य प्रवेशेन गौरवस्य साम्यान्न दोष इति (३) वाच्यं 'संसर्गतावादिन-

---

(३) टि० अयं भावः संसर्गतावादिनां राजस्वत्वप्रतियोगिकत्वाभावव्याप्य राजाभाववदाश्रयत्वमिति ज्ञानस्य प्रतिबन्धकत्वकल्पनेपि भिन्नविषयकत्वेन राज्ञः पुरुष इति वाक्यजन्यशाब्दबोधसामग्रीप्रतिबध्यत्वकल्पनमावश्यकमिति,, मन्मते च राजप्रतियोगिकत्वाभावव्याप्य निरूपितत्वसम्बन्धावच्छिन्नप्रतियो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये' निरुक्तव्याप्यवत्ताविषयकलौकिकप्रत्यक्षस्य भिन्नविषयकत्वेन तं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनं तदभावस्य तं प्रतिकारणत्वकल्पनमावश्यकमिति,, प्रकारतावादिनये,, प्रतिबन्धकत्वं संसर्गतावादिनये प्रतिबध्यत्वं सर्व्वं तु समानं पूर्वोक्तस्य गौरवस्य संसर्गतावादिनां दुर्वारत्वात्० । केचित्तु,, संसर्गतावादिनये स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्यनिरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववत्स्वत्ववान् पुरुष इति निश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया प्रतिबन्धकत्वस्यावश्यकत्वेन तदभावस्यापि सामग्रीविधया प्रवेशेन गौरवं,, प्रकारतावादिनये आश्रयासिद्धिनिश्चयाभावेनैवोपपत्तौ लाघवस्य दुष्परिहरत्वादित्यस्मद्गुरवः प्राहुः वस्तुतस्तु नात्रग्रन्थकारस्य निर्भरता किन्तु पूर्वोक्तदोष एव तथाहि,, राजनिरूपितस्वत्वाभाववान् पुरुष इत्याकारकप्रत्यक्षम्प्रतिप्रतिबन्धकत्वं कथितं संसर्गतावादिना स्वत्वसंबन्धावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुषः सुंदर इत्याकारकप्रत्यक्षं प्रतिप्रतिबंधकत्वं दर्शितं तदुपरि प्रकारतावादो निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववत्स्वत्वं प्रमेयमित्याकारकप्रत्यक्षं प्रति प्रतिबन्ध कत्वं प्रदर्श्य पूर्वोक्तमधिकमित्युक्तं तत्समीचोनं निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववत्वं प्रमे-

---

गिताकराजाभाववत्स्वत्वमिति ज्ञानस्य राज्ञः पुरुष इति वाक्यजन्यशाब्दबोधसामग्रीप्रतिबध्यत्वाकल्पनात् सामग्र्याः आश्रयासिद्धिनिश्चयाभावघटिततया तद्विरहादेव नापत्तिः सम्भवतीति०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमभिधेयं वाच्यं एवं राजाभाववत्स्वत्वं घटाभाववत् पटाभाववत् नीलोत्पलाभाववत् सरोजाभाव वदित्याद्याकारकलक्षाधिकप्रत्यक्षत्वावच्छिन्नप्रतिबध्यतानिरूपितलक्षाधिकप्रतिबन्धकतायाः कल्पनं तादृशतादृशप्रत्यक्षं प्रति शाब्दसामग्रीशून्यत्वस्य कारणत्वकल्पने गौरवस्य दुर्वारत्वादिति० न च प्रकारतावादिनये घटपटादिविषयकसहस्रप्रत्यक्षं प्रति स्वत्वोपस्थितित्वेन प्रतिबन्धकत्वा स्याधिकस्य कल्पनं तदभावस्य च तं प्रति करणताकल्पनमपि प्रकारतावादिनामधिकमिति वाच्यं प्रतिबन्धकत्वं कारणीभूताभावप्रतियोगित्वंप्रतियोगिताचावच्छेदकस्वरूपा अवच्छेदकस्य स्वत्वोपस्थित्वस्यैक्येन प्रतिबन्धकत्वस्य प्रकृते नानात्वाभावान्नाधिकप्रतिबन्धता कारणता वेति गौरवात् 'संसर्गतावादिनये' निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्स्वत्वं प्रमेयमभिधेयं वाच्यं मित्याद्याकारकप्रत्यक्षानामेकरूपेण प्र(४)तिबध्यत्वासंभवात् किञ्च

(४) टि० । न च निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावत्वावच्छिन्नप्रकारतानिरूपितस्वत्वत्वावच्छिन्नविशेष्यत्वावच्छिन्नविशेष्यतानिरूपितप्रकारताशालिप्रत्यक्षत्वेनैकरूपेण प्रतिबध्यत्वेन गौरवमिति वाच्यं यत्र राज्ञः पुरुष इति शाब्दसामग्री निरूपितत्वसम्बन्धावच्छिन्नराजाभाववत्स्वत्वं प्रमेयमिति प्रत्यक्षसामग्री तादृशप्रत्यक्षं जायतामितीच्छा तत्र प्रतिबन्धकता वारणीया यदि उक्तप्रकारताशालिप्रत्यक्षेच्छाच्छाविरहविशिष्टत्वस्य प्रतिबंधकतावच्छेदकतेच्छानिवेश स्तदा राजाभाववत्स्वत्वं प्रमेयमिति प्रत्यक्षसामग्री राजाभाववत्स्वत्वं घटाभाववदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वत्वोपस्थितिशून्यत्वकालीन घटादिविषयकसहस्रप्रत्यक्षं प्रति राज्ञः पुरुष इत्यादिवाक्यज्ञानघटितसामग्र्याः प्रतिबंधकत्वं प्रकारतावादिनये च, स्वत्वोपस्थित्यभावेन सामग्र्यसत्वान्न प्रतिबन्धकत्वकल्पनमिति अन्ये तु संसर्गतावादिनये स्वत्वसंबन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभाववान् पुरुष इति व्याप्यवत्तानिश्चये राजस्वत्वासमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य स्वत्वत्वनिष्ठावच्छेदकताघटितस्य पुरुषांशे राजनिरूपितत्वस्वत्वत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्य च विषयत्वेन प्रतिबन्धकतायां कारणताया अधिकस्यावच्छेदकत्वेन गौरवम् 'प्रकारतावादिनये च' तादृशनिश्चये राजाभावसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्यावच्छेदकताघटितस्य विषयत्वेनाल्पस्य तत्त्वावच्छेदकत्वेन लाघवमित्याहु स्तन्न साध्याभाववद्वृत्तित्वावगाहिव्याप्यवत्तानिश्चयस्य प्रकारतावादिनये राजत्वनिष्ठावच्छेदकतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नराजनिष्ठावच्छेदकतानिरूपितस्वत्वत्वनिष्ठावच्छेदकतानिरूपितस्वत्वनिष्ठप्रतियोगिताकाभावो नास्ति इति प्रतीतिसिद्धतालद्वयावलीढावच्छेदकताकप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वन्नास्तीति प्रतीतिसिद्धाभावावगाहिनिश्चयस्य कतिपयांशे तादृशतयावलीढावच्छेदकताघटितप्रतियोगिताकाभावविषयकतया

प्रत्यक्षं जायतामितीच्छा तत्र प्रतिबन्धकत्वन्न स्यात् अतः भिन्नभिन्नरूपेणैव प्रतिबध्यप्रतिबन्धकभावः सम्यक् तथा चोक्तगौरवस्य दुर्द्धरत्वादिति भावः ॥ S. S. ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशनिश्चयनिष्ठप्रतिबन्धकतायां तादृशनिश्चयाभावनिष्ठसामग्रीविधया कारणतायामधिकस्यावच्छेदकत्वेन विषयतासमसंख्यप्रतिबन्धकतायाः कारणतायाश्च कल्पनेन महागौरवापत्तेः न च प्रकारतावादिनये राजनिरूपितस्वत्ववान् पुरुष इत्याकारकशाब्दं प्रति राजाभाववान् राजस्वत्वाभाववान् राजाभाववान् पुरुष इत्यादि नाना निश्चयनिष्ठप्रतिबन्धकतायां सकृदेव राजस्वत्वाभाववान् पुरुष इति निश्चयस्य राजाभावव्यापकोराजस्वत्वाभावः राजाभाववांश्च पुरुष इत्यादि नाना निश्चयनिष्ठप्रतिबन्धकतायां सकृदेव राजस्वत्वाभावविषयताया अवच्छेदकत्वं 'संसर्गतावादिनां नये' स्वत्वसम्बन्धेन राजविशिष्टः पुरुष इति बुद्धिं प्रति राजस्वत्वाभाववान् राजाभाववान् राजस्वत्वाभाववान् पुरुष इति निश्चयस्य राजस्वत्वाभावव्यापको राजाभावः राजस्वत्वाभाववान् पुरुष इति निश्चयस्य प्रतिबन्धकत्वे असकृतराजस्वत्वाभावविषयतायाः गुरुतरायाः प्रतिबन्धकतावच्छेदकत्वेन गौरवमिति वाच्यं 'प्रकारतावादिनये' घटाभाववान् राजस्वत्वाभाववान् घटाभाववान् पुरुष इत्याद्यनेकनिश्चयप्रतिबन्धकतायां राजस्वत्वाभावविषयतायाः गुरुभूतायाः अवच्छेदकत्वेन गौरवं 'संसर्गतावादिनये च' घटाभाववान् राजाभाववान् घटाभाववान् पुरुष इत्याद्यनेकनिश्चयनिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां लघुतरराजाभावविषयत्वस्यावच्छेदकत्वेन लाघवसम्भवात् किञ्च, व्यापकसामानाधिकरण्यरूपव्याप्तौ प्रतियोगित्वांशे साध्यतावच्छेदक-तदितरोभयावच्छिन्नत्वस्य प्रविष्टत्वेन तदंशे गौरवस्य प्रकारतावादिनये दुर्वारत्वात् 'अत्र ब्रूमः' संसर्गतावादिनये राजविशिष्टः स्वत्वसम्बन्धेन पुरुष इति शाब्दम्प्रति स्वत्वसम्बन्धावच्छिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगिताकराजाभावव्याप्यस्वत्वसामान्याभाववान् पुरुष इति निश्चयस्य एवं स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभाववान् पुरुष इति निश्चयस्य एवं स्वत्वसंबंधावच्छिन्नप्रतियोगिताकराजाभावव्याप्यं यत् निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववत्स्वत्वं तद्वान् पुरुष इत्याद्यनेकविधनिश्चयानां तदभावव्याप्यवत्तानिश्चयमुद्रया अनेकप्रतिबन्धकत्वकल्पनं तत्तन्निश्चयाभावानां प्रतिबन्धकाभावमुद्रया कारणत्वमिति तत्तत्प्रतिबन्धकाभावानाञ्च शाब्दसामग्रीघटकत्वेन भिन्नविषयकप्रत्यक्षप्रतिबन्धकतायाश्च गौरवं 'प्रकारतावादिनये च' राजस्वत्वाभावव्याप्यराजाभाववान् पुरुष इति एकविधनिश्चयस्यैव प्रतिबन्धकत्वं तदभावस्यैव प्रतिबन्धकाभावमुद्रया कारणत्वं भिन्नविषयकप्रत्यक्षसामग्र्याश्च प्रवेश इति लाघवमिति संक्षेपः ॥ जानातीत्यादौ आख्यातस्य निरर्थकत्वमभ्युपगच्छतां चिन्तामणिकाराणां मतं दूषयति शिरोमणिमतमाश्रयते "गदाधरः" तत्राश्रयत्वे निरूढलक्षणामभ्युपगच्छतां दीधितिकाराणां पुनरेष आशयः यत्र धातोः ज्ञानाश्रयत्वे शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र चैत्राद्यंशे धात्वेकदेशस्य ज्ञानादेरन्वयानुपपत्त्या इत्यादिना,, अत्रेदं चिन्त्यं लक्षणा तात्पर्यानुपपत्तिपूर्विका अन्वयानुपपत्तिपूर्विका भवति आद्या यष्टिं प्रवेशय इत्यत्र यष्टिपदस्य यष्टिधरे दण्डिनि,, द्वितीया गङ्गायां घोष इत्यत्र घोषपदस्य प्रवाहे वा गङ्गापदस्य तीरे,, यत्र जानाति चैत्रः चैत्रे ज्ञानसम्बन्धस्य बाधात् तात्पर्यानुपपत्तेरभावाच्च लक्षणाज्ञानस्यावश्यकत्वाभावान्मैथिलानां मणिकाराणाम्मतमेव साधु ग्राह्याभावानवगाहिज्ञानस्याप्यनुभवसिद्धमति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्धकताकल्पने प्रतिवन्धकत्वानुपपत्तिदोषविरहादतो दोषान्तरमाह नञ्पदं विना यत्रेत्यादिना उद्देश्यतावच्छेदकव्याप्यविशिष्टपर्य्याप्तेरेव संसर्गतोपगमात् तत्राकाशत्वव्याप्यतायां द्वित्वपर्य्याप्तावसत्वेनातिप्रसंगविरहात् "वैशिष्ट्यञ्च" वैज्ञानिकं न तु वास्तवं तेन यत्र योग्यत्वाभ्रमजन्यात्राकाशावित्यादि भट्टः अथात्र किं वैज्ञानिकं यदि ज्ञाननिरूपितविषयतात्मकवैशिष्ट्यं तदा उद्देश्यतावच्छेदकव्याप्यत्वविषयकज्ञानविषयकपर्य्याप्तेः संसर्गता वक्तव्या एवञ्च द्वित्वपर्य्याप्तौ गगनत्वव्याप्यत्वज्ञानविषयत्वस्यावाधितत्वात् कथं संसर्गतावच्छेदकांशे भ्रमत्वत्वादिति चेन्न, उद्देश्यतावच्छेदकव्याप्यत्वनिष्ठावच्छेदकतानिरूपितपर्य्याप्तिनिष्ठसंसर्गतायां तात्पर्य्यात् यथा संसर्गांशे गुणीयत्वस्य वाधेपि गुणीयसंयोगेन घटवानित्यत्र संयोगनिष्ठसंसर्गता गुणीयत्वावच्छिन्ना तथा प्रकृतेपीति यथा ज्ञाने गुणीयत्वविशेषणं संयोगश्च विशेष्यः प्रतीयते न तु गुणीयत्वाश्रयः संयोग स्तथा प्रकृतेपीति ननु संसर्गतावच्छेदकप्रकारतात्मकविषयत्वविरहेण तदभाववति तत्प्रकारताकत्वस्य भ्रमत्वस्यानुपपत्तिरित्यत आह संसर्गतावच्छेदकांशे भ्रमत्वस्यान्यत्रोपपादितत्वादिति "अयं भावः" तदभाववन्निष्ठविषयतानिरूपित तन्निष्ठविशेष्यताकत्वस्य भ्रमत्वात् संसर्गांशे संसर्गघटकांशे च तथा विधस्यैव तस्य विवक्षितत्वान्न काप्यनुपपत्तिरिति, न च संयोगेन पर्वतो वह्निमानित्यस्य भ्रमत्वमापाद्यते समवायेन वह्न्यभाववत्त्वस्य पर्व्वते सत्वात् इति वाच्यं विशेषणताविशेषणताविशिष्टविषयताकत्वस्य सत्वात् विशेषणतावैशिष्ट्यञ्च स्वनिरूपितत्व स्वविशिष्टप्रतियोगिताकाभाववन्निष्ठत्वोभय-

CC-0. In Public Domain. Digitization by eGangotri

सम्बन्धेन प्रतियोगितायां विशेषणतावैशिष्ट्यञ्च,, स्वानवच्छेदकसम्बन्धावच्छिन्नत्व स्वानवच्छेदकानवच्छिन्नत्वोभयसंसर्गेण स्वं विशेष्यता अथ वा स्वावच्छिन्नत्व स्वावच्छेदकसम्बन्धावच्छिन्नत्वैतद्द्वयसम्बन्धेन तद्वाच्यं स्वं विशेषणता न च तथापि संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्यापि कालिकेन पर्वते सत्वात् संयोगेन वह्निमान् पर्वत इति ज्ञानस्य भ्रमत्वं दुर्वारमेवेति वाच्यं द्वितीयसम्बन्धघटकाभाववन्निष्ठत्वेन स्वाभाववत्ता च स्वनिरूपितप्रतियोगिताविशिष्टप्रकारतानिरूपितद्वित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकस्वनिष्ठप्रकारतावच्छेदकसम्बन्धेन विवक्षितन्तत्त्वात्तथाविधस्वरूपसम्बन्धेन वह्न्यभाववत्त्वस्य पर्वते बाधान्न दोषः प्रकारतायां प्रतियोगितावैशिष्ट्यञ्च स्वसामानाधिकरण्य स्वानवच्छेदकानवच्छिन्नत्व स्वानवच्छेदकसम्बन्धावच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वं प्रतियोगिता अधिकं मदीयसिद्धान्तसारसामान्यनिरुक्तिव्याख्यायां द्रष्टव्यम्० यत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपितैकत्वद्वित्वादिप्रकारता तत्रैव शुद्धायाः पर्य्याप्तेरिति "गादाधरो" अथात्र धवखदिराविति अत्र एका धवत्वावच्छिन्ना विशेष्यता अपरा खदिरत्वावच्छिन्नविशेष्यता इति नानाधर्म्मावच्छिन्नत्वं न कुत्रापि विशेष्यताया दृष्टिचरमिति चेन्न, धर्मांशे नानात्वेनान्यधर्म्मविशिष्टा यत्र एकत्वद्वित्वप्रकारता इति तस्यार्थः प्रकारतायां धर्मवैशिष्ट्यञ्च स्वावच्छिन्नविशेष्यतानिरूपितत्वस्वभिन्नधर्म्मावच्छिन्नविशेष्यतानिरूपितत्वोभयसम्बन्धेन स्वमत्र धर्म्मपरं विशेष्यतायां नानात्वतात्पर्य्यविशेष्यताविशिष्टा यत्र एकत्वद्वित्वप्रकारता इति तस्यार्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशिष्ट्यञ्च,, स्वनिरूपितत्वस्वभिन्नकिञ्चिद्धर्म्मावच्छिन्नविशेष्यतानिरूपितत्वोभयसम्बन्धेन स्वं विशेष्यता एव धवखदिरावित्यत्र एकाया एव द्वित्वप्रकारताया धर्म्मद्वयावच्छिन्नविशेष्यतानिरूपितत्वसत्वान्नानुपपत्तिरिति एतेन आकाशावित्यत्र आकाशत्वावच्छिन्नविशेष्यतायामपि एकत्वभिन्नसंख्यावत्त्वसत्वेपि निरुक्तोभयसम्बन्धेन धर्म्मविशिष्टत्वाभावान्न केवलपर्य्याप्तेः समवायसंसर्गतामादाय प्रामाण्यावकाश इति दिक् । यत्रैकधर्म्मस्य द्वित्वाद्युद्देश्यतावच्छेदकता तत्रैवोद्देश्यतावच्छेदकपर्य्याप्तेः संसर्गतानियमः यत्र धर्म्मद्वयादेस्तथात्वं तत्र केवलपर्य्याप्तेः समवायस्यैव वा संसर्गता इत्यादि 'गादाधरी' स्वत्वोद्रेककालाकाशासागतत्रित्वादि तात्पर्य्येण कालाकाशा इति प्रयोगस्य प्रामाण्यापत्तिः त्रित्वसमवायस्य कालाकाशादाववाधितत्वात्तत्रापि धर्म्मद्वयादेः त्रित्वोद्देश्यतावच्छेदकत्वादिति चेन्न., यत्र नानाधर्म्मावच्छिन्नोद्देश्यताविशिष्टव्यासज्यवृत्तिनिष्ठकविधेयता भवति तत्रैव केवलपर्य्याप्तेः समवायस्य वा संसर्गत्वाद्युपगमात् वैशिष्ट्यञ्च,, स्वनिरूपितावच्छेदकत्वावच्छिन्नाभाववद्वृत्तिनिष्ठत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसम्बन्धेन स्वमत्रोद्देश्यता तथा च" कालत्वाकाशत्वोभयधर्म्मावच्छिन्नोद्देश्यतानिरूपितावच्छेदकताश्रयसामान्याभाववद्विनिरूपितवृत्तित्वस्य त्रित्वेसत्वेन त्रित्वनिष्ठविधेयतायां तद्वृत्तित्वसत्वान्निरुक्तसम्बन्धविरहात्केवलपर्य्याप्तेः समवायस्य वा संसर्गत्वाभावान्न दोषः नचोद्देश्यभेदेनोद्देश्यतायाः भिन्नत्वपक्षे धवखदिरादावगतिस्तुल्ययुक्तेरिति वाच्यं स्वनिरूपितविधेयतानिरूपितोद्देश्यतावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताश्रयसामान्याभाववदवृत्तिनिष्ठत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन वैशिष्ट्यस्याभिधानात् द्वित्वनिष्ठविधेयतानिरूपितत्वेन धवत्वावच्छिन्नखदिरत्वावच्छिन्नोद्देश्यत्वयोरनुगमसम्भवान्न दोषः ननु प्रमेयाकाशावित्यत्र प्रमेयावित्यत्र चापत्तिः उद्देश्यतावच्छेदकस्य केवलान्वयितया तदभावस्याप्रसिद्धत्वेन तादृशसम्बन्धस्याप्रसिद्धत्वादिति चेन्न,, स्वविशिष्टोद्देश्यतानिरूपितत्वसम्बन्धेन वैशिष्ट्याभिधानादुद्देश्यतायां, उद्देश्यतावैशिष्ट्यश्च स्वनिरूपितविधेयताश्रयव्यापकावच्छेदकतानिरूपितत्वसम्बन्धेन व्यापकतावच्छेदकतायां स्वाश्रयवत्तासम्बन्धेन ग्राह्या एवञ्च प्रमेयत्वनिष्ठावच्छेदकतायां स्वाश्रयप्रमेयवत्तासंबन्धेन द्वित्वव्यापकत्वस्याक्षतत्वान्नाप्रसिद्ध्यवकाश इति विभावनीयं ऋजवस्तु यथा यत्रैकधर्म्मस्य द्वित्वाद्युद्देश्यतावच्छेदकता तत्रैवोद्देश्यतावच्छेदकव्याप्यपर्य्याप्तेः संसर्गतानियमः यत्र धर्म्मद्वयादेस्तथात्वं तत्र केवलपर्य्याप्तेः समवायस्य वा तथा यत्रैकधर्म्मस्य वा त्रित्वाद्युद्देश्यतावच्छेदकता तत्रैवोद्देश्यतावच्छेदकव्याप्यपर्य्याप्तेः संसर्गतानियमः यत्र धर्मत्रयादेः तथात्वन्तत्र केवलपर्य्याप्तेः समवायस्य वा संसर्गता इत्युक्ता वेव ग्रन्थकारोक्तिप्रदर्शनेन सर्वसामञ्जस्ये न कोपि दोषः त्रित्वपर्य्याप्तौ कालत्वाकाशत्वयोर्व्याप्यत्वबाधात् ''वस्तुतस्तु केवलपर्य्याप्तेः सर्वत्र सम्बन्धत्वोपगमेपि नातिप्रसङ्गः एकमात्रविशेष्यकद्वित्वादिप्रकारकज्ञानस्य तद्वति तत् प्रकारकत्वसत्त्वेपि न प्रमात्वात् यत स्तद्वति तत्प्रकारकत्वं यथाश्रुतन्न प्रमात्वं अपि तु तद्धर्म्माधिकरणतावच्छेदकयत्किञ्चिद्धर्म्मव्यापकव्यापकं तद्धर्म्मनिष्ठप्रकारतानिरूपितविशेष्यताक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वं व्यासज्यवृत्तिद्वित्वादेरुभयादिवृत्तिधर्म्म एवाधिकरणतावच्छेदकः तद्व्यापकत्वञ्च नैकमात्रविशेष्यकद्वित्वादिप्रकारकविशेष्यतायाः अव्यासज्यवृत्तिद्रव्यत्वादेश्च तत्तद्व्यक्तित्वादिकमप्यधिकरणतावच्छेदकं अत एकमात्रविशेष्यकद्रव्यत्वादिप्रकारकबुद्धेः प्रमात्वनिर्वाहः न च घटपटा विति घटपटोभयत्वप्रकारतानिरूपिता घटपटोभयवृत्तिविशेष्यता घटत्वपटत्वप्रकारताभेदाद्भिन्ना तादृशी च क्वापि विषयता न घटपटोभयत्वाधिकरणतावच्छेदकधर्म्मव्यापिकेत्यव्याप्तिरिति वाच्यं तद्धर्म्माधिकरणतावच्छेदकयत्किञ्चिदेकधर्म्मव्यापकस्वीयतद्धर्म्मनिष्ठयत्किञ्चिदेकप्रकारतानिरूपितविशेष्यताकत्वस्य विवक्षितत्वादिति प्राहुः ॥*॥*॥ शिवम् ।

इति मैथिल—नै० श्रीमद्विश्वनाथशर्म्मकृत-
व्युत्पत्तिवादविवृतौ पर्य्याप्त्यवधिखण्डम् ।

श्रीकाशी विश्वनाथादिभ्यो नमः ॥ S. ॥

CC-0. In Public Domain. Digitization by eGangotri

ध्यात्वा गुरुपदद्वन्द्वं स्मृत्वा सिद्धान्तसंग्रहम्। क्रियते विश्वनाथेन ज्येष्ठादीनां परिष्कृतिः॥ "अथ चैत्रस्यायं ज्येष्ठ-पुत्र इत्यत्र पुत्रनिष्ठज्येष्ठत्वं स्वजन्यत्वविशिष्टपुंस्त्वसम्बन्धेन। पितृविशिष्टत्वं यद्युच्यते तदा कनिष्ठे मध्यमे चातिव्याप्तिरिति चेन्न,, स्वजन्यत्व स्वजन्यपुत्रोत्पत्तिदृध्वंसानधिकरणोत्पत्तिकत्वो-भयसम्बन्धेन पितृविशिष्टत्वस्य विवक्षितत्वात्०। तथा च कनि-ष्ठे मध्यमे च वास्तविकज्येष्ठपुत्रोत्पत्तिदृध्वंसाधिकरणोत्पत्तिक-त्वस्य सत्वेन तादृशसंबन्धस्यासत्वात् अतिव्याप्तिविरहात्०॥ "कनिष्ठत्वञ्च" स्वजन्यपुत्रोत्पत्तिप्राग्भावानधिकरणक्षणोत्पत्ति-कत्व स्वजन्यत्वविशिष्टपुंस्त्वोभयसंबन्धेन पितृविशिष्टत्वम्०। प्राग्भावानङ्गीकारकमते तु स्वजन्यपुत्रोत्पत्तिध्वंसानधिकरणक्ष-णोत्पत्तिकभिन्नत्व स्वजन्यपुत्रोत्पत्तिपूर्वत्वविशिष्टं यत् स्वजन्य-पुत्रोत्पत्त्युत्तरत्वं तद्विशिष्टक्षणोत्पत्तिकभिन्नत्व स्वजन्यत्वविशिष्ट-पुंस्त्वैतत्त्रितयसंबन्धेन पितृविशिष्टत्वं तदिति०॥ "मध्यमत्व-ञ्च" स्वजन्यपुत्रोत्पत्तिध्वंसाधिकरणत्व स्वजन्यपुत्रप्राग्भावाधिक-रणत्वोभयसम्बन्धेन स्वविशिष्टं यत्क्षणं तदुत्पत्तिकत्व स्वजन्य-त्वविशिष्टपुंस्त्वोभयसम्बन्धेन पितृविशिष्टत्वम्०। तथा च कनि-ष्ठोत्पत्तिक्षणे स्वजन्यपुत्रप्राग्भावाधिकरणत्वस्याभावेन ज्येष्ठो-त्पत्तिक्षणे स्वजन्यपुत्रोत्पत्तिध्वंसाधिकरणत्वस्याभावेन न कनिष्ठे ज्येष्ठे च मध्यमत्वलक्षणस्यातिव्याप्तिरिति०। लक्षणसमन्वयः स्वयमेवोहनीयः०॥ नन्वेकपुत्रस्थले चैत्रस्यायमेव ज्येष्ठोऽयमे-व कनिष्ठोऽयमेव मध्यमस्तत्र मध्यमत्वलक्षणस्याव्याप्तिस्तथाहि" तत्र पुत्रोत्पत्तिक्षणे स्वजन्यपुत्रप्राग्भावाधिकरणत्वस्य द्वितीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्बन्धस्य विरहात् निरुक्तोभयसम्बन्धेन पितृविशिष्टस्यासत्वात् इति चेन्न,, स्वजन्यपुत्रोत्पत्तिध्वंसाधिकरणत्वविशिष्टं यत् स्वजन्यपुत्रप्रागभावाधिकरणं तदुत्पत्तिकभिन्नत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाववत्वसंबन्धेन पितृविशिष्टत्वस्य मध्यमत्वलक्षणत्वान्न दोष "स्तथा हि" एकपुत्रस्थले तादृशसम्बन्धस्य व्यधिकरणतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकपितृत्वावच्छिन्नाभावस्य केवलान्वयित्वात्० पुत्रे पितृविशिष्टस्य सत्वात्० । न च घटपटादावतिव्याप्तिः तस्य तत्रापि केवलान्वयितया सत्वादिति वाच्यम्० । स्वजन्यत्वविशिष्टपुंस्त्वघटितोभयसम्बन्धेन वैशिष्टयस्य विवक्षितत्वात् घटादौ स्वजन्यत्वविरहान्नातिव्याप्तिः "तथा चेवं निकृष्टलक्षणम्" पितृविशिष्टत्वे सति पुंस्त्वम्मध्यमपुत्रत्वम्० "पितृवैशिष्टयश्च" स्वविशिष्टक्षणोत्पत्तिकभिन्नत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाववत्त्व स्वजन्यत्वोभयसंन्धेन स्वपदं पितृपरं संबन्धघटकलक्षणे स्ववैशिष्टयश्च,, स्वजन्यपुत्रोत्पत्तिध्वंसाधिकरणत्व स्वजन्यपुत्रप्रागभावाधिकरणत्वोभयसम्बन्धेन स्वपदमत्र पितृपरम्० तादृशसम्बन्धे पुत्रा दिजननकर्तृ पितृप्रतियोगित्वात् तत्र ज्येष्ठे कनिष्ठे च नातिव्याप्तिस्तथा हि" मध्यमपुत्रोत्पत्तिक्षणे स्वजन्यज्येष्ठपुत्रध्वंसाधिकरणत्वस्य कनिष्ठपुत्रप्रागभावाधिकरणत्वस्य सत्वात् निरुक्तोभयसंबन्धेन स्वविशिष्टक्षणोत्पत्तिकत्त्वं मध्यमे वर्त्तते स्वविशिष्टक्षणोत्पत्तिकभिन्नत्वञ्च कनिष्ठे वर्त्तते " तथा च" तद्भिन्नत्वसंबन्धावच्छिन्नपित्राश्रयता मध्यमे नास्तीति तत्सम्बन्धावच्छिन्नप्रतियोगिताकपित्रभावस्य तत्र सत्वान्न कोपि दोषः पदमादधातीति०॥ अत्रैतादृशसम्बन्धस्य घृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियामकतया प्रतियोगितानवच्छेदकत्वेन तत्संवन्धावच्छिन्नप्रतियोगित्वाऽप्रसिद्ध्याऽसम्भवापत्तेरिति चेन्न, तत्सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वस्य विवक्षितत्वादवच्छेदकतायां वृत्त्यनियामकसंयोगावच्छिन्नत्वस्य चैत्रो न पचतीति वाक्यस्य प्रामाण्यानुरोधेन सर्व्वसम्मतत्वात्० । न च एकपुत्रस्थले तादृशसंबन्धस्य व्यधिकरणतया तत्सम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्यालोकत्वेन प्रसिद्धेरिति वाच्यम्,, स्वविशिष्टक्षणोत्पत्तिकभिन्नत्वसंवन्धावच्छिन्नस्वनिष्ठप्रकारतानिरूपितविशेष्यत्वाभाववत्त्व स्वजन्यत्वोभयसम्बन्धेन पितृविशिष्टत्वस्याविवक्षितत्वात् ''विशेष्यत्वाभावश्च'' प्रमीयविशेष्यताप्रतियोगिकस्वरूपसंवन्धावच्छिन्नप्रतियोगिताको ग्राह्यः० । क्षणे वैशिष्ट्यश्च पूर्व्ववत्० । प्रकारतायां व्यधिकरणसंबन्धावच्छिन्नत्वस्य व्यधिकरणधर्म्मावच्छिन्नत्वस्य सर्व्वसम्मतत्वात् अन्यथा वह्नित्वेन गुञ्जापुञ्जावगाहि–वह्निमान् पर्व्वत इति ज्ञानप्रकारतावच्छेदकवह्नित्वे न स्यात् । न स्याच्च संयोगेन गुणवान् घट इति ज्ञानप्रकारतावच्छेदकतासंयोग इति तथा चोक्तदोषाणामवकाशाभावः० ॥*॥

इति मैथिल नै०–श्रीविश्वनाथशर्म्मरचिता ज्येष्ठादिपरिष्कृतिः० ॥

श्रीगणेशाय नमः ॥ अथ लकारार्थवादः ॥ भैयोशर्म्मगुरुन्नत्वा स्मृत्वा तद्वाक्यविस्मृतम्० । कृतायेव लकाराणां शक्तौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तिः प्रदर्श्यते०॥ लकाराणां कृतावेव शक्तिः "इति न्यायमतम्"। आश्रये "शक्तिरिति वैयाकरणमतम्"। अत्र न्यायमते तण्डुलं पचति इति वाक्यजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति तिपदं कृतिविषयकबोधजनकत्वप्रकारकभगवदिच्छीयविषयतावदित्याकारकशक्तिज्ञानजन्यकृतित्वप्रकारकोपस्थितित्वेन कारणता०। तत्र कृतिविषयकोपस्थितिशक्तिज्ञानयोः कार्य्यकारणभावे लाघवम्० कृतित्वजातेः शक्यतावच्छेदकत्वादेवं भिन्नविषयकप्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकतया-कृतित्वप्रकारकोपस्थितित्वेन लघुधर्म्मेण च प्रतिबन्धकत्वाच्च लाघवम्०। वैयाकरणमते तु आश्रयत्वविशिष्टावच्छिन्नवाचकताज्ञानाश्रयत्वत्वावच्छिन्नाश्रयत्वप्रकारकोपस्थितयोः कार्य्यकारणभावे गौरवं शक्यतावच्छेदकतयोः सखण्डत्वाच्चैवं भिन्नविषयकप्रत्यक्षं प्रति तादृशशाब्दसामग्रीघटकाश्रयत्वप्रकारकोपस्थितेः आश्रयत्वत्वप्रकारतानिरूपितविशेष्यत्वावच्छिन्नाश्रयत्वप्रकारताकोपस्थितित्वेन एवं विशेष्यतानिरूपितप्रकारत्वावच्छिन्नाश्रयत्वनिष्ठविशेष्यतानिरूपिताश्रयत्वप्रकारकोपस्थितित्वेन इति विनिगमकाभावेन प्रतिबन्धकताधिक्यम् अवच्छेदकगौरवं च इति स्थितिः०। 'अत्र नवीनवैयाकरणाः" आश्रयत्वस्याखण्डोपाधितया स्वरूपतोभानस्वीकारान्न शक्यतावच्छेदकता गुरुतरा न वा विनिगमकाभावेन प्रतिबन्धकताधिक्यम् अवच्छेदकगौरवञ्चेत्यपि दोषाणामवकाश इत्याहुः तन्न आश्रयभेदेनाश्रयत्वस्य भिन्नत्वात् चैत्रनिष्ठाश्रयत्वव्यक्तेः शक्यतावच्छेदकत्वे मैत्रः पचतीति वाक्यस्याप्रामाण्यप्रसङ्गात् न च सकलाश्रयनिष्ठाश्रय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं लाघवादेकमेवेति वाच्यम्, कालिकसम्बन्धेन पाकस्य काले सत्वेन कालः पचतीति वाक्यस्य प्रामाण्यापत्तेः अधिकरणत्वस्य खण्डतया समवायसम्बन्धावच्छिन्नत्वस्य तत्र निवेशाऽसम्भवात् निवेशे वा भवन्नये आश्रयत्वस्यैक्येन समवायसम्बन्धावच्छिन्नाश्रयतायाः कालिकसम्बन्धावच्छिन्नाश्रयतायाश्चाभेदात्पाकनिरूपिताश्रयत्वस्य काले दुर्व्वारत्वात् 'अथ भूवादिमूलव्याख्यावसरे क्रियाप्रधानमाख्यातमिति भाष्यप्रामाण्यात्पचति चैत्र इति वाक्यतश्चैत्रस्याभेदसम्बन्धेनाश्रये ऽन्वयः आश्रयस्य च समवायसम्बन्धावच्छिन्नाधेयतासम्बन्धेन पचधात्वर्थे व्यापारेन्वयः तथा च कालाभिन्नाश्रयस्य समवायसंबन्धावच्छिन्नाधेयतासंबन्धेन व्यापारे सत्वेन कालः पचतीति वाक्यस्य प्रामाण्यानवकाशादिति चेन्न,, आश्रयत्वस्यैकत्वस्य यदि सिद्धिर्भवति तदैवैतादृशरीत्या वक्तुं शक्यते तदैव न स्यात्सएव न सम्भवति "तथा च,, समवायेन वह्न्याश्रयत्ववान् वह्न्यवयव इति वत्संयोगेन वह्न्याश्रयत्ववान् वह्न्यवयव इत्यपि स्यात् । तयोरभेदात्० "किञ्च,, संयोगेन वह्न्यधिकरणतावान्पर्व्वत इत्यत्र तृतीयान्तार्थसंयोगावच्छिन्नत्वस्यान्वयस्य विलयप्रसङ्गात्० । अधिकरणत्वस्याखण्डत्वेन भवन्नये संबन्धावच्छिन्नत्वा न्न च वैशिष्ट्यं तृतीयार्थः स चावच्छिन्नाधेयात्मकः तत्रावच्छिन्नत्वैकदेशेवच्छेदकत्वे संयोगस्यान्वयस्तथाच,, वह्निनिष्ठसंयोगसंबन्धावच्छिन्नाधेयतानिरूपकाधिकरणत्ववान् पर्व्वत इत्याकारकस्तत्रान्वयसम्भवस्तस्मान्नान्वयविलयप्रसङ्ग इति वाच्यम् पूर्व्वोक्तापत्तेः तथाप्यनुद्धारात्० । अथ यथा वायौ समवायस्यैकत्वे रूपवत्ताप्रतीतेः प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणत्ववारणं तथा प्रकृतेपीति चेन्न,, तत्र समवायसत्त्वेपि रूपाभावादित्युक्तं मुक्तावल्याम्० । तथा च, संबन्धसंबन्ध्युभयसत्ताधीनविशिष्टबुद्धिव्यवहारस्य सर्व्वसम्मतत्वात् 'तच्च' वायौ समवायस्यैकत्वरूपवत्ताप्रतीतेः प्रमात्ववारणेनास्तीति प्रकृते वह्न्यवयवे संयोगस्य समवायस्य वह्नेरधिकरणत्वस्य च सर्व्वस्यैव सत्वात् "तथा., वक्तुमशक्यत्वात् न च संयोगसंबन्धावच्छिन्न वह्नित्वावच्छिन्नाधेयतानिरूपकत्वविशिष्टाधिकरणतात्वावच्छिन्नाधिकरणत्वस्य वह्न्यवयवे विरहान्नापत्तिरिति वाच्यम्, तादृशाधिकरणतात्वावच्छिन्नाधिकरणत्वस्य पुनरप्यधिकरणत्वाभिन्नतया तत्र नास्तीति वक्तुमशक्यत्वादिति० । अधिकरणत्वस्याभिन्नत्वाङ्गीकर्तॄणामत्राधिकरणता नास्तीति रीत्या कथनम्० अथ नास्तीति रीत्या कथनं मुखमस्तीति वक्तव्यम् दशहस्तहरीतकीति वाक्यवदेवेति०। "अथाधिकरणत्ववादिनां वैयाकरणानां नवीनानां च मतं सुदूरपराहतम्० । "किञ्च" विशिष्टसत्तानिष्ठाधेयत्वस्य सत्तानिष्ठाधेयत्वस्यानतिरिक्तत्वपक्षे समवायसंबन्धावच्छिन्नविशिष्टसत्तानिष्ठाधेयतानिरूपकाधिकरणत्वस्य गुणादौ सत्वेन समवायेन विशिष्टसत्ताधिकरणत्ववान् गुण इति प्रतीतेः भवदुक्तरीत्या प्रमात्वनिराकरणं गोर्व्वाणगुरूणामप्यशक्यमिति "मन्नये तु" अधिकरणताया नानात्वात्समवायसंबन्धावच्छिन्नगुणकर्म्मान्यत्वविशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वस्य तत्रासत्वेन तादृशप्रतीतेः प्रमात्वशङ्काया अनवतारात्० । नन्वधिकरणत्वस्य नानात्वेऽपि, समवायस्यैक्येन समवायसंबन्धावच्छिन्नाधिकरणताया ऐक्यात्तादृशाधिकरणत्वमेव शक्यतावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्तु काले समवायेन व्यापारस्यासत्वेन उक्तदोषस्यावकाशा-भावात्०। न च समवायसंबन्धावच्छिन्नत्वेनाधिकरणतात्वेन च शक्यतावच्छेदकत्वे उक्तगौरवस्य दुर्व्वारता तदवस्थैवेति वाच्यम्, तादृशाधिकरणताव्यक्तेः स्वरूपतः शक्यतावच्छेदकत्व-स्वीकारादिति चेन्न, संबन्धैक्येनाधिकरणत्वस्यैक्यत्वस्वीकारे जलनिष्ठसमवायसंबन्धावच्छिन्ननिरूपकताधिकरणतातो वह्नि-त्वावच्छिन्नसमवायसंबन्धावच्छिन्ननिरूपकताधिकरणत्वस्याभि-न्नतया समवायेन वह्न्यधिकरणतावज्जलं समवायेन जलत्वाधि-करणतावाँश्च पर्व्वत इत्यादि प्रतोतेरप्रमात्वस्य दुर्लभत्वप्रसङ्गात्। न च समवायसंबंधावच्छिन्नवह्नित्वावच्छिन्नाधिकरणतात्वाव-च्छिन्नस्वरूपसंबंधावच्छिन्नाधिकरणत्वस्य जले बाधान्नाप्रामा-ण्यस्यानुपपत्तिरिति वाच्यम्,, स्वरूपसंबन्धावच्छिन्नाधिकरण-ताया अनेकत्वविरहेण जलत्वाधिकरणत्ववत्तादृशाधिकरण-त्वाधिकरणत्वस्य जले सत्वात्०। किञ्च,, पर्व्वतीयरूपस्य स-मवायेन पर्व्वते सत्वेन समवायेन पर्व्वतीयरूपाधिकरणत्ववान् पर्व्वत इति प्रतोतिसत्वात्समवायेन वह्न्यधिकरणत्ववान् पर्व्वत इति प्रतोतेः पूर्व्वयुक्त्या प्रामाण्यस्य दुर्व्वारत्वादिति मुक्तलज्ज-या कृतावेव लकाराणां शक्तिरित्येव नवीनवैयाकरणा अपि ब्रूयुः "किञ्च" लः कर्म्मणि च भावे चाकर्म्मकेभ्य इति सूत्रेण कर्त्तरि कृदिति सूत्रस्थकर्तृपदाध्याहारात् कृतिविशिष्टसामान्यं लकारा-णां चार्थः प्रतीयत इति कृत्याश्रये शक्तिरित्येवोपगम्यते न तु आश्रये इति कृतित्वजातेः शक्यतावच्छेदकतावच्छेदकत्वेन वैया-करणमते गौरवम्०। न च कर्त्तृत्वं नहि कृतिविशिष्टत्वमपि तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापाराश्रयत्वं तथा च व्यापारोधातुलभ्यएव आश्रयमात्रं तदर्थ इति आश्रये शक्तिः स्वीक्रियते एवत्सम्यगेवेति आश्रयस्य चैत्रादेश्चैत्रादिपदाल्लाभेऽपि आश्रयत्वेनालाभात् चैत्रपदादेराश्रयस्य लाभे इत्यपि वक्तुमशक्यत्वादिति वाच्यम्. अचेतनस्यापि काष्ठादेः कर्तृत्वप्रसङ्गात्०। न चेष्टापत्तिः रथो गच्छतीति वाक्यदर्शनादिति वाच्यम्। पाककर्तृत्वत्वावच्छिन्नाधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितो यो धर्म्मस्तद्वान् पचतीत्याकारकान्वयबोधजनकं यत्किञ्चिद्धर्म्मावच्छिन्नोद्देश्यताकपाककर्तृत्वविधेयकज्ञानं भवत्वित्याकारकजिज्ञासायां प्रयुक्तं कः पचतीति वाक्यं तस्य श्रवणानन्तरं चैत्रः पचति ब्राह्मणः पचतीत्यादिकमेव लोके उत्तरवाक्यं प्रयुङ्क्ते न तु काष्ठं पचतीति०। इदानीं "वैयाकरणनये" भो मित्र तव वतुः शालायां कः पचतीति प्रश्नानन्तरं काष्ठं पचतीत्यपि उत्तरवाक्यं स्यात्। तादृशवाक्यस्यापि उक्तेच्छानिवर्त्तकबोधजनकत्वादिति॰। लोके तादृशप्रयोगाभावात् कृतिविशिष्टएवकर्त्ता न तु व्यापारविशिष्टोऽपि॥ पुनरपि मुक्तलज्जेन कृतिविशिष्टएव कर्तृपदार्थ इति स्वीक्रियताम्०। तथा चोक्तगौरवस्यानुद्धारात्०। न च रथो गच्छतीति वाक्यस्याप्रामाण्यस्य प्रसङ्गः रथस्याचेतनतया गमनानुकूलकृतेस्तत्रासत्वात् इति वाच्यम्, आश्रयत्वे लक्षणास्वीकारादेव तादृशप्रयोगोपपत्तेः॥ अत एव काष्ठं पचतीति गौणप्रयोगस्यापि प्रामाण्यमुपपद्यते०। "किञ्च" पचतीत्यस्य पाकं करोतीत्येवं विवरणं लोके श्रूयते न तु पाकाश्रयव्यापाराश्रय; इत्यपि तदेवं किं करोति पचतीति प्रश्नोत्तरयोः समानार्थकबोधजनक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वानुरोधेन कृधातोरिव लकाराणां कृतिवाचकत्वं सिद्धम् । न च कृ धातो र्यत्नार्थकत्वे वीजादिनाऽङ्कुरः कृत इत्यादौ अङ्कुरे यत्नाभावात्कथं शाब्दबोध इति वाच्यम्, तत्र कृ धातोरुत्पत्त्याश्रये लक्षणास्वीकारान्न काप्यनुपपत्तिरिति० । 'नव्यास्तु' पचति चैत्र इत्यादिवाक्यजन्यशाब्दबोधे सति यत्नत्वावच्छिन्ने वर्त्तमानत्वसंशयानुदयाद्व्यत्नविशेष्यकवर्त्तमानत्वप्रकारकान्वयबोधजनकत्वस्य तादृशवाक्ये स्वीकरणीयतया लाघवाद्व्यत्नत्वजात्यवच्छिन्ने लकाराणां शक्तिं स्वीकर्त्तुमुचितत्वात्० । तत्र शक्तिस्वीकारे तु प्रयोजनाभावेन व्यापाराश्रये शक्तेरस्वीकारादित्याहुः ॥ 'यत्तु' पचति चैत्र, इति वाक्यजन्यशाब्दबोधे सति चैत्रः पाकयत्नवान्नवेति संशयाभावस्य सर्व्वानुभवसिद्धस्य कथं वैयाकरणमते निर्व्वाहस्तथाहि पाकानुकूलकृतित्वावच्छिन्नाभावप्रकारकबुद्धिं प्रति अभेदसम्बन्धेन पाकाश्रयप्रकारक-चैत्र-विशेष्यकनिश्चयस्य चैत्राभिन्नाश्रयप्रकारकव्यापारविशेष्यकनिश्चयस्याप्रतिबन्धकत्वात् । इदानीं तादृशसंशयोत्पत्तिर्न्न भवतीति वक्तुमशक्यत्वात्० । इति कृतावेव लकाराणां शक्तिर्न्नत्वाश्रये "तथा च" पाकानुकूलकृतित्वप्रकारकनिश्चयस्य प्रतिबन्धकतया तादृशसंशयाभावस्य तत्र सुघटत्वादिति तत्तुच्छम् ॥ एषोनुयोगस्थल एव तथाहि, पचतीति वाक्यजन्यशाब्दबोधे सति चैत्रो व्यापारवान्नवेति संशयाभावस्य व्यापारश्चैत्राभिन्नाश्रयवृत्तिर्न्नवेति संशयाभावस्य वा सर्व्वानुभवसिद्धस्य कथं त्वन्मते निर्व्वाहः । तादृशं प्रति पाकानुकूलकृतित्वावच्छिन्नप्रकारकनिश्चयस्य तुल्ययुक्त्याऽप्रतिबन्धकत्वात्० ॥*॥ अथ भवतु कृतावेव शक्तिः "परञ्च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तरि कृत्सूत्रस्थकर्तृपदस्यानुकृष्यमाणतया न कर्त्तरि इति सूत्रार्थविरोधस्तथाहि, तस्य कृतिविशिष्टविषयकबोधजनकत्वकृतिविशिष्टविषयकबोधजनका लकारा भवन्तीत्यनुबोधस्य भवन्नये कथन्निर्व्वाह इति चेन्न, तण्डुलं पचति चैत्र इति वाक्यात्तण्डुलकर्म्मताकपाकानुकूलकृतिमाँश्चैत्र इत्यन्वयबोधादिति तादृशानुपूर्व्वीघटकतया लकारस्य कृतिविशिष्टबोधबोधकत्वन्नानुपपन्नमिति० ॥ न च तिङ्समानाधिकरणे प्रथमेति सूत्रात्तिङर्थाभिन्नार्थबोधकपदात्प्रथमा भवतीत्यर्थोवगम्यते "तथा च" तिङर्थकृत्यभेदस्य चैत्रे बाधात्पचति चैत्र इत्यत्र चैत्रपदात् कथं प्रथमा भवतीति वाच्यम्, समवायस्वरूपान्यतरसम्बन्धेन तिङर्थान्वितार्थबोधकपदात्प्रथमा भवत्येवं तत्सूत्रस्य पर्यवसितार्थत्वात्० । "तथा च" तिङर्थकृतेः समवायेन चैत्रे सत्वान्न काप्यनुपपत्तिरिति० । ननु अनभिहिते कर्त्तरि तृतीयेत्यधिकारसूत्राल्लकारेण कर्तुरभिधानं यत्र तत्र कर्म्मवाचकपदात्तृतीयाभवत्येवं वा गम्यते "तथा च' त्वन्मते लकारेण सर्व्वत्रैव कर्त्तुरनभिधानत्वात्कर्तृवाचकचैत्रादिपदात् तृतीयापत्तिः "तथा च" चैत्रेण पचतीति प्रयोगः स्यात् । न तु चैत्रः पचतीति० ॥ इत्यादिबृहच्छङ्कासमाधानादि ग्रन्थविस्तरभयान्न लिखामस्तत् स्वयमप्यूह्यं सुधीभिरिति भावुकम् ॥*॥*॥

इति मै० नै०-श्रीविश्वनाथशर्म्मकृत-

लकारार्थवाद विवृतिः ।

—**—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीविश्वनाथाय नमः ॥ अथ सादृश्यवादः ॥ 'सादृश्यञ्च' तद्भिन्नत्वे सति तद्गतभूयो धर्म्मवत्त्वम्० । इति मीमांसकाः ॥ तत्र चन्द्रवन्मुखमित्यत्राप्यव्याप्तिः। चन्द्रगताह्लादकत्वेपि चन्द्रत्वस्य मुखेऽवृत्तित्वात् तस्यावृत्तित्वे सति सादृश्यमेव न घटते अनेकधर्म्मवत्त्वाभावात्०॥ "तस्मात्तत्र ब्रूमः" भूयस्त्वमविवक्षितमिति० ॥ "एवं च" धर्म्मवत्त्वमेव सादृश्य मत्र घटते० ॥ 'न च' धर्म्मवत्त्वपदेन किं साधारणधर्म्मवत्त्व, मसाधारणधर्म्मवत्त्वं वा, आद्ये वृक्षचन्द्रयोः सादृश्यापत्तिः, अन्ते चन्द्रवन्मुखमित्यत्राव्याप्तिशङ्केति० "तस्मात्तत्र ब्रूमः" चन्द्रादिनिरूपिताह्लादकत्वत्वावच्छिन्नाधेयतावच्छेदकधर्म्मावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयत्वम्० । तद्भिन्नत्वे सति तन्निरूपिताधेयतावच्छेदकधर्म्मावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयत्वम्० । "आह्लादकत्वे चन्द्रसदृशमुखमित्यर्थः" ॥ आह्लादकत्वाभिन्नचन्द्रवृत्तिधर्म्माश्रयं मुखमिति बोधः । आह्लादकत्वं सुखविशेषजनकत्वम्० ॥ ननु चन्द्रस्य कथं सुखविशेषजनकत्वम् कार्य्याधिकरणे कारणसत्वनियमात्, सुखाधिकरणे चन्द्रस्य सत्वाभावादिति चेन्न, सुखविषयकदर्शनवत्त्वसम्बन्धेन चन्द्रस्यात्मनि सत्वात्० ॥ "ननु" जनकतावच्छेदकभेदेन जनकता च नाना, चन्द्रवृत्तिजनकता भिन्नेत्यत आह "चन्द्रादिनिरूपिताह्लादकत्वनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वम्" तत्सादृश्येन सह तत्सादृश्यस्याभेदः 'अत एव' (अहमिव बहवो भवतो मम तु भवानिव भवानेव० । कति कुमुदवनानि सन्तोन्दोर्व्विधुरिव विधुरेव कुमुद्वतीनाम्०) ॥१॥ (गगनं गगनाकारं सागरः सागरोपमः० । रामरावणयोर्य्युद्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामरावणयोरिव०) ॥२॥ इत्यादावभेदेपि सादृश्यम्, "तस्मात्कैश्चित्" सादृश्यं भेदगर्भमिति रीत्या न कार्य्या इति विभावयन्तु धीधनाः ॥ इति-सादृश्यवाद वि०। भावुकं भृशं भूयात्० ॥*॥

इति तर्ककाननपञ्चानन-मैथिल-झोपाधि-श्रीमद्विश्वनाथशर्म्म-निर्म्मित-शक्ति-व्युत्पत्ति-ज्येष्ठत्वादि लकारार्थ-सादृश्यवाद-विवृतिः समाप्ता० ॥

अथ सङ्क्षेपतो ग्रन्थकृद्वंशावली० ॥ भवपरिभवभङ्गश्रीभवानीभवेशौ भव इव भवभारो भव्यभोच्चर्यौ बभूव० । भवभवनसुभूमौ भूभुजा येन भज्यो भववरमिथिलायां श्रीभवान्यादिदत्तः ॥ १ ॥ पुरे सोदराद्ये ऽन्ववाये महात्मा सुधीर्ज्झोपनामा तदीयस्तनूजः० । जगत्कीर्त्तिगौणाब्जताराप-तारापति-स्तत्सुतो न्यायपञ्चाननो वित् ॥ २ ॥ विश्वनाथ इव भाति भूतले विश्वनाथ इति-वर्य्यशेखरः० । विश्वनाथचरणाब्जषट्पदो योऽकरोद्धि विवृतीरिमा वराः ॥ ३ ॥

अथ प्रकाशकवं० ॥ खौआल-जन्योद्भवधर्म्मसिन्धुः श्रीधर्म्मदत्तोऽजनि झोपनामा० । भूदेववर्य्यस्तनयस्तदीयो रङ्गो बृहत्कीर्त्तिरितिप्रपूज्यः ॥ १ ॥ तत्तनुजो गुणशाली तपसि कृपालो यशोमाली० । सङ्गमलाल इति-न्यायाब्जतमोरिसुमान्यमान्यमान्यः ॥ २ ॥ योऽधुना श्रीमहाराजमिथिलेशकृपावशात्० । तत्पाठालयकाध्यापकस्तेनेयं प्रकाशिता० ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ संशो० वंशावली ॥ नगपतितनुजाङ्घ्रयब्जालयवन्या-मरश्रोत्रियनिखिलगुण—श्रीरामचन्द्रोऽजनि क्षित्० । शतलखय-सतौलाख्येन्ववाये ऽन्ववायाब्जतरणिभववन्द्यो मैथिलो झोपना-मा॥१॥तज्जो नीलाम्बरः श्रीक्षितिधरतनयेशो व वन्द्यः सुवन्धुराँ-खो-शर्म्मा सुधर्म्मा गुणनिधिमुहिरो नन्दनोभूत्तदीयः । तत्तोको लाल-शर्म्मा नुतपदतनयस्तस्य सामाजिकः श्रीकोर्त्त्या चन्द्रो व रामो नय इति-रविनाथोऽभवच्छम्भुभक्तः ॥ २ ॥ परसरमा-नग-राध्यासो तद्धर्म्माब्धिसञ्जातः० । शाब्दसुकाननपञ्चाननफुल्ला-ननतर्क्ककञ्जभानुः ॥ ३ ॥ सदाशिवधवासदाशिवसदाशिवोद्दि-प्सदा सदाशिव इतो सदाशिवपुरेऽशुधत्सर्व्वदा० । सदाशिवय-शः प्रदा इति—सुविश्वनाथाऽऽविदा प्रणम्य कृतिका हृदा गुरु-यशोधराङ्घ्री मुदा ॥ ४ ॥ मदीयमतिदोषतो यदिह वास्ति मु-द्रापणादनर्गलवचो दृशा करुणया च तत्क्षम्यताम्० । सुधीधन न मे भयं खलसमूहतो वै क्वचित् भयन्तु विदुषामतो भवत एव सम्प्रार्थये० ॥ १ ॥ क्वैतत्सुतर्कपाथोधिः क्वाहं कीटोपमो वराः । केवलं विदुषां पादतर्य्यात्तीर्णः सदाशिवः ॥ २ ॥ शिवम्० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचीपत्रम् ।

मेरे यहां नीचे लिखी हुई पुस्तकें मौजूद हैं जिन ग्राहक महाशयों को लेने की इच्छा हो, वे अपना ठीक पता कार्ड वा लिफाफे में लिख कर मूल्य वो डाक महसूल भेज कर मगा लेंवे ।

पुस्तक नाम	मूल्य
शक्तिवाद-व्युत्पत्तिवादादि विवृति श्रीविश्वनाथीय	१)
श्रीविश्वनाथीयलक्षणावली	१॥)
सव्यभिचार	॥)
द्वैतपरिशिष्ट पं० श्रीकेशवमिश्र रचित	१)
प्रायश्चित्तव्यवस्था पं० श्री अमृतनाथ झा निर्म्मित	।)
छन्दोगदशकर्म्म पद्धति	॥=)
नञर्थवाद	।=)
उभयाभाव पं० श्रीलोकनाथशर्म्म निर्म्मित	=)
सूर्य्यञ्जाहस्कर,, पं० श्रीसदाशिव झा निर्म्मित,, जिसमें मरण से वार्षिक तक का सकल सिद्धान्तविषय हैं	।)

मूल्य भेजने का पताः—

श्रीशिवनन्दन झा०

नै०-श्रीसङ्गमलाल झा के मकान में

महल्ला ढुण्ढिराज गणेश बनारस ।

SANSHODHAK P. SADÁSHIV JHÁ,
at Parasaramá P. O. Sukhpur,
Bhágalpur.

३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥

जागदीश्यवच्छेदकत्वनिरुक्तिः ॥

नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः, सम्भवति च लघौ धर्मे गुरौ तदभावात् प्रमेयधूमत्वकम्बुग्रीवादिमत्वघ्राणग्राह्यगुणत्वादेरतथात्वेन रूपेण साध्यतायां व्यभिचारिण्यतिप्रसंगात्। नाप्यनतिरिक्तवृत्तित्वं, प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात्। न च तथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वं तत्, अत एवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि न साधु संगच्छतइति वाच्यम्' वन्हिघटवृत्तिद्वित्वतार्णतार्णदहनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवन्हित्वादावतिप्रसंगात्। एतेनान्यूनवृत्तित्वविशेषितमपि परास्तम्। अत एव नानाप्रतियोगिवृत्त्येकप्रतियोगितांगीकारेऽपि न निस्तारः लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः। तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति चेन्न। प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात्। स्वसमानवृत्तिकं चाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकं ग्राह्यम्। तत्वञ्च स्वपर्य्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वम्। यावत्त्वादिकन्तु न तथा, पर्य्याप्तिश्चायमेको घट इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसंबन्धविशेष एव त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः। घटकं चावच्छेदकत्वं स्वरूपसंबन्धविशेषः एवं च यद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यम् । तेनोक्ताव्याप्तिनिरासः । वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसंबद्धस्वविशिष्टसामान्यकत्वं स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यम्। अत एव सत्तावान्जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य न क्षतिः। एवं स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यम् । तादृशप्रतियोगिताश्च विशिष्योपादेयाः नातो गुरोरवच्छेदकत्वं विना दुर्व्वचत्वं प्रतियोगित्वं, संबन्धित्वं च साध्यतावच्छेदकसंबन्धेन बोध्यमतो न संबन्धभेदमादाय दोषः। अभावश्च प्रतियोगिव्यधिकरणो बोध्यः। कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमनित्यतत्तद्वृत्तित्वे प्रसिद्धम् । न च मौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयं संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्वविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाववति चावृत्तेरव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यम् । धूमवान् वह्नेरित्यादावतिव्याप्तेः । न ह्युत्पत्तिकालावच्छेदेनापि महानसादौ किंचित्संयोगेन वर्तते येन वह्निमदयोगोलकनिष्ठात्यन्ताभाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वाद्यवच्छिन्नाभाववद्वृत्तित्वं धूमत्वविशिष्टस्य संभाव्येत । प्रतियोगितयोरेकसंबन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम् । यत्राधिकरणे व्यभिचारस्तदन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्धेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् । तथा च विशेषणताविशेषावच्छिन्नयद्धर्म्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्संबन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्म्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः । यत्र सद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति । गौरवप्रतिसंधानदशायामपि कंबुग्रीवादिमान् नास्तीति प्रतीतिबलात् गुरुरपि धर्म्मोऽवच्छेदकः प्रतियोगितायाः । न चास्यास्तत्प्रतियोगिकाभावमात्रमवलंबनं तथाविधयत्किंचिद्व्यक्तिसत्वएव तादृशप्रतीतेरनुदयात् । अत एवैकघटवति भूतले कंबुग्रीवादिमान् नास्तीति शब्दो न प्रमाणं प्रमाणं च घटसामान्यशून्ये। न चैवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः । गुणादिगुणकर्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितया लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात्। तत्तदवच्छेदकत्वव्यक्तीनां च प्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात्। एवं द्रव्यवत्वादिना साध्यता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यां द्रव्यत्वादेर्व्यभिचारित्वं साधु संगच्छतइत्यपि केचिदिति कृतं पल्लवितेन ॥

इत्यवच्छेदकत्वनिरुक्तेः शिरोमणिः ॥

जागदीश्या अथावच्छेदकत्वनिरुक्तिः ॥

इहानवच्छेदकत्वमित्यत्रावच्छेदकत्वमवच्छेदकत्वपदार्थः। विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य लघुनोपि न विशिष्टाभावस्य प्रतियोगितावच्छेदकत्वं गुणादावपि सत्ता नास्तीतिप्रतीतिप्रसंगात्, + पृथिवीसमवेतत्वासमनियतस्यापि च समवेतत्वस्य पृथिवीसमवेताभावप्रतियोगितावच्छेदकत्वमनतिप्रसंगात्, + एवं घटरूपत्वस्यासमनियतमपि रूपत्वं व्यधिकरणसंयोगादिसम्बन्धावच्छिन्नघटरूपाद्यभावस्य प्रतियोगितावच्छेदकमतः समनैयत्यमकिंचित्करम् + यस्यावच्छेदकत्वस्वीकारेऽतिप्रसंगाद्यभावः स एवावच्छेदक इत्याशयेनाह । संभवतीति । अतिप्रसंगाद्यनापादके लघौ संभवतीत्यर्थः। प्रमेयधूमत्वस्य तादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधूमत्वानतिरेकादाह कम्बुग्रीवेति । न च कंबुग्रीवादिमत्त्वं कंबुग्रीवादिव्यक्तिरेव सा च प्रत्येकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदिकैवेति कुतोतिव्याप्तिरिति वाच्यम्। परम्परया संस्थानगतकंबुग्रीवात्वादिजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात् । तस्य च परंपरयावच्छेदकत्वकल्पनामपेक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्धत्वस्यैवाऽवच्छेदकत्वं बोध्यमन्यथा परमाणौ गन्धत्वेन सह घ्राणग्राह्यगुणत्वस्य समनियतत्वाभावात्

लाघवेन घटत्वस्यैव साचात्तथात्वादिति भावः। ननु पृथिवीत्वतेजस्त्वादिसांकर्यात् घटत्वं यदि नाना तदा नैकमपि घटत्वं कंबुग्रीवादिमत्त्वसमनियतमत आह * घ्राणग्राह्येति। घ्राणग्राह्यगुणत्वापेक्षया लघोर्ग्राह्यगन्धत्वस्यैव प्रतियोगितावच्छेदकत्वादिति भावः। अन्यथा परमाणौ गंधत्वेन सह घ्राणग्राह्यगुणत्वस्य समनियतत्वाभावात् गंधत्वस्यैव प्रतियोगितावच्छेदकत्वाभावादिति भावः। अत्र घ्राणग्राह्यगुणत्वं घ्राणग्राह्यत्वे सति गुणत्वाव्यापकजातिमत्त्वं तेन गंधत्वस्य लघोः समनैयत्ये तात्पर्यमित्यपि कश्चित्। अतथात्वेन। प्रतियोगितानवच्छेदकत्वेन। तेन रूपेण। प्रमेयधूमत्वादिरूपेणेत्यर्थः। व्यभिचारिणि। प्रमेयत्वादौ। सपक्षवृत्तिप्रमेयत्वादौ। तेन विरुद्धे साध्यसामानाधिकरण्याभावादतिव्याप्त्यभावेपि न क्षतिः। नापीति। तादृशप्रतियोगितायास्तद्व्यक्तित्वावच्छिन्नाभाववदवृत्तित्वमपि नेत्यर्थः। तेन तादृशप्रतियोगिताप्रतियोगिकाभाववदवृत्तितया धूमत्वादेरवच्छेदकत्वाभावादतिप्रसंगसंभवात्स्वरूपसम्बंधात्मिकाया इत्यस्य न वैयर्थ्यं न वाग्रिमग्रन्थविरोध इति ध्येयम्। स्वरूपसम्बंधात्मिकाया इति। प्रतिव्यक्तिभिन्नत्वे हेतुः। तत्तदभावप्रतियोग्युभयस्वरूपाया इति तदर्थः। तत्तत्प्रतियोगिमात्रस्वरूपत्वे सामान्याभावविशेषाभावयोः प्रतियोगितायोरविशेषापत्तेरिति ध्येयम्। धूमत्वादेरपीति। तथा च धूमवान्वह्नेरित्यादौ व्याप्तिलक्षणातिव्याप्तिरिति भावः। न चेति। वाच्यमिति परेणान्वयः। तथाविधेति। यत्किञ्चित्पदं व्याप्यवृत्तिसाध्यकस्थलीयलक्षणाभिप्रायेण। तथा च तथाविधो हेतुसमानाधिकरणो यो यत्किंचिदभावस्तत्प्रतियोगितावच्छिन्नाभाववदवृत्तित्वं तदर्थः। तथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधाभावीयप्रतियोगितासामान्यशून्यत्वमप्रसिद्धं सर्वस्यैव वस्तुनस्तादृशयावत्वावच्छिन्नाभावप्रतियोगितासत्वादत उक्तं यत्किंचिदिति । समनियताभावयोरैक्यानुपगमाच्च तत्र घटादिसामान्याभावस्यैव घटीयादिसंयोगसंबंधेन प्रमेयादिसामान्याभावतया पुनर्नाप्रसिद्धिः । एकधर्मावच्छिन्नार्थकं पदं व्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तत्रभिप्रायेण । तथाविधा या एकधर्मावच्छिन्ना प्रतियोगिता तत्सामान्यशून्यावृत्तित्वमिति योजनायां यत्प्रतियोगिताया अवच्छेदकीभूतधर्मावच्छिन्नानधिकरणत्वं हेतुमतस्तत्प्रतियोगिताया अवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितासामान्यशून्यत्वं तत्रार्थ इति वस्तुगतिः । एकपदं शृङ्गग्राहिकतया तत्तदभावप्रवेशार्थमिति तु रिक्तं वचस्तन्निवेशवैयर्थ्यात् यत्किंचित्पदेनैव तल्लाभादिति ध्येयम् । यद्यपि प्रमेयवाच्यत्वादित्यादौ समवायेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः प्रमेयत्वावच्छिन्नाभावप्रतियोगितासामान्यशून्यत्वाप्रसिद्धेः तादृशाभावांतरस्य निरुक्तप्रतियोगितानवच्छेदकतायाः प्रमेयत्वे सत्वात् तथापि तादृशयत्किंचिदेकाभावप्रतियोगितात्वं यद्धर्मव्यापकतावच्छेदकं तत्त्वं विवक्षितं अस्ति च प्रमेयत्वव्यापकत्वं प्रमेयसामान्याभावप्रतियोगितायामित्यदोषः । तत् अवच्छेदत्वम् । अतएवेति । यत्किंचिदेकाभावव्यक्तेः प्रवेशादित्यर्थः । यदि सामान्याभावो नास्ति तदा वन्हिमन्निष्ठतत्तद्धूमाभावप्रतियोगितासामान्ये धूमांतरे वर्तमानतया धूमत्वस्य निरुक्तावच्छेदकत्वं न स्यादिति व्याप्तिलक्षणातिव्याप्तिनिरासार्थमेव सामान्याभावः साधयिष्यतइति । तथा च धूमसामान्याभावस्यैव हेतुसमानाधिकरणस्य प्रतियोगितासामान्यशून्ये घटादावव्त्त्या ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्वस्यावच्छेदकत्वमिति भावः। ननु तादृशप्रतियोगितान्यूनान-तिरिक्तवृत्तित्वं वाच्यं वन्हित्वं तु घटवृत्तितादृशप्रतियोगितान्यू-नवृत्त्यत आह। तार्णातार्णेति। अतिप्रसंगादिति। तथा च व्या-प्तिलक्षणासंभव इति भावः। एतेनेति क्वाचित्कं तत्र एतेन तार्णातार्णोभयाभावमादाय दत्तदोषेण सामान्याभावप्रतियोगि-त्वमेकमेव समस्तप्रतियोगिवृत्ति इति तदनतिरिक्तवृत्तेरेव धूमत्व-मतोनोक्तातिव्याप्तिरिति प्रगल्भोक्तं दूषयति। अत एवेति। उक्त-रीत्या वन्हित्वादेरवच्छेदकत्वप्रसंगादेवेत्यर्थः। ननु प्रतियोगिता-नवच्छेदकमित्यत्रावच्छेदकत्वं स्वरूपसम्बंध एव वाच्यम् स्वाव-च्छिन्नप्रतियोगिताकत्वेन साध्यतावच्छेदकं पुनर्विशेषणीयमतो गुरुधर्मेण साध्यतायां नातिव्याप्तिरत आह। लघुरूपेति। ननु घट-वान्महाकालत्वादित्यादावव्याप्तिभियैव गुरुरूपेण साध्यतायाम-तिव्याप्तिभियापि प्रतियोगिताधर्मिकोभयाभावघटितं लक्षणं वा-च्यमतस्तदपि दूषयति लघुरूपेत्यादिनेत्यपि कश्चित्। वन्हित्वा-दिलघुरूपसमनियतं यत्प्रमेयवन्हित्वादिकं तादृूप्येण साध्यता-यां धूमादावव्याप्तिरित्यर्थः। प्रतियोगितावच्छेदकेति। हेतुस-मानाधिकरणाभावप्रतियोगिताया यदवच्छेदकं तदभाववद-वृत्तित्वस्य मूलस्थप्रतियोगितावच्छेदकत्वेन विवक्षितत्वादित्यर्थः। अत्र येन संबंधेन प्रतियोगितावच्छेदकत्वं तेनैव तदभावो ग्राह्य-स्तेन धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य घटत्वादेः कालिकादिसम्बंधेनाभाववत्वात्मादौ वन्हित्वादेः समवायेनावृ-त्तावपि नोक्तावच्छेदकत्वं, न वा धूमत्वादेः संयोगादिसंबंधेन स्वाभाववति समवेतत्वेप्यवच्छेदकत्वहानिः। यत्तु साध्यता-वच्छेदकताघटकसम्बंधेन तदभावो ग्राह्य इति। तत्तुच्छम्। धूम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वप्रकारकप्रमाविशेष्यवान् वन्हेरित्यादावतिव्याप्तेः । लघुतया हेतुमन्निष्ठता दृशप्रमाविशेष्याभावप्रतियोगिता वच्छेदकीभूतस्य धूमत्वादेः स्वरूपसम्बंधेनाभाववति धूमएव तादृशप्रमाविशेष्यत्वस्य वृत्तेः । तद्वद्वृत्तित्वं च स्वरूपसंबंधे न तद्वति साध्यतावच्छेदकताघटकसम्बंधेनावर्तमानत्वं नातो धूमत्वाभावस्यैव कालिकसम्बंधेनाश्रये धूमे समवायेन स्वरूपसंबंधेन च तदाश्रये स्पंदादौ कालिकविशेषणतया धूमत्वस्य वर्तमानत्वात् ।अवच्छेदकत्वहानिः । न च तथापि समवायेन प्रमेयस्य साध्यतायां भावत्वादावतिव्याप्तिः । प्रमेयत्वरूपस्यावच्छेदकस्याभावाप्रसिद्धया प्रमेयाभावस्य लक्षणाघटकत्वादिति वाच्यम् । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मान्यूनवृत्ति तत्त्वस्यैव विवक्षितत्वात् । अत एव समवायेन सत्ताश्रयस्य साध्यत्वेपि तादृशावच्छेदकीभूतस्य सत्वस्याभाववति सामान्यादौ ;साध्यतावच्छेदकताघटकीभूतसमवायसंबंधेन वृत्तेरप्रसिद्धावपि भावत्वादिहेतौ नातिव्याप्तिः । इदं तु चिन्त्यते । तादृशप्रतियोगितावच्छेदकानतिरिक्तवृत्तिभिन्नत्वापेक्षया नञर्थद्वयाप्रवेशेन लाघवात्तादृशावच्छेदकं यद्यत्तत्तत्प्रत्येकातिरिक्तवृत्तित्वं साध्यतावच्छेदकस्य विशेषणं वक्तुमुचितम् । ननु धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यद्वन्ह्यादिनिष्ठं तार्णातार्णदहनोभयत्वं यावत्त्वं वा तदनतिरिक्तवृत्तेरव वन्हित्वादिकमिति ;व्याप्तिलक्षणमसंभवीत्यत आह+ स्वसमानेति । स्वमनतिरिक्तवृत्तित्वेनाभिमतम् । तथा च स्वसमानवृत्तिकं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं तदनतिरिक्तवृत्तित्वमर्थः । ननु स्वसमानवृत्तिकत्वं स्वान्यूनानतिरिक्तवृत्तित्वं, तथा च वन्हिनिष्ठयावत्वादेरपि समवायादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्हित्वादिसमानवृत्तित्वमेवात आह । तत्त्वं चेति । [स्वस-
मानवृत्तिकत्वं चेत्यर्थः] । पर्याप्तेति । न च वन्हित्वपर्याप्त्य-
धिकरणे यावत्येव वन्हौ वन्हिवृत्तियावत्त्वादेः पर्याप्तत्वाद्वन्हि-
त्वस्यावच्छेदकत्वं दुर्वारमिति वाच्यम् । स्वपर्याप्त्यवच्छेदकधर्मा-
वच्छिन्नपर्याप्तिकत्वस्योक्तत्वात् । वन्हित्वपर्याप्त्यवच्छेदकीभूत-
तत्तद्वन्हित्वावच्छेदेन यावत्त्वादेरपर्याप्तत्वात् । न चैवमनति-
रिक्तवृत्तित्ववैयर्थ्यं, वन्हित्वपर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्या-
प्तिकतत्तद्वन्ह्यन्यतरत्वादिकमादाय वन्हित्वस्यापि पारिभाषि-
कावच्छेदकत्वापत्तेरिति भावः । यावत्त्वादिकमिति । आदि-
ना तार्णतार्णोभयत्वादिसंग्रहः । न तथेति । न वन्हित्वपर्याप्त्य-
धिकरणपर्याप्तिकमित्यर्थः । ननु पर्याप्तिः समवायः स च ता-
र्णतार्णोभयत्वादावप्यक्षत एवेत्यत आह । पर्याप्तिश्चेति ।
अयमेको घट इति एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्याप्तिं
दर्शयितुं इमौ द्वावित्युभयवृत्तिधर्मावच्छेदेन द्वित्वस्य पर्याप्तिं द-
र्शयितुम् । अन्यथा द्वौ द्वित्ववानिति प्रतीत्योरविशेषप्रसङ्गा-
दिति भावः । न चायमेक इत्यादिप्रतीतेः समवायेनैवो-
पपत्तौ एकत्ववन्हित्वादेः पर्याप्तिसंबन्धसत्त्वे मानाभावा-
त्ताद्रूप्येण साध्यतायां व्यभिचारिण्यतिव्याप्तिरिति वाच्यम् ।
इदंत्वावच्छिन्ने एव वन्हित्वमेकत्वं च पर्याप्तं न तु द्वित्व-
मित्याद्यनुभवादेव तदभ्युपगमादिति भावः । व्यासज्यवृत्तित्व-
तदन्यत्वान्यतररूपेणैव स्वसमानवृत्तित्वोक्तावपि वन्हित्वादि-
वारणसंभवे स्वपर्याप्तीत्यादिपर्यन्तानुधावनस्य प्रयोजनमाह
त्वादिकमिति । तथा च धूमवन्निष्ठाभावप्रतियोगितावच्छे-
दकस्य वन्हिधूमघटत्रितयत्वस्य व्यासज्यवृत्तितया स्वसमानवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिकस्य तस्यैव नातिरिक्तवृत्तित्वं वन्हिधूमोभयत्वस्यापीति ताद्रूप्येण स्वसमानवृत्तिकत्वोक्तौ वन्हिधूमोभयवान् धूमादित्यादावेव व्याप्तिलक्षणाव्याप्तिः स्यादिति भावः। यद्यपि तार्णातार्णोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगितावच्छेदकताघटकसंबंधः पर्याप्तिरेव न तु समवायः तार्णमात्रसत्वेपि तार्णातार्णोभयं नास्तीति प्रतीतेः तथा च प्रतियोगितावच्छेदकताघटकपर्याप्तिसंबंधेन तादृशोभयत्वाद्यभाववति प्रत्येकवन्हौ वृत्तिमत्त्वादेव वन्हित्वादेरवच्छेदकत्वासंभवात् स्वसमानवृत्तिकेति व्यर्थम्। तथापि प्रत्येकवन्हौ पर्याप्तिसंबंधेनापि न तार्णातार्णोभयत्वादेरभावः किं तु घटादावेव । अन्यथा तत्संबंधेन प्रत्येकावृत्तिधर्मस्य तत्संबंधेन समुदायावृत्तित्वनियमात् उभयत्रैव प्रत्येकं द्वित्वाभावसत्वादिमौ न द्वावित्यपि प्रतीत्यापत्तेः । न चैवमयं द्वावित्यपि प्रत्यक्षप्रतीतिः प्रमा स्यादेकव्यक्तावपि द्वित्वस्य पर्याप्तिसंबंधेन सत्वादिति वाच्यम् । मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यादिप्रतीतेर्मूलावच्छेद्यसमवायेन कपिसंयोगाद्यवगाहित्ववदुक्तप्रतीतेरपीदंत्वावच्छेद्यपर्याप्तिसंबंधेनैव द्वित्वावगाहितया प्रमात्वायोगात् । एकव्यक्तेरिदंत्वावच्छेद्यपर्याप्तिसंबंधेन द्वित्वरहितत्वात् । अत एवायं न द्वावित्यादिप्रतीतेः प्रमात्वमुपपद्यते इदंत्वावच्छेद्यपर्याप्तिसंबंधेन यो द्वित्वस्याभावस्तद्वति तदवगाहित्वात् । न चेदंत्वावच्छेद्यपर्याप्त्यप्रसिद्धिः, एकत्ववन्हित्वादौ तत्सौलभ्यात् । एकत्वं वन्हित्वं चेदंत्वावच्छिन्ने पर्याप्तं न तु द्वित्वादिकमित्यनुभवस्य सर्वसिद्धत्वात् । न चैकस्य द्वित्वपर्याप्त्यधिकरणत्वे घटद्वयशून्येपि गृहादावत्र घटाविति प्रतीतिः प्रमा स्यादिति वाच्यम् । तद्गृहनिष्ठे घटे घटद्वयत्वाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदेन तद्गृहवृत्तित्वविरहात्। घटद्वयत्वावच्छेदेन तद्गृहवृ-
त्तित्वावगाहिन्याः प्रोक्तप्रतीतेर्भ्रमत्वात्। अत एव घटौ न तद्-
गृहनिष्ठावित्याकारकधीस्तत्र प्रमा। तद्गृहस्थितस्यापि घटस्य
घटद्वयत्वावच्छेदेन तन्निष्ठत्वाभावसंभवात्। घटपटयोर्न घट-
त्वमित्यादिप्रतीतेः प्रमात्वानुरोधेन व्यासज्यवृत्तिधर्माव-
च्छिन्नाधिकरणताकस्य प्रतियोगिमत्यपि तदभावस्य सर्वसं-
मतत्वात्। न च घटत्वादौ घटपटोभयवृत्तित्वाभाव एवोक्तप्रती-
तिविषयः सामान्यघटयोर्न समवायेन घटत्वमित्यादौ सामान्य-
घटोभयसमवेतत्वाप्रसिद्ध्या तदभावस्य भानासंभवादिति संप्र-
दायविदः। परे तु तदनतिरिक्तवृत्तित्वमत्र न तदभाववदवृ-
त्तित्वं, तथा सति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वन्हि-
धूमोभयत्वं प्रत्येकं तदभाववान्वन्हिर्धूमश्चेति तदुभयवृत्तित्व-
स्यैव वन्हिधूमोभयत्वे सत्वात् ताद्रूप्येण साध्यतायां वन्ह्यादिहे-
तावतिव्याप्त्यापत्तेः। किन्तु तादृशप्रतियोगितावच्छेदकवती या-
वती व्यक्तिस्तद्भेदकूटवदवृत्तित्वमेव तथात्वं वाच्यम्। तथा च व-
न्हिमान्धूमादित्यत्राव्याप्तिरेव तादृशावच्छेदकीभूतं यत्तार्णता-
र्णोभयत्वादिकं तद्वतो निखिलवन्हेः प्रत्येकभेदकूटवति वन्हित्व-
स्यावृत्तेरतः स्वसमानवृत्तिकत्वं देयमेवेति वदंति। तत्तुच्छम्। हेतु-
मन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मत्वं तदभाववति पर्याप्ति-
संबंधेन वन्हिधूमोभयत्वस्यावृत्तित्वादेव ताद्रूप्येण साध्यतायां
वन्हिहेतावतिव्याप्त्यभावाद् भेदकूटनिवेशव्यर्थतापातादिति।
तार्णतार्णोभयं नास्तीति प्रतीतौ प्रतियोगितावच्छेद-
के चित्तु तार्णतार्णोभयं नास्तीति प्रतीतौ प्रतियोगितावच्छेद-
कतानिर्वाहकः समवाय एव संबंधो भासते न तु पर्याप्तिः। दण्डि-
पुरुषत्वाश्रयस्य सत्वेपि तदवच्छिन्नाभाववत्तादृशोभयत्वाश्रयस्य

तार्णभिन्नस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्वेपि तादृशोभयत्वावच्छिन्नाभावो न विरुद्धस्तदवच्छिन्नाधिकरणतया सार्धमेव तस्य विरोधात् । एवं च यथाश्रुतमेव सम्यगित्याहुः । तच्चिन्त्यम् । वस्तुतस्तु समवायेन प्रमेयसाध्यके भावत्वादिहेतावतिव्याप्तिवारणार्थमवश्यं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदन्यूनवृत्ति तत्त्वमर्थो वाच्यः । तत्रान्यूनवृत्तित्वं न प्रतियोगितावच्छेदकताघटकसंबंधेन वाच्यम् । वन्हिधूमोभयवान्वन्हेरित्यादावतिव्याप्तेः । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वन्हिधूमोभयत्वं तस्य तादृशपर्याप्त्यधिकरणं यद्वन्हिधूमोभयं तत्प्रत्येकनिष्ठस्य पर्याप्तिसंबंधावच्छिन्नाभावस्य प्रतियोगित्वेन वन्हिधूमोभयत्वादिकं प्रति न्यूनवृत्तित्वात् । किंतु स्वावच्छिन्नप्रतियोगितासंबंधेनैव तथात्वं वाच्यं, तथा च वन्हिनिष्ठयावत्वतार्णातार्णोभयत्वादेरपि स्वावच्छिन्नप्रतियोगित्वसंबंधेन वन्हित्वादिकं प्रत्यन्यूनवृत्तित्वात् वन्हिमान् धूमादित्यादौ वन्हित्वादेरवच्छेदकत्ववारणाय स्वसमानवृत्तिकत्वेनावच्छेदकं विशेषणीयमिति युक्तमुत्पश्यामः । ननु प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य घटकं प्रतियोगितावच्छेदकत्वं यदि प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदा तार्णातार्णोभयत्वावच्छिन्नाभावमादाय वन्हिमान्धूमादित्यादौ वन्हित्वमपि पारिभाषिकावच्छेदकं स्यादत आह । घटकमिति । प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे गुरुरूपेण साध्यतायामव्याप्तिमपाकर्तुमाह । एवंचेति । ननु धूमत्वमेकस्मिन्नेव धूमे पर्याप्तमित्यादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छिन्नाधिकरणताकत्वावगाहितयैवोपपत्तौ धूमत्वादेः पर्याप्तिसंबंधत्वे मानाभाव इति धूमवान्वन्हेरित्यादावतिव्याप्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वपदेन धूमत्वस्य गृहीतुमशक्यत्वात् एवं सत्तात्वस्य विशिष्ट-
सत्तात्वानतिरिक्तवृत्तितया सत्त्वादिसाध्यकजातिमत्वादिहेताव-
व्याप्तिश्चेत्यत आह। वस्तुतस्त्विति । तदवच्छिन्नेति । हेतु-
मन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभावव-
त्यसंबंधि यद्धर्मविशिष्टं सामान्यं तदेव पारिभाषिकावच्छेदकमि-
त्यर्थः। अत्र तदाश्रयप्रतियोगिताकाभावेत्युक्तौ तादृशधूमत्वाश्र-
यप्रतियोगिकोभयाभावादिमति प्रमेयधूमत्वविशिष्टस्य संबद्धत-
यावच्छेदकत्वं न स्यात्किं तु गगनत्वादेरेव तथात्वं स्यादत उक्तं
तदवच्छिन्नेति। प्रतियोगित्वं साध्यतावच्छेदकसंबंधेन ग्राह्यं, ते
नायं घट एतत्त्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं
पटत्वं संबंधसामान्येन कालिकसंबंधेन वा तदवच्छिन्नाभाववति
नित्यगुणगगनादौ घटत्वत्वविशिष्टस्यासंबद्धत्वेपि नाव्याप्तिः।
पर्वतादेरुत्पत्तिकालावच्छेदेन संयोगसंबंधावच्छिन्नधूमाभावव-
त्त्वात् तत्र च धूमत्त्वविशिष्टस्य संबद्धत्वात् तदसंबद्धस्वविशि-
ष्टसामान्यकं गगनादिकमुपादाय धूमवान्वन्हेरित्यादावतिव्या-
प्तिरतः प्रतियोगिव्यधिकरणत्वेन तदवच्छिन्नाभावो विशेष्यः
प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसंबं-
धी तदवच्छिन्नाभाववान् ग्राह्य इति तु पर्यवसितार्थः। तेन सं-
योगसंबंधावच्छिन्नधूमाभाववति धूमत्पर्वतादौ समवायादिसंबं-
धेन प्रतियोगिव्यधिकरणत्वेपि धूमत्वस्य नावच्छेदकत्त्वहानिः न
वा द्रव्यं घटत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेद-
कं यद् घटभिन्नद्रव्यत्वत्त्वं प्रतियोगिव्यधिकरणे तदवच्छिन्नाभाव
वति गुणादौ द्रव्यत्त्वविशिष्टस्यासत्वेप्यव्याप्तिः। वस्तुतो निरुक्तप्र-
तियोग्यनधिकरणत्वमेव तदवच्छिन्नाभाववतः साध्यतावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबंधेन वाच्यम्। न तु प्रतियोगितायास्तत्संबंधावच्छिन्नत्वं वृत्त्यनियामकसंबंधेन साध्यतायां तत्संबंधावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिप्रसंगादिति ध्येयम्। न च घटवान्महाकालत्वादित्यादौ तादृशप्रतियोगितावच्छेदकं यद् गगनत्वं तदवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्ध्याव्याप्तिरिति वाच्यम्। अत्रापि साध्यतावच्छेदकसंबंधसामान्ये तादृशधर्मावच्छिन्नप्रतियोगिकत्वयदनुयोगिकत्वोभयाभावस्तदसंबद्धत्वस्य विवक्षितत्वात्। तदसंबद्धत्वमपि साध्यतावच्छेदकसंबंधेन संबंधत्वसामान्याभावो बोध्यः। तेन घटत्वाद्यवच्छिन्नाभाववति गगनत्वविशिष्टस्यापि यथाकथंचित्तादात्म्यादिना संबद्धतया न पारिभाषिकावच्छेदकाप्रसिद्धिनिबंधनो व्याप्तिलक्षणासंभवः। न वा तादृशप्रतियोगितावच्छेदकीभूतमहानसीयवन्हित्वावच्छिन्नाभाववति जलादौ वन्हित्वविशिष्टस्यासंबद्धत्वाद्वन्हिमान् धूमादित्यादावव्याप्तिः। मवन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्वन्हित्वावच्छिन्नाभाववति वन्हित्वविशिष्टस्य तत्तद्वन्हेरसंबद्धत्वाद्वन्हिमान् धूमादित्यादौ वन्हित्वमप्यवच्छेदकं स्यादतः सामान्यपदम्। ननु कालिकादिसंबंधेन गगनत्वविशिष्टं घटादि तस्य तादृशप्रतियोगितावच्छेदकीभूतगगनत्वाद्यवच्छिन्नाभाववति साध्यताघटकसंबंधेन संबद्धत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्या व्याप्तिलक्षणासम्भवः। न च साध्यतावच्छेदकताघटकसम्बन्धेन स्ववैशिष्ट्याभिधानान्नैष दोषः। पुरुषनिष्ठसंयोगसंबंधेन दण्डवतः कालिकविशेषणतया साध्यतायां महाकालत्वहेतावव्याप्त्यापत्तेः। गगनत्वादेः पुरुषनिष्ठसंयोगसम्बन्धेनावृत्त्या पारिभाषिकावच्छेदकाप्रसिद्धेः। न च हेतुमन्निष्ठा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावप्रतियोगितावच्छेदकत्वं यादृशसंबन्धावच्छिन्नं तेनैव संबन्धे-
न स्ववैशिष्ट्याभिधानात् घटत्वगगनत्वादौ पारिभाषिकावच्छे-
दकत्वं सुलभमिति वाच्यम् । धूमत्वप्रकारकप्रमाविशेष्यवान्वन्हे-
रित्यादौ तिव्याप्तिः । साध्यतावच्छेदकमपेक्ष्य लघोर्धूमत्वस्यैव
समवायेन हेतुमन्निष्ठसंयोगसंबन्धावच्छिन्नाभावप्रतियोगिताव-
च्छेदकतया समवायेन च धूमत्वप्रकारकप्रमाविशेष्यत्वस्यावृत्या
तस्य पारिभाषिकावच्छेदकत्वाभावप्रसंगात् । न च साध्यत्व-
तादृशप्रतियोगित्वयोरन्यतरावच्छेदकताघटकसंबन्धेनैव स्ववै-
शिष्ट्यस्य विवक्षणान्नोक्ताव्याप्त्यतिव्याप्त्योः प्रसंग इति वा-
च्यम् । तादात्म्येन धूमवतः संयोगेन साध्यतायां द्रव्यत्वादा-
वतिव्याप्त्यापत्तेः । धूमापेक्षया लघुत्वेन हेतुमन्निष्ठाभावप्रति-
योगितावच्छेदकं यद्धूमत्वं तदवच्छिन्नाभाववति तत्तत्परमा-
णौ प्रतियोगितावच्छेदकताघटकसमवायसंबन्धेन धूमविशिष्ट-
स्य परमाणोः साध्यताघटकसंयोगसंबन्धेन संबद्धतया धूमस्य
पारिभाषिकावच्छेदकत्वविरहादिति विद्वांसाहुः । यद्यत्संबन्धेन
यद्धर्मविशिष्टसामान्यं निरुक्तधर्मावच्छिन्नाभाववति साध्यता-
वच्छेदकसंबन्धेनासंबद्धं तत्तत्संबन्धेन तत्तद्धर्मावच्छिन्नविशेष्यता-
भिन्नं यत्साध्यतावच्छेदकताघटकसंसर्गावच्छिन्नं विशेष्यत्वं
तदवच्छेदकसाध्यतावच्छेदकधर्मवत्त्वस्य विवक्षितत्वान्नोक्तदो-
षः । समवायेन वन्हित्वावच्छिन्नविशेष्यतायां स्वरूपादिस-
म्बन्धेन गगनत्वावच्छिन्नविशेष्यताभिन्नत्वादेवावच्छेदकाप्रसि-
द्धिनिबन्धनासम्भवस्य व्युदासादिति । नन्वेवमपि विशिष्टस-
त्तावान् जातेरित्यादावतिव्याप्तिस्तादृशद्रव्यत्वाद्यभाववति गुणा-
दौ विशिष्टसत्वस्य सम्बद्धत्वात् । स्वस्य तादृशधर्मावच्छिन्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाववन्निष्ठसम्बन्धितानवच्छेदकत्वविवक्षया कथंचित्तत्राति-व्याप्तिवारणेपि सत्तावान् भावत्वादित्यादावतिव्याप्तिः। सत्ता-त्वाद्यवच्छिन्नाभाववति सामान्यादौ साध्यताघटकसमवायसम्बन्धित्वाप्रसिद्धेः। सत्तात्वस्य निरुक्तावच्छेदकत्वाभावात्। न च साध्यतावच्छेदकसम्बन्धसामान्ये तदवच्छिन्नाभाववद-नुयोगिकत्वयद्धर्मावच्छिन्नप्रतियोगिकत्वोभयाभावस्तत्वं विवक्षि-तमतो नोक्तदोषः। तथासति प्रमेयधूमवान्वन्हेरित्यादाव-तिव्याप्त्यापत्तेः। धूमत्वघटिततादृशोभयत्वापेक्षया प्रमेयधूमत्व-घटिततादृशोभयत्वस्य गुरुतया तदवच्छिन्नप्रतियोगित्वाप्रसि-द्धेरित्यस्वरसादाह स्वविशिष्टेति। स्वं पारिभाषिकावच्छे-दकत्वेनाभिप्रेतम्। तथा च हेतुसमानाधिकरणाभावप्रतियो-गितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छे-दकं स एव पारिभाषिकावच्छेदकः तदन्यत्वं साध्यतावच्छेदक-विशेषणमिति भावः। अत्र विशिष्टसम्बन्धित्वं साध्यतावच्छेद-कसम्बन्धेन ग्राह्यम्। तेन प्रतियोगितावच्छेदकमात्रस्यैव य-थाकथंचित्संबन्धेन यत्स्वविशिष्टसंबन्धि तन्निष्ठाभावप्रतियो-गितावच्छेदकत्वेपि न पारिभाषिकावच्छेदकाप्रसिद्धिः। अभा-वश्चात्र प्रतियोगिव्यधिकरणो बोध्यः। तेन घटत्वाद्यवच्छेदक-मात्रस्यैव स्वविशिष्टसम्बन्धिनिष्ठसंयोगसंबन्धावच्छिन्नाभावप्र-तियोगितावच्छेदकत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्या वन्हिमान् धूमादित्यादौ नाव्याप्तिः। प्रतियोगितावच्छेदक-सम्बन्धेन प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यसम्बन्धित्वं स्व-विशिष्टसम्बन्धिनो विशेषणं देयमिति तु फलितार्थः। तेनाभाव-स्यैव यथाकथंचित्कालिकादिसम्बन्धेन प्रतियोगिनः सम्बन्धि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निहत्तावपि न चतिः, न च हेतुमन्निष्ठाभावप्रतियोगिताव-
च्छेदकीभूतविशिष्टसत्तात्वादेः सत्तात्वाद्यवच्छिन्नसम्बन्धिनि-
ष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेपि सत्ता-
वान् जातिरित्यादावव्याप्तिः। तादृशाप्रतियोगित्वन्तु साध्यतावच्छे-
दकसम्बन्धावच्छिन्नं ग्राह्यम्। तेन न घटत्वादेरपि स्वविशिष्ट-
संबन्धिनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिव्यधिकरणाभावप्रति-
योगितावच्छेदकत्वेपि वन्हिमान्धूमादित्यादाववच्छेदकाप्रसि-
द्धिनिबन्धनो दोषः। वस्तुतः पूर्ववदिहापि साध्यतावच्छेदक-
संबन्धेन निरुक्तप्रतियोग्यसंबन्धित्वमेव स्वविशिष्टसंबन्धिनो
वाच्यम्। तेन हृत्यनियामकसंबन्धेन साध्यतायां तादृशसंब-
न्धावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि नाव्याप्तिः। [प्रतियोगि-
तानवच्छेदकमित्यत्रावच्छेदकत्वं हेतुसमानाधिकरणाभावप्रति-
योगितावच्छेदकताघटकसंबन्धेन बोध्यम्। तेन घटत्वादेर्वि-
षयितासंबन्धेन घटत्वादिविशिष्टस्य ज्ञानादेः संयोगेनाभावस्य
प्रतियोगिव्यधिकरणस्य घटादिविशिष्टसंबन्धिनिष्ठस्य प्रतियोगि-
ताया विषयितासंबन्धेनावच्छेदकत्वेपि न तादृशावच्छेदकाप्र-
सिद्धिः।] ननूक्तपारिभाषिकावच्छेदकद्वयस्य प्रवेशे मूलोक्तप्र-
तियोगिव्यधिकरणस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्य-
नधिकरणार्थकत्वं विफलं हेतुमन्निष्ठाभावप्रतियोगितावच्छेद-
कस्य द्रव्यत्वत्वादेर्विशिष्टसत्तात्वाद्यवच्छिन्नवन्निष्ठाभावप्रतियो-
गितानवच्छेदकत्वादेव विशिष्टसत्तावान् जातिरित्यादावतिव्या-
प्त्यभावात्। न च संयोगेन घटाद्यभावस्यैव तत्समनियतघट-
विशिष्टवाच्यत्वाद्यभावत्वात् तत्प्रतियोगित्वावच्छिन्नस्य च
वाच्यत्वस्य सर्वत्र सत्वात् प्रतियोगिव्यधिकरणस्यैवाप्रसिद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्या, यदि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्य-
प्रवेशो न स्यादिति वाच्यम् । यत्प्रतियोगित्वावच्छिन्नस्यान-
धिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकीभूतधर्मो य-
द्विशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानव-
च्छेदकस्तत्पारिभाषिकावच्छेदकमित्यस्य निर्दोषत्वात् । घटा-
भावस्य घटविशिष्टवाच्यत्वाभावस्वरूपत्वेपि तस्य घटत्वावच्छि-
न्नं यत्प्रतियोगित्वं तदाश्रयव्यधिकरणत्वस्य सुलभत्वादिति ।
न च तत्रावच्छेदकभेदेपि प्रतियोगितैक्यं युक्तं घटपटाद्यभावा-
नामप्येकप्रतियोगिताकत्वापत्तेरिति चेदत्र प्राञ्चः । यत्प्रति-
योगिताश्रयानधिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकी-
त्याद्यभिधाने वन्हिमान्धूमादित्यत्राव्याप्तिः । स्वरूपसम्बन्धा-
त्मिकायाः प्रतियोगितायाः प्रतिव्यक्तिभिन्नत्वात् । वन्हित्वाव-
च्छिन्नाभावीयं महानसीयवन्हिनिष्ठं यत्प्रतियोगित्वं तद-
वच्छिन्नानधिकरणहेतुमत्पर्वतादिनिष्ठवन्हिसामान्याभावप्रति-
योगितावच्छेदकीभूतवन्हित्वादेः स्वविशिष्टसम्बन्धिनिष्ठनिरुक्त-
प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वात् । प्रति-
योगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यप्रवेशे तु तादृ-
शप्रतियोगिताया अवच्छेदकं यद्वन्हित्वादिकं तदवच्छिन्नानधि-
करणत्वं न हेतुमतः पर्वतादेरित्यदोष इत्याहुः । परे तु प्रतियो-
गिभेदेप्येकधर्मावच्छिन्नप्रतियोगिता लाघवादेकैवेति मते वन्हि-
मान्धूमादित्यादौ नाव्याप्तिः । परं तु तद्रूपान्यत्वविशिष्टस-
त्तावान् रूपत्वादावतिव्याप्तिरेव स्याद्यदि प्रतियोगितावच्छेद-
कावच्छिन्नप्रतियोगिव्यधिकरणाभावो मौलो न स्यात्, प्रतियो-
ग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्यैव तद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नसम्बन्धिनिष्ठाभाव-
प्रतियोगितावच्छेदकत्वेन तादृशसत्तात्वस्य पारिभाषिकानवच्छे-
दकत्वादिति प्राहुः । इदन्त्ववधातव्यम् । अत्रापि लक्षणे
हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत्सम्बन्धेन यादृश-
यादृशधर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं त-
त्सम्बन्धेन तादृशतादृशधर्मावच्छिन्नविशेष्यतान्यसाध्यताव-
च्छेदकताघटकसम्बन्धावच्छिन्नविशेष्यतावच्छेदकत्वमेव सा-
ध्यतावच्छेदके द्रष्टव्यं नातः प्रागुक्तदोषाणामवकाशो न वा
महानसीयवन्हित्वादेः पारिभाषिकावच्छेदकतया तदन्यत्वस्य
वन्हित्वादावसत्वेपि वन्हिमान्धूमादित्यादावव्याप्तिः, विशि-
ष्टवन्हित्वाभिन्नस्यापि वन्हित्वस्य विशिष्टवन्हित्वावच्छि-
न्नविशेष्यतावच्छेदकत्वानपायात् । ननु घटवान्महाका-
लत्वादित्यादावव्याप्तिः गगनत्वादिविशिष्टस्य कालिकादि-
सम्बन्धेन सम्बन्ध्यप्रसिद्ध्या पारिभाषिकावच्छेदकत्वासंभ-
वात् । न च साध्यतावच्छेदकसंबन्धसामान्ये यादृशधर्मावच्छि-
न्नाभाववदनुयोगिकत्वयद्धर्मविशिष्टप्रतियोगिकत्वोभयाभावस्त-
त्वं विवक्षितं तच्च गगनत्वादौ सुलभमिति वाच्यम् । तथास-
ति प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्तेरित्युक्तत्वात् । धूमत्ववि-
शिष्टप्रतियोगिकत्वघटिततादृशोभयत्वापेक्षया प्रमेयधूमत्ववि-
शिष्टप्रतियोगिकत्वघटिततादृशोभयत्वस्य गुरुत्वेन तदवच्छिन्न-
प्रतियोगित्वाप्रसिद्धेरिति चेत्र वदन्ति । स्वविशिष्टप्रतियोगि-
त्वानिर्विशिष्योपादाय साध्यतावच्छेदकसंबन्धसामान्ये. हेतुस-
मानाधिकरणाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छि-
न्नाभाववदनुयोगिकत्वस्य यद्धर्मविशिष्टप्रतियोगिकत्वव्यक्तीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्येकस्य च द्वयोर्व्यतिरेकः स धर्मः पारिभाषिकावच्छेदकः। प्रमेयधूमत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि तत्तद्धर्मप्रतियोगिकत्वघटितोभयाभावकूटमादायैव नातिव्याप्तिः । कालो घटवान् महाकालत्वादित्यादौ च गगनत्वमेव तादृशावच्छेदकमादाय लक्षणसमन्वय इति । वस्तुतस्तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मः प्रतियोगिव्यधिकरणतदवच्छिन्नाभाववत्तावच्छेदेन साध्यतावटकसंबन्धावच्छिन्नसंबन्धितानिरूपितविशेषणतया यद्धर्मविशिष्टसंबन्धित्वसामान्याभावस्तत्वे यद्धर्मे हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोग्यनधिकरणतावच्छेदकत्वसामान्यस्य प्रकृतसाध्याधिकरणतावच्छेदकत्वनिरूपितस्वरूपसंबन्धेनाभावस्तत्वे वा स्वविशिष्टसंबन्धीत्यादिनिरुक्तेस्तात्पर्यात् । गगनत्वादौ सह जातः पारिभाषिकावच्छेदकत्वं सुलभमिति । के चित्तु तादात्म्यसाध्यतावच्छेदकान्यतरसंबन्धेन यः स्वविशिष्टसंबन्धी तन्निष्ठो यस्तदन्यतरसंबन्धेन प्रतियोगिव्यधिकरणो ऽभावस्तत्प्रतियोगितानवच्छेदकतत्कत्वमुक्तलक्षणार्थः । तथा च तादृशान्यतरतादात्म्यसंबन्धेन गगनत्वविशिष्टसंबन्धिन्याकाशे वर्तमानो गगनाभावो नैतादृशान्यतरसंबन्धेन प्रतियोगिव्यधिकरणस्तस्य तादात्म्येन प्रतियोगिसमानाधिकरणत्वात् किं तु घटाभाव एव तथेति तत्प्रतियोगितानवच्छेदकमेव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतं गगनत्वमिति तमादायैव कालो घटवान्महाकालत्वादित्यादौ लक्षणसङ्गतिः । न चैवं धूमगगनाभावान्यतरस्य संयोगेन साध्यत्वे वन्ह्यादावतिव्याप्तिः । तादृशान्यतरत्वापि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घया लघुत्वेन धूमत्वस्यैव हेतुसमानाधिकरणाभावप्रतियोगि-
तावच्छेदकत्वात्तस्य च संयोगतादात्म्यान्यतरसंबन्धेन यस्तद-
न्यतरत्वविशिष्टस्य संबन्धी गगनाभावस्तन्निष्ठस्य तादात्म्यसंयो-
गान्यतरसंबन्धेन प्रतियोगिव्यधिकरणस्य धूमाभावस्य प्रतियो-
गितावच्छेदकतया धूमगगनाभावान्यतरत्वस्य पारिभाषिका-
वच्छेदकत्वविरहादिति वाच्यम् । धूमगगनाभावान्यतरत्व-
स्याप्यखण्डस्य धूमत्वतुल्यतया तस्यैव हेतुमन्निष्ठाभावप्रतियो-
गितावच्छेदकस्य स्वविशिष्टसंबन्धिनिष्ठतादृशसंबन्धावच्छिन्नप्र-
तियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया पारिभाषि-
कावच्छेदकत्वेनातिव्याप्तिविरहादिति प्राहुस्तन्मन्दम् । रूपवा-
न्घटत्वादित्यादावव्याप्तिप्रसङ्गात् । हेतुसमानाधिकरणाभावप्र-
तियोगितावच्छेदकं यद्रूपत्वद्रव्यान्यतरत्वं तस्य तादृशसंबन्धेन
रूपत्वविशिष्टसम्बन्धिनिष्ठतादृशसंबन्धावच्छिन्नप्रतियोगिव्यधि-
करणाभावप्रतियोगितानवच्छेदकत्वेन रूपत्वस्य पारिभाषि-
कावच्छेदकत्वात् । तथाहि, तादात्म्यसमवायान्यतरसंबन्धेन
यद्रूपविशिष्टस्य संबन्धि रूपं पृथिव्यादिकं वा तत्र तादात्म्य-
समवायान्यतरसंबन्धेन प्रतियोगिव्यधिकरणो न रूपत्वद्रव्या-
न्यतरत्वावच्छिन्नाभावः समवायेन रूपे रूपत्वाख्यप्रतियोगिन-
स्तादात्म्येन च पृथिव्यादौ द्रव्यात्मकप्रतियोगिनः संबन्धित्वा-
त् + किं तु रूपत्वविशिष्टस्य तथाविधसंबन्धिनिष्ठो यः पटा-
द्यभाव एव तादृशप्रतियोगिव्यधिकरण इति रूपत्वद्रव्यान्यतर-
त्वे तत्प्रतियोगितानवच्छेदकत्वध्रौव्यात् । न च हेतुसमाना-
धिकरणस्याभावस्यापि तादृशान्यतरसंबन्धेन प्रतियोगिवैयधि-
करणस्य वक्तव्यत्वान्नैष दोषः । तथासति समवायेन घटस्य

CC-0. In Public Domain. Digitization by eGangotri

प्रमेयस्य वा साध्यत्वे तादात्म्येन हेतौ घटत्वे प्रमेये वातिप्रसङ्गादिति दिक् । अत एवेति । वस्तुतस्त्वित्यादिकल्पस्यादृतत्वादेवेत्यर्थः । यथाश्रुतस्यावच्छेदकानतिरिक्तवृत्तित्वस्यादरे तु सत्तावान् जातेरित्यादावव्याप्तिः स्यादेवेति भावः। जातिमन्निष्ठाभावप्रतियोगितायां सत्तात्वान्यूनवृत्तित्वविशिष्टसत्तात्वावच्छेद्यत्वसमवायसंबन्धावच्छेद्यत्वोभयसत्वादवच्छेद्यताघटितलक्षणस्यापि प्रागुक्तस्यापि सत्तावान् जातेरित्यादावव्याप्तिरतस्तदपि परिष्करोति । एवमिति। स्वसाध्यतावच्छेदकं अत्र स्ववैशिष्ट्यं साध्यतावच्छेदकताघटकसंबन्धेनैव वाच्यम् । तेन धूमत्वादीनां कालिकादिसंबन्धेन धूमत्वादिविशिष्टस्य घटादेः संयोगिनि वर्तमानस्याभावस्य प्रतियोगितावच्छेदकत्वेपि धूमवान्वन्हेरित्यादौ नातिव्याप्तिः । स्वविशिष्टस्य संबन्धित्वं साध्यतावच्छेदकसंबन्धेन ग्राह्यम् । तेन धूमत्वाद्यवच्छिन्नप्रतियोगितायां कालिकादिसंबन्धेन यद्धूमत्वविशिष्टस्य संबन्धि तन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वविरहेपि धूमवान् वन्हेरित्यादौ नातिव्याप्तिः । न च सामान्यतो धूमसंबन्धिनि संयोगेन सर्वस्यैवाभावसत्वाद्धूमवन्निष्ठसंयोगसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकाप्रसिद्धया कथमतिव्याप्तिरिति वाच्यम् । गोत्वत्वघटाभावत्वादेरेव तत्प्रसिद्धेः । संयोगसम्बन्धावच्छिन्नगोत्वाद्यभावप्रतियोगिताया लाघवेन गवेतरासमवेतादिभिरेवावच्छेदात् । न चैवमपि तदवच्छेद्यत्वाप्रसिद्धेरव नातिव्याप्तिः । गोत्वादिभेदप्रतियोगितायां तत्सौलभ्यात् । न हि सापि गवेतरासमवेतत्वमात्रावच्छिन्ना, गोरूपादौ गोत्वभेदासत्वप्रसंङ्गात् । यदि गोत्वत्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गवेतरासमवेत-
त्वावच्छिन्नाभावाप्रसिद्धैव नातिव्याप्तिः
त्वाद्यवच्छेद्यत्वमात्रघटिततादृशोभयत्वस्यैव लघुत्वेन प्रतियो-
गितावच्छेदकत्वादिति विभाव्यते, तदोक्तरीत्या वन्हिमान्धूमा-
दित्यादावव्याप्तिवारणार्थमेव साध्यतावच्छेदकसम्बन्धेन स्ववि-
शिष्टस्य सम्बन्धित्वं निवेश्यम् । इत्थं च निरुक्तप्रतियोग्यन-
धिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये एव साध्यवन्नि-
ष्ठाभावीयसंयोगसम्बन्धावच्छिन्न प्रतियोगितानवच्छेदकीभूत-
गोत्वत्वाद्यवच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयत्वावच्छिन्ना-
भावसत्वाद्धूमवान्वन्हेरित्यत्रैवातिव्याप्तिः गुरुतयोक्तक्रमेण
तादृशोभयत्वावच्छिन्नाभावाप्रसिद्धया वन्हिमान्धूमादित्यादा-
वव्याप्तिर्वा स्यादतः प्रतियोग्यसम्बन्धित्वेनापि स्वविशिष्टसम्ब-
न्धी सम्बन्धी विशेषणीयः । तदर्थश्च प्रतियोगितावच्छेदकसम्ब-
न्धेन प्रतियोगितावच्छेदकावच्छिन्नासम्बन्धित्वं तेन संबन्ध-
सामान्येन यत्प्रतियोगितावच्छेदकावच्छिन्नासंबन्धी वन्हि-
त्वविशिष्टसंबन्धी पर्वतादिस्तन्निष्ठस्य प्रलयोत्पन्नकर्मात्यन्ता-
भावस्य प्रतियोगितानवच्छेदकं यद्घटत्वादिकं तदवच्छेद्यत्वसं-
योगसंबन्धावच्छेद्यत्वयोश्च साधनवन्निष्ठाभावप्रतियोगितायां
सत्वेपि वन्हिमान्धूमादित्यादौ नाव्याप्तिः, न वा प्रतियोग्यसं-
बन्धिसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकीभूतविशिष्टसत्ता-
त्वाद्यवच्छेद्यत्वसमवायसंबन्धावच्छेद्यत्वयोः साधनवन्निष्ठाभा-
वप्रतियोगितायां सत्वेपि सत्तावान् जातेरित्यादावव्याप्तिप्रसङ्गः ।
प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धी यः साध्यताव-
च्छेदकावच्छिन्नसंबन्धी तन्निष्ठाभावप्रतियोगितानवच्छेदकं न
घटाद्यभावत्वगोत्वत्वादिकं तस्यापि साध्यवन्निष्ठतादृशभेदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिप्रतियोगितावच्छेदकत्वात् + किन्तु लघुसमनियतं गुरुप्र-
मेयधूमत्वादिकमेव तथा। तथा च तदवच्छेद्यत्वाप्रसिद्ध्या वन्हि-
मान्धूमादित्यादावसम्भवोव्याप्तिर्वेत्यतः साध्यवन्निष्ठाभावप्रति-
योगित्वमपि साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यं तेन सं-
योगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वा-
द्यवच्छेद्यत्वप्रसिद्धेरेव लक्षणसम्भवः । वस्तुतः प्रागुक्तयुक्त्यात्वा-
ऽपि साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसंबन्धिसाध्यतावच्छे-
दकावच्छिन्नसम्बन्धिनो वक्तव्यम् + नतु प्रतियोगितापि ता-
दृशसंबन्धावच्छिन्ना ग्राह्या । नन्वेवमपि साध्यतावच्छेदक-
संबन्धेन प्रतियोग्यसंबन्धिसाध्यतावच्छेदकावच्छिन्नसंबन्धिनि-
ष्ठाभावाप्रसिद्ध्या विभुत्वविशिष्टघटवान्महाकालत्वादित्यादाव-
व्याप्तिः । महाकालान्यत्वघटत्वावच्छिन्नाभावस्यैव तादृशस्य
कथंचिन्महाकाले प्रसिद्ध्या तत्राव्याप्तिवारणेपि तद्वन्हीयसंयो-
गसंबन्धेन वन्हेः साध्यतायां सद्धेतावव्याप्तिः । तत्संबन्धेन य-
त्प्रतियोगिसंबन्धि तदन्यत्वस्य तद्वन्हिमत्यभावात् । महाका-
लनिरूपितविशेषणतया घटादेः साध्यतायां महाकालत्वहेता-
वुक्तक्रमेणाप्यव्याप्तिवारणासम्भवाच्च + तेन संबन्धेन यः प्रति-
योगिसंबन्धी तदन्यत्वस्य महाकाले विरहात् । न च साध्य-
तावच्छेदकसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नसंबन्धि
यत्किञ्चिद्वृत्त्यनुयोगिकत्वयादृशप्रतियोगितावच्छेदकावच्छिन्ना-
प्रतियोगिकत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकावच्छि-
न्नत्वं निवेश्यमतो गगनाभावद्वारैव प्रसिद्धिरिति वाच्यम् । स्व-
रूपसंबन्धेन गगनादेर्वृत्तिमत्वपक्षे एव प्रतियोगिताधर्मिकोभ-
याभावगर्भनिरुक्त्यादरात् + तत्र गगनाभावमादाय प्रसिद्ध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भवात् । कालिकविशेषणतायां गगनत्वावच्छिन्नप्रतियोगिकत्वसाध्यवन्महाकालानुयोगिकत्वयोः सत्वादिति चेदेतदस्वरसेनैव प्रतियोगितयोरित्यादिना प्रतियोगिवैयधिकरण्यमुपेक्ष्य लक्षणान्तरं रचयतइत्येके । परे तु निरुक्तप्रतियोग्यसम्बन्धिप्रकृतसाध्यवन्निष्ठाभावप्रतियोगितायां यद्यद्धर्मावच्छेद्यत्वसाध्यताघटकसम्बन्धावच्छिन्नत्वोभयाभावः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणप्रकृतहेतुमन्निष्ठाभावप्रतियोगितासामान्येपि तादृशोभयाभावकूटवत्त्वं विवक्षितम् । अस्ति च समवायाद्यवच्छिन्नघटाद्यभावप्रतियोगितायां यत्कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावत्वं तदेव प्रतियोग्यनधिकरणमहाकालनिष्ठाभावप्रतियोगितासामान्येपीति घटवान्महाकालत्वादित्यादौ नाव्याप्तिः । यद्यदिति वीप्साबलात् निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये एव गुणत्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयाभावसत्वेपि धूमवान्वन्हेरित्यादौ नातिव्याप्तिः । धूमत्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयाभावस्यापि तादृशत्वेन तस्यैव प्रतियोग्यनधिकरणवन्हिमन्निष्ठाभावप्रतियोगितासामान्ये विरहात् संयोगसम्बन्धावच्छिन्नधूमाभावप्रतियोगितायां तदसत्वादित्याहुः । ननु स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकेत्यत्रानवच्छेदकत्वं न तादृशावच्छेदकप्रतियोगिकभेदमात्रं धर्ममात्रस्यैव तादृशयत्किञ्चिदवच्छेदकभिन्नत्वेन व्याप्तिलक्षणासम्भवप्रसंगात् + किं तु तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताको भेदस्तथा चावच्छेदकत्वगर्भाया निरुक्तेः प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्तिः । अव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेद्यत्वगर्भायास्तु प्रमेयवन्हिमान्धूमादित्यादावव्याप्तिः । प्रमे-
यवन्हित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकवृत्ति-
प्रतियोगितायाः लाघवेन वन्हिमन्निष्ठाभावप्रतियोगितावच्छेद-
कत्वेनैवावच्छेदादत आह । प्रतियोगिताश्चेति । तादृशाव-
च्छेदकनिष्ठप्रतियोगिताव्यक्तयोर्विशिष्यतत्तदवच्छेदकत्वावच्छि-
न्नत्वेन प्रवेशनीया न त्वनुगततादृशावच्छेदकत्वावच्छिन्नत्वेन,
यतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेर्दुर्वचत्वं स्यादित्यर्थः । स्व-
विशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगिता विशिष्योपादाय तत्त-
त्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटवत्वं निवेशनीयमिति
त्वपव्याख्यानम् । तत्तत्प्रतियोगिताविशेषितावच्छेदकत्वव्य-
क्तीनां वास्तविकतत्तदवच्छेदकत्वव्यक्तीरपेक्ष्य गुरुत्वेन तत्प्रति-
योगितानिरूपितावच्छेदकत्वावच्छिन्नभेदानामप्यप्रसिद्ध्या दु-
र्वचत्वतादवस्थ्यात् । यदि च समनियतनानाधर्मावच्छिन्नप्र-
तियोगित्वस्य भेदे मानाभावस्तदा तत्तत्प्रतियोगितावच्छेदक-
त्वावच्छिन्नभेदकूटस्य प्रवेशेपि न क्षतिः । तत्तत्प्रतियोगि-
तावच्छेदकत्वस्य तत्तदवच्छेदकत्वसमनैयत्याभावेन गुरुत्वस्या-
किञ्चित्करत्वादिति ध्येयम् । सम्बन्धभेदमिति । इदं च
प्रागेव निरुक्तव्याख्यायां प्रपञ्चितम् । ननु प्रतियोग्यनधिक-
रणहेतुमन्निष्ठाभावप्रतियोगितायाः संयोगत्वावच्छेद्यत्वेपि सं-
योगत्वस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदक-
त्वाभावात् संयोगीसत्वादित्यत्रातिव्याप्तिरत आह । अभावस्ये-
ति । निरुक्तित्रयेपीति शेषः । तथा च निरुक्तप्रतियोग्यनधि-
करणस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं सं-
योगत्वेप्यक्षतमिति हेतुमन्निष्ठाभावप्रतियोगितायाः तदवच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यत्वादेव नातिव्याप्तिरिति भावः । नन्वेवं गोमान्महा-
कालत्वादित्यत्राव्याप्तिः । गोत्वविशिष्टसम्बन्धिनिष्ठस्याभाव-
मात्रस्यैव साध्यताघटककालिकसम्बन्धेन प्रतियोगिसमानाधि
करणतया स्वविशिष्टसम्बन्धिनिष्ठप्रतियोग्यसमानाधिकरणा-
भावप्रतियोगितावच्छेदकत्वाप्रसिद्धेरत आह । कालिकेति ।
तथा च स्वावच्छिन्नाधिकरणसाध्यवत्खण्डकालनिष्ठाभावप्र-
तियोगितावच्छेदकतयैव तत्तद्व्यक्तित्वे निरुक्तावच्छेदकत्वं सुल-
भमिति भावः । ननु हेतुमन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्न-
प्रतियोगितावच्छेदकमात्रस्यैव घटत्वादिविशिष्टसंबन्धिनिष्ठा-
भावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात्पारिभा-
षिकावच्छेदकाप्रसिद्ध्या वन्हिमान्धूमादित्यादावव्याप्तिवारकं
द्वितीयनिरुक्तावभावे प्रतियोगिवैयधिकरण्यं प्रवेश्य तामवच्छे-
द्यत्वघटिततृतीयनिरुक्तावपि हेतुमन्निष्ठाभावप्रतियोगितासा-
मान्य एव धूमत्वविशिष्टसम्बन्धिनिष्ठाभावीयसंयोगसम्बन्धाव-
च्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वाभावात्
धूमवान्वन्हेरित्यादावतिव्याप्तिवारणार्थमभावे तद्विशेषणं दी-
यताम्, प्रथमनिरुक्तौ तु प्रतियोगिवैयधिकरण्यमभावविशेष-
णं किमर्थमित्याशंक्यते नचेति । वाच्यमिति परेणान्वयः ।
संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणं मौलस्य फलम् । अन्य-
थोपपादयति संयोगत्वावच्छिन्नेति । वृत्तेरिति । अव्या-
प्त्युनवकाशादित्यग्रेऽन्वयः । संयोगिसत्वादित्यादावतिव्याप्ति-
वारणमिदमीयस्य फलमन्यथाकुरुते गुणादीति । द्र-
व्यत्वत्वं द्रव्यान्यासमवेतत्वविशिष्टसकलद्रव्यसमवेतत्वं तच्च
न समवायसम्बन्धेनाभावस्य प्रतियोगितावच्छेदकं लाघ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येन द्रव्यान्यासमवेतत्वस्यैव तत्वादित्यतस्तथैवाह । द्रव्यमात्रेति । द्रव्यान्यासमवेतइत्यर्थः । अवृत्तेरिति । अतिव्याप्त्यनवकाशादिति योजना । धूमवानिति संयोगेन द्रव्यानामव्याप्यवृत्तितया धूमत्वावच्छिन्नाभाववत्यपि धूमत्वादिविशिष्टस्य सत्वाद्दिति भावः । ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदयोगोलकासंयुक्तत्वं धूमत्वविशिष्टस्य तदवच्छिन्नाभाववदवृत्तित्वादेव नातिव्याप्तिरत आह । न हीति । इत्थंचावच्छेदकनिरुक्तौ प्रतियोगिवैयधिकरण्यप्रवेशे मूलोक्तहेतुसमानाधिकरणाभावेपि तदवश्यमन्यथा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतसंयोगत्वाद्यवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्याव च्छिन्नस्याधिकरणे गुणादौ संयोगत्वादिविशिष्टस्यावृत्तेः संयोगी द्रव्यत्वादित्यादावव्याप्तिरिति भावः । लाघवमभिप्रेत्याह । प्रतियोगितयोरिति । मौलेदमीयप्रतियोगितयोरित्यर्थः । तथा च हेतुमन्निष्ठाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकीभूतयत्किंचिद्धर्मावच्छिन्नतत्तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववदसम्बन्धस्वविशिष्टसामान्यकत्वं प्रथमस्य तु स्वविशिष्टसम्बन्धिनिष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतहेतुसमानाधिकरणाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वमर्थः । तत्तत्संबन्धावच्छिन्नप्र्यवसन्नस्यैकसम्बन्धावच्छिन्नत्वस्याननुगमाद्विशेषणताविशेषावच्छिन्नत्वप्रवेशावश्यकत्वेन सम्बन्धान्तरप्रवेशे गौरवात्तदपेक्षया लाघवाच्चाह । विशेषणतेति । अभावीयविशेषणताया लक्षणघटकत्वमभिप्रेत्याह । तदन्यत्वे इति । प्रमाविषयत्वीयविशेषणताया स्तथात्वमभिप्रेत्याह । तदन्यत्वप्रकारेति । साध्यवत्वस्याव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्योपस्थितिकृतया तद्घटितधर्मस्योपस्थितिलाघवात्तमादायै-वातिव्याप्तिवारणं सुघटमित्याशयेनाह । साध्यवत्त्वेति । न-न्वेवं विशेषणताविशेषावच्छिन्नप्रतियोगितासामान्ये यद्धर्मवि-शिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकीभूतधर्मावच्छि-न्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावः । साध्यता-वच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नो हेतुव्यापक इत्युक्तक्रमेण ल-तीयार्थः फलितः । तथा च विशेषणताविशेषावच्छिन्नप्रति-योगितासामान्यएव साध्यतावच्छेदकीभूतसंयोगसम्बन्धाव-च्छिन्नत्वाभावेन तादृशोभयाभावसत्वात् धूमवान्वह्नेरित्यादा-वतिव्याप्तिः । न च हेतुमन्निष्ठाभावप्रतियोगितायां विशेषण-ताविशेषावच्छिन्नत्वं न देयमिति वाच्यम् । वह्निमत्वप्रकार-कप्रमाविशेष्यत्वादीनां संयोगादिसंबन्धेनाभावस्य हेतुमति सत्वे-न वह्निमान् धूमादित्यादौ सर्वत्रैवाव्याप्तिप्रसङ्गादित्यतः सा-ध्यतावच्छेदकसंबन्धावच्छिन्नत्वांशपरित्यागेन तृतीयस्यार्थं नि-ष्कृष्य दर्शयति । तथाचेत्यादिना । यद्धर्मेति । यत्पदं साध्य-तावच्छेदकपरम् । तत्संबन्धावच्छिन्नेति । विशेषणतावि-शेषावच्छिन्नेत्यर्थः । अत्र प्रतिपदव्यावृत्तिरुक्तादिशा बोध्या । न-च निरुक्तप्रतियोगितासामान्ये यद्धर्मविशिष्टसंबन्धिनिष्ठाभावी-यविशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकावच्छेद्यत्वं सा-धने तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्तिरस्तु-त्विति वाच्यम् । सामान्यपदस्य व्यापकतावाचित्वेन निरुक्तप्र-तियोगितात्वव्यापकावच्छेदकं यद्धर्मावच्छिन्नवन्निष्ठविशेषण-ताविशेषावच्छिन्नाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वमित्य-र्थपर्यवसानेन प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः । प्रमे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यधूमवन्निष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यत्वस्य गुरुधर्मत-
या वन्हिमन्निष्ठाभावप्रतियोगितात्ववन्निष्ठाभावप्रतियोगिता-
नवच्छेदकत्वेन तादृशप्रतियोगितात्वव्यापकतावच्छेदकत्वात् ।
अस्माकं तु प्रमेयधूमत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानव-
च्छेदकं यदयःपिण्डभेदत्वं तदवच्छेद्यत्वाभावस्यैव साधनवन्नि-
ष्ठाभावप्रतियोगितात्वव्यापकत्वाभावेनातिव्याप्त्यभावात् । एतेन
साधनसमानाधिकरणाभावसामान्ये यद्धर्मावच्छिन्नसमानाधि-
करणाभावत्वं तादृशाभावप्रतियोगितासामान्ये वा यद्धर्मावच्छि-
न्नसमानाधिकरणाभावप्रतियोगितात्वं साधने तद्धर्मावच्छिन्न-
सामानाधिकरण्यं व्याप्तिर्लाघवादित्यपि प्रत्युक्तमिति ध्येयम् ।
साध्यसाधनभेदेन व्याप्तेर्भिन्नतया प्रमेयवन्हित्वादिना गुरुध-
र्मेण साध्यतास्थले एव साध्यतावच्छेदकावच्छेद्यत्वाप्रसिद्ध्या
प्रोक्तक्रमेण व्याप्तिर्वाच्या वन्हिमान्धूमादित्यादौ तु लघुरू-
पेण साध्यतास्थले हेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सं-
न्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावघटितैव सा वक्तव्या
शब्दैक्यस्याकिंचित्करत्वादित्याह यत्र सद्धेतुविशेष इति । न-
व्यमतमुपन्यस्यति । गौरवेति । यादृशप्रतीत्या गुरोरवच्छेदकत्व-
प्रसिद्धिः तादृशबुद्धौ गौरवज्ञानस्य यदि विरोधित्वं स्यात्तदा मा-
नाभावाद्गुरोरवच्छेदकत्वं न स्यात् न चैतदस्तीति भावः ।
यद्यपि गौरवज्ञानमात्रं नावच्छेदकत्वधीप्रतिबन्धकं, विशिष्टस-
त्तात्वस्य द्रव्यत्वत्वापेक्षया गुरुत्वग्रहेपि विशिष्टसत्ता नास्तीति
प्रतीत्या तदवच्छेदकत्वग्रहस्य प्राचैः स्वीकृतत्वात् । न च तद्ध-
र्मसमानाधिकरणधर्मधर्मिकस्तदपेक्षया लघुत्वग्रहस्तद्धर्मस्याव-
च्छेदकत्वधीप्रतिबन्धकः, नीलधूमत्वसमानाधिकरणधूमत्वे तद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेक्षया लघुत्वग्रहेऽपि नीलधूमो नास्तीति प्रतीत्या नीलधूमत्वस्यावच्छेदकत्वावगाहनस्य सर्वसम्मतत्वात् नापि तद्धर्मसमनियतधर्मधर्मिक एव तद्धर्मापेक्षया लघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबन्धक इति साम्प्रतम् । घटज्ञानत्वापेक्षया लघुनोऽपि ज्ञानत्वस्य घटज्ञानत्वसमनियतत्वाभावाद् गुरुणोऽपि घटज्ञानत्वस्य संयोगसंबन्धावच्छिन्नघटज्ञानाभावस्य प्रतियोगितावच्छेदकत्वापत्तेः। तथापि संसर्गमर्यादया प्रतियोगितावच्छेदकत्वग्रहं प्रति तादात्म्येन कम्बुग्रीवादिमत्त्वरूपगुरुधर्मः प्रतिबन्धक इति न कदाचिदपि तेष्ववच्छेदकत्वग्रह इति प्राचां तात्पर्यम् । वस्तुतः संसर्गमर्यादया कंबुग्रीवादिमत्त्वावच्छेद्यप्रतियोगिताकत्वावगाहिज्ञानसमानविशेष्यत्वप्रत्यासत्त्या कंबुग्रीवादिमत्त्वापेक्षया लघुधर्मावच्छिन्नप्रतियोगिताकत्वज्ञानत्वेनैव प्रतिबन्धकत्वं प्राचामभिप्रेतम् तथा च जलादौ निर्वन्हित्वस्याग्रहदशायां वन्हिभ्रमस्येव तदुक्तक्रमेण गौरवस्याग्रहदशायामपि कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वेन तादृशग्रहो जायतएव । अन्यथा कम्बुग्रीवादिमान्नास्तीति धियो बाधनिश्चयविधया विशिष्टधीविरोधित्वानुपपत्तेः । कंबुग्रीवादिमत्त्वावच्छिन्नस्य विशिष्टबुद्धौ तदवच्छिन्नप्रतियोगिताकत्वेनाभावनिश्चयस्य विरोधित्वादिति ध्येयम् । प्रतीतिर्बलमवच्छेदकत्वावगाहित्वं गुरुरपीति । तथा च स्वरूपावच्छेदकत्वघटितं मूलोक्तं यथाश्रुतमेव लक्षणं सम्यक् । प्रमेयधूमत्वादेस्तादृशावच्छेदकत्वेन व्यभिचारिण्यतिव्याप्तिविरहादिति कतं पारिभाषिकावच्छेदकत्वनिर्वचनेनेति भावः । ननूक्तज्ञानस्य विरोधित्वात्तादृशप्रतीत्यावच्छेदकत्वं नावगाह्यते परन्तु का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्बुग्रीवादिमन्निष्ठप्रतियोगिताकाभावमात्रमित्याशंक्य निषेधय-ति । नचेति । अवलम्बनं विषयः । तथाविधेति । कम्बुग्रीवादिमत्त्वाश्रयेत्यर्थः । ताहशप्रतीतेः । कम्बुग्रीवादिमान्नास्तीत्याकारकप्रतीतेः । अनुदयादिति । तथा च त्वन्मते कंबुग्रीवादिमदन्तरस्याभावमादाय तदुदयप्रसंग इति भावः । ननु तथाविधयत्किंचिद्व्यक्तिनिर्णये स एव प्रतिबन्धकः । अन्यथा विशेषादर्शनदशायां तत्रापि कंबुग्रीवादिमान्नास्तीति प्रतीतिर्जायतएव तत्रेत्यत आह । अतएवेति । गुरुधर्मस्यावच्छेदकत्वादेवेत्यर्थः । न प्रमाणमिति । कंबुग्रीवादिमत्त्वावच्छिन्नाभावप्रकारत्वेन ताहशान्वयबोधो भ्रम इति ताहशशब्दस्य भ्रमजनकत्वेनाप्रमाणत्वम् । त्वन्मते च कंबुग्रीवादिमत्प्रतियोगिकाभावशून्यताया घटवत्यभावात् । ताहशप्रतीतेर्न भ्रमत्वमिति ताहशशब्दोप्यप्रमाणं न स्यादित्यर्थः । ननु भ्रमत्वस्य प्रकारभेदेन भिन्नत्वात्सर्वत्र तदभाववद्विशेष्यकत्वं न भ्रमत्वघटकं समवायेन गगनादिभ्रमेपि तन्निवेशवैयर्थ्यात् । तथा च तत्रैव प्रकृतेपि कंबुग्रीवादिमत्प्रतियोगिकाभावप्रकारतामात्रेण ताहशान्वयबोधो भ्रमो भविष्यतीत्याह । प्रमाणं चेति । तथा च तत्रापि कंबुग्रीवादिमान्नास्तीति शब्दः प्रमाणं न स्यादित्यकामेनापि प्रकृते भ्रमत्वं तदभाववद्विशेष्यकत्वघटितं वाच्यमिति भावः । धूमो न वन्हिव्याप्य इत्यादेर्वन्हिव्याप्त्यभावकूटार्थकत्ववत् कंबुग्रीवादिमान्नास्तीत्यादावपि कंबुग्रीवादिमत्प्रतियोगिकाभावकूटबोधकत्वादेव ताहशशब्दस्याप्रामाण्याद्युपपत्तिरन्यथा धूमालोकसाधारणानुगतव्याप्तेरभावादालोकगर्भव्याप्तित्वावच्छिन्नाभावस्य धूमे सत्वात्तमादाय धूमो न वन्हिव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्य इति वाक्यस्याप्रामाण्यापत्तेः । एवं गुरुधर्मस्यानवच्छेदकतया-
तादृशधर्मावच्छिन्नविशिष्टबुद्धिं प्रति तादृशधर्माश्रयप्रतियोगि-
काभावकूटवत्तानिश्चयत्वेनैवानन्यगत्या विरोधित्वकल्पनात् +
कंबुग्रीवादिमान्नास्तीति दशायां कंबुग्रीवादिमदस्तीति ज्ञान-
विरोधोपि घटतइति प्राचीनमतनिर्भरः । अतो गुरुधर्मस्या-
नवच्छेदकत्वे व्याप्तेरपि दुर्वचत्वमित्याह न चेदेवमिति । लच्छिव-
ति । द्रव्यं गुणादिविशिष्टसत्त्वाद्वा इत्यादौ द्रव्यत्वसमनियतानां
गुणत्वविशिष्टसत्तादीनामित्यर्थः । अव्याप्तिमुपपादयति ।
गुणादीति । ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वव्य-
क्तीनां तत्तद्व्यक्तित्वेनाभावकूटवत्त्वमेव साध्यतावच्छेदकांशे नि-
वेश्यमतो नोक्तदोषोत आह + तत्तदिति । यद्यपि गुरोरव-
च्छेदकत्वपक्षेपि स्वस्वप्रतियोगिव्यधिकरणाभावघटितव्याप्तेस्त-
त्प्रतियोगितागर्भत्वेन दुर्ज्ञेयत्वम् । तथापि व्याप्यवृत्तिसा-
ध्यकस्थलीयव्याप्तेरभिप्रायेणेदम् । तत्र प्रतियोगिवैयधिकरण्या-
प्रवेशात् । निरवच्छिन्नहेत्वधिकरणवृत्तिकाभावप्रतियोगितानव-
च्छेदकत्वमेव सर्वत्र व्याप्तिप्रविष्टमित्याशयेनेदमिति तु परमा-
र्थः । तेनाव्याप्यवृत्तिसाध्यकस्थलेपि व्याप्तेर्दुर्ज्ञेयत्वमिति ध्ये-
यम् । द्रव्यत्ववत्त्वेति । द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वा-
पत्त्या द्रव्यत्वत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्व-
स्य गुरुतया तदवच्छिन्नाभावप्रसिद्धेरिति भावः । ननु हेतुम-
न्निष्ठाभावप्रतियोगितावच्छेदकीभूतयत्किञ्चिद्धर्मावच्छिन्नाभा-
ववदसम्बन्धस्वविशिष्टसामान्यकभिन्नं स्वविशिष्टसम्बन्धिनि-
ष्ठाभावीयप्रतियोगितावच्छेदकीभूततादृशधर्मावच्छिन्नत्वं य-
त्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र-

वा दुर्ज्ञेयत्वाभावात्तथैव व्याप्तिर्वाच्येत्यत आह । उपदर्शितेति । स्वत्वादित्यादिना व्यापकतापर्यवसन्नत्वस्य तत्तदवच्छेदकत्वाभावगर्भसामान्यत्वस्योपग्रहः । अत एव गुरोरवच्छेदकत्वादेव सङ्गच्छतइति । अन्यथा ग्राह्यगन्धत्वापेक्षया गुरुत्वेन घ्राणग्राह्यगुणत्वावच्छिन्नाभावाप्रसिद्ध्या तद्वद्वृत्तित्वं व्यभिचरितत्वं तत्र न स्यादिति भावः । यद्यपि साध्यव्यापकतावच्छेदकधर्माविच्छिन्नाभाववद्वृत्तित्वमेव व्यभिचारः । स च ग्राह्यगन्धत्वावच्छिन्नाभाववद्वृत्तित्वेनैव तत्र सुलभ इत्यपि शक्यते वक्तुं तथापि तद्बुद्धेः प्रकृतसाध्यानुमित्यविरोधितया हेत्वाभासता न स्यात् । यद्विषयकत्वेन यादृशानुमानविरोधितत्वं तस्यैव तत्र तथात्वादिति भावः ॥

इति श्रीजगदीशविरचितावच्छेदकत्वनिरुक्तिः समाप्ता ॥

इत्यवच्छेदकत्वनिरुक्तिप्रकरणं सम्पूर्णम् ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

श्रीहयग्रीवायनमः।

॥ सत्प्रतिपक्ष शतकोटिः ॥

पक्षतावच्छेदकविशिष्टपक्षविषयकत्वाव्यापक साध्यतावच्छेदक विशिष्टसाध्यविषयकत्वाव्यापक पक्षतावच्छेदकावच्छिन्न विशेष्यतानिरूपित साध्यतावच्छेदकावच्छिन्न प्रकारताशाल्यनुमितित्वव्यापक यद्धर्मावच्छिन्न प्रतिबध्यतानिरूपित प्रतिबन्धकतावच्छेदिकासती तद्धर्मावच्छिन्न प्रतिबध्यतानिरूपित प्रतिबन्धकतावच्छेदक विषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपित जनकतावच्छेदिका यद्रूपावच्छिन्नविषायता तद्रूपावच्छिन्नत्वमिति सत्प्रतिपक्षलक्षणम्। अस्यायमनुगमः-निरुक्तप्रतिबध्यताविशिष्टधर्मवत्त्वम्। प्रतिबध्यतावैशिष्ट्यंचाधेयतासम्बन्धेन। आधेयताच स्वनिष्ठावच्छेदकताक प्रतियोगिताकभेदवत्त्व सम्बन्धावच्छिन्ना। स्वनिष्ठावच्छेदकताच स्वसमानाधिकरण भेदप्रतियोगितावच्छेदकत्व सम्बन्धावच्छिन्ना। स्वाधिकरणत्वंच स्वावच्छिन्नविषयताशाल्यनाहार्या प्रामाण्यज्ञानानास्कन्दित निश्चयत्वसम्बन्धेन। भेदप्रतियोगितावच्छेदकताच स्वनिरूपितप्रतिबन्धकतावत्त्व स्वावच्छेदकावच्छिन्न प्रतिबध्यतानिरूपित प्रतिबन्धकतावच्छेदक विषयित्वावच्छिन्नानुमितिनिष्ठ जन्यतानिरूपित जनकत्वोभयसम्बन्धेनेति।

अथात्र ह्रदोवह्निमानित्यादौ वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्ध्रदेतिव्याप्तिः, तद्विषयताया निरुक्तप्रतिबन्धकत्व जनकतावच्छेदकत्वयोस्सत्वात। ॥ १ ॥

नच स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदक यद्रूपावच्छिन्नविषयकत्वं अनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नाघटितत्वरूप विशिष्टान्तराघटितत्वस्य मेयत्वविशिष्ट स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रतिपक्षेऽतिव्याप्तिवारणायावश्यं निवेशनीयतया ततएव नोक्ता-तिप्रसंगः, उक्तविशिष्टस्य वह्न्यभाववद्ध्रदरूपताद्दश विशिष्टान्तरघटितत्वा दिति वाच्यम् ॥ २ ॥ बाधघटितसत्प्रतिपक्षे ऽव्याप्तिवारणाय विशिष्टान्त रविषयितायां प्रकृतानुमिति प्रतिबन्धकतानतिरिक्त वृत्तित्ववज्जनक तानातिरिक्तवृत्तित्वस्यापि निवेशनीयतया उक्तातिप्रसङ्गतादवस्थ्यात् । वह्न्यभाववद्ध्रदविषयकत्वस्य प्रतिबन्धकतानतिरिक्त वृत्तित्वेपि ज-नकतानतिरिक्त वृत्तित्वविरहात् । ॥ ३ ॥

नच यद्रूपावच्छिन्नविषयकत्वं निरुक्तविरोध्यनुमिति जनकता नतिरिक्तवृत्ति ताद्दशरूपान्तराघटितत्वस्य विवक्षणेपि मेयत्वविशि ष्ट सत्प्रविपक्षातिव्याप्तिवारणसम्भवान्निरुक्त विशिष्टेनातिव्याप्तिरि-वाच्यम् ॥ ४ ॥ वह्न्यभावव्याप्य वह्न्यभावव्याप्यव्याप्यवद्ध्रदरूप सत्प्रति पक्षाव्याप्तिवारणाय प्रतिबन्धकतानातिरिक्त वृत्तित्वस्यापि विशिष्टा न्तरविषायितायां निवेशनीयतया उक्तविशिष्टेतिव्याप्ते दुर्वारत्वात् ॥ ५ ॥

नच सत्यंतघटकप्रतिबन्धकतायां निरुक्तजनकतावच्छेदक वि षयितात्वव्यापकावच्छेदकताकत्व निवेशान्नोक्तातिप्रसङ्गः , प्रत्येक ज्ञानीयवह्न्यभाव व्याप्यव्याप्यवद्ध्रद विषयितायां निरुक्तजनकताव-च्छेदिकायां निरुक्तप्रतिबन्धकतावच्छेदकत्व विरहादिति वाच्यम् ॥ ६ ॥ निरुक्तजनकतावच्छेदक सत्प्रतिपक्षोन्नायक विषयितायां सत्प्रतिप क्ष ज्ञानप्रतिबन्धकतावच्छेदकत्व विरहेणासम्भव प्रसंगेन निरुक्त परिष्कारासम्भवात् । ॥ ७ ॥

नच यत्किञ्चिज्जनकतावच्छेदकविषयितात्वव्यापकावच्छेदक-ताकत्वनिवेशान्नासम्भवः , सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतावच्छेदक तायां तज्ज्ञानीय जनकतावच्छेदक विषयितात्व व्यापकत्व सत्वात् ।

नच यत्किञ्चित्त्वनिवेशा दननुगम इति वाच्यम् । स्वविशिष्ट प्रतिबन्धकतात्वसंबन्धावच्छिन्नत्वेन पूर्वोक्तभेद प्रतियोगितावच्छेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कताया विवक्षणीयत्वात् । स्वविशिष्टत्वं स्वनिरूपितत्व स्वावच्छेदकावच्छिन्न प्रतिबध्यता निरूपित प्रतिबन्धकतावच्छेदक विषयित्वावच्छिन्नानुमिति निष्ठजन्यतानिरूपितजनकताविशिष्ट त्वोभयसम्बन्धेन । जनकताविशिष्टत्वं स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकताच – स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्ना।स्वाधिरणत्वंच स्वावच्छेदकविषयितात्वसम्बन्धेन। भेदप्रतियोगितावच्छेदकताच - स्वावच्छेदकत्वसम्बन्धावच्छिन्नेति वाच्यम् ॥ ८ ॥ जनकतावच्छेदिकायां सामानाधिकरण्य विषयितायां सत्प्रतिपक्षज्ञानीय प्रतिबन्धकतावच्छेदकत्व विरहेण प्रतिहेतुव्यापक साध्याभाव समानाधिकरण प्रतिहेतुमत्पक्षरूप सत्प्रतिपक्षाव्याप्तिप्रसंगात् । ॥ ९ ॥

नचावच्छेदक कोटिप्रविष्टानामवच्छेदकत्वानंगीकारेण विनिगमनाविरहप्राप्तां पक्षविषयित्वावच्छिन्नां साध्याभावानुमिति जनकतामादायैव निरुक्तसत्प्रतिपक्षे लक्षणसमन्वयः, तदंगीकारेऽपि जनकतावच्छेदक मुख्यविषयतात्वव्यापकत्वस्यैव प्रतिबन्धकतावच्छेदकतायां निवेशेन लक्षणसमन्वयः, तथाच नोक्तातिव्याप्तिरिति वाच्यम् ॥१०॥ जलव्यापक वह्न्यभावसमानाधिकरण जलवान्ह्रदः, शैवालव्यापकवह्न्यभाव समानाधिकरण शैवालवान्ह्रद इति निखिलपरामर्श साधारण्येन –स्वावच्छिन्नविषयतानिरूपित व्यापकत्वविषयतानिरूपितसाध्याभावत्वावच्छिन्न विषयतानिरूपित सामानाधिकरण्यविषयतानिरूपितत्व स्वावच्छिन्नत्वोभयसम्बन्धेन किञ्चिद्धर्मविशिष्ट विषयतानिरूपितह्रदत्वावच्छिन्न विशेष्यताशालिनिश्चयत्वेन उक्तसकलनिश्चयानामेकरूपेण जनकत्वस्वीकारात् । निरुक्तजनकतावच्छेदक विषयतात्वस्य शैवालव्यापकवह्न्यभाव समानाधिकरण शैवालवद्ध्रदविषयतायां सत्वेन तत्र जलव्यापको वह्न्यभावइत्याकारकज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकताया असत्वेन निरुक्तसत्प्रतिपक्षाव्याप्ते दुर्वारत्वात् । तथाचोक्तपरिष्कारासम्भवेनोक्तातिव्याप्तितादवस्थ्यम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नच जलव्यापकोवह्न्यभावः जलवांश्चहृदः शैवालव्यापको वह्न्यभावः शैवालवांश्च हृदइत्यादिसकलनिश्चयसाधारण्येन – स्वनिरूपितव्यापकत्व निष्ठप्रकारतावच्छेदकतावच्छेदकावच्छिन्न प्रकारता-निरूपित हृदत्वावच्छिन्न विशेष्यतानिरूपकत्व स्वनिरूपक निश्चयविशिष्टत्वोभयसंबन्धेन वह्न्यभावत्वावच्छिन्न विशेष्यताविशिष्ट निश्चयत्वेनैकप्रतिबन्धकत्वांगीकारात्, निरुक्तानुगतजनकतावच्छेदक विषयितात्वव्यापकत्वं निरुक्तप्रतिबन्धकतावच्छेदकताया मक्षतामिति निरुक्तसत्प्रतिपक्षे लक्षणसमन्वय संभवेनोक्तपरिष्कारे नकोपि दोषइति वाच्यम् ॥ १२ ॥ तथापि निरुक्तप्रतिबन्धकतावच्छेदकतायाः वह्न्यभावत्वावच्छिन्न विशेष्यतायामेव सत्त्वेन जनकतावच्छेदकताया हृदत्वावच्छिन्न विशेष्यतायामेव सत्त्वेन निरुक्तजनकतावच्छेदक विषयतात्वव्यापकत्वस्य प्रतिबन्धकतावच्छेदकताया मसत्वेन निरुक्तसत्प्रतिपक्षाव्याप्ते र्दुवारत्वात्, निरुक्तपारिष्कारस्य सर्वथा असंभवात् ॥१३॥

नच स्वनिरूपितव्यापकत्वनिष्ठ प्रकारतावच्छेदक तावच्छेदकावच्छिन्नत्व स्वनिरूपकज्ञानविशिष्ट ज्ञानीयत्वै तदुभयसंबन्धेन वह्न्यभावत्वावच्छिन्न विशेष्यताविशिष्ट प्रकारतानिरूपित हृदत्वावच्छिन्न विशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकतास्वीकारेणोक्तविषयतात्वव्यापकत्वमुक्तावच्छेदकताया मस्त्येवेति निरुक्तपरिष्कार स्संभवत्येवेतिवाच्यं ॥ १४॥ उक्तरूपेण प्रतिबन्धकत्वांगीकारे चैत्रस्य जलव्यापको वह्न्यभावः जलवान् हृदइति ज्ञानसत्वे मैत्रस्य केवलजलवान् हृदइति ज्ञानसत्वे मैत्रस्यवह्न्यनुमिति प्रतिबन्धापत्तिः, समानाकारकज्ञानेषु विषयताभेदस्याप्रामाणिकतया मैत्रज्ञानीय जलत्वावच्छिन्न प्रकारताया अपि चैत्रज्ञानीय वह्न्यभावत्वावच्छिन्न विशेष्यताविशिष्टत्वात्, अतः पूर्वोक्तप्रकारेणैव प्रतिबन्धकताया वक्तव्यतयोक्ताव्याप्तितादवस्थ्येनोक्त परिष्कारासम्भवात्। ॥ १५ ॥

नच जनकतावच्छेदकविषयतात्वव्यापकत्वं प्रतिबन्धकताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकतावच्छेदकसम्बन्धघटक विषयतात्वसम्बन्धेन निवेश्यम्, अतोनाव्याप्तिः – जनकतावच्छेदक पक्षादिविषयतायां प्रतिबन्धकतावच्छेदक तावच्छेदकसम्बन्धघटक विषयतात्वसत्वात्। उक्तोभयवद्ध्रदेचनाऽतिव्याप्तिः-वह्न्यभावव्याप्यव्याप्यवानिति प्रत्येकज्ञानीयविषयताया जनकतावच्छेदिकायाः प्रतिबन्धकतावच्छेदक तावच्छेदकसम्बन्ध घटक विषयतात्वाभावादिति वाच्यम् ॥१६॥ तथासति साध्याभावाभाव वदवृत्ति मत्पक्षात्मक सत्प्रतिपक्षाव्याप्तेः- तादृशसत्प्रतिपक्षज्ञानीयविषयतायां तादृशज्ञानीय ज्ञानवैशिष्ट्यानवच्छिन्न प्रतिबन्धकतायाः स्वावच्छेदकतावच्छेदक सम्बन्धघटक विषयतात्वसम्बन्धेनाभावात् ॥ १७॥

नच स्वावच्छेदकत्व स्वावच्छेदकतावच्छेदक संसर्गघटक विषयतात्वान्यतरसम्बन्धेनैव प्रतिबन्धकतायां जनकतावच्छेदक विषयतात्वव्यापकत्वविवक्षणा न्नोभयविध सत्प्रतिपक्षाव्याप्तिः, नवोक्तोभयवद्ध्रदेऽतिव्याप्तिरिति वाच्यम् ॥ १८ ॥ एवंच सति जलव्यापकवह्न्यभाव कालीनजलवह्न्यभावव्याप्य व्याप्योभय वद्ध्रदेतिव्याप्ते दुर्वारत्वात्, जलव्यापको वह्न्यभावः जलवांश्चह्रदः, वह्न्यभावव्याप्यव्याप्यव्यापको वह्न्यभावः वह्न्यभावव्याप्यव्याप्यवांश्च ह्रदइत्यनयोरुभयो र्निश्चययोरेकरूपेण प्रतिबन्धकत्वाङ्गीकारात्, निरुक्तज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतायाः स्वावच्छेदकतावच्छेदक सम्बन्धघटक विषयतात्व सम्बन्धेन जनकतावच्छेदिकायां प्रत्येकज्ञानीयविषयतायामपि सत्वे न निरुक्तान्यतरसम्बन्धेन निरुक्तविषयतात्वव्यापक प्रतिबन्धकतायाः निरुक्तोभयवद्ध्रदविषयतात्वव्यापकत्वात्। ॥ १९ ॥

नच यद्रूपावच्छिन्नविषयतायां प्रतिहेतुव्यापकसाध्याभाव समानाधिकरण प्रतिहेतुमत्पक्षविषयताविशिष्टान्यत्व ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वं निवेश्यते। वैशिष्ट्यश्च – निरूपितत्व तादात्म्य अन्यतरसम्बन्धेन, अतो नानुपदोक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयवद्धदेऽतिव्याप्तिः–तद्विषयतायां निरुक्तोभयसत्त्वादिति वाच्यं ॥ २०॥ साध्याभावाभाववदवृत्ति मत्पक्षरूप सत्प्रतिपक्षाव्याप्तेः, ह्रदो व- ह्निधूमोभयवानित्यादौ वह्न्यभावाभाववदवृत्तिमान् धूमाभाववान् - वह्न्यभावाभाववदवृत्तिमांश्च ह्रदइति ज्ञानयो रेकविशिष्टापरत्वेन - प्रतिबन्धकतया वह्न्यभावाभाववदवृत्तिम ह्रदविषयतायां निरुक्तो भयाभावासत्त्वात्। ॥ २१ ॥

नच प्रतिहेतुव्यापकसाध्याभावत्वावच्छिन्न विषयताशालि नि- श्चयवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्व निरुक्तविषयतावि- शिष्टान्यत्व उभयाभावनिवेशान्न दोषइति वाच्यम् ॥ २२ ॥ वह्न्यभावा- भाववदवृत्ति व्यापको धूमाभावइति निश्चयवैशिष्ट्यावच्छिन्नायाः- वह्न्यभावाभाववदवृत्ति मान्पक्षइति निश्चयनिष्ठायाः प्रतिबन्धकताया अवच्छेदकत्वस्य निरुक्तविषयताविशिष्टान्यत्वस्यच उक्त सत्प्रतिपक्षवि षयतायां सत्वात तत्राव्याप्ते दुर्वारत्वात्। ॥ २३ ॥

नच – यद्धर्मावच्छिन्न प्रतिबध्यता सत्यन्तार्थः तद्धर्मावच्छि न्न प्रतिबध्यतानिरूपित ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदक त्व घटितोभयाभावस्यैव यद्रूपावच्छिन्न विषयतायां निवेशा न्नोक्ता- व्याप्तिः – निरुक्तसत्प्रतिपक्षविषयतायाः वह्निमत्ताबुद्धित्वावच्छिन्न प्र- तिबध्यताघटित सत्यन्तार्थवत्त्वेन तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपित- ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्व घटितोभयाभाववत्त्व- स्याक्षतत्वा दिति वाच्यम् ॥ २४ ॥ वह्न्यभावाभाववदवृत्ति- व्यापको वह्न्यभाव इति निश्चयवैशिष्ट्यावच्छिन्नाया वह्न्यभावाभाव वदवृत्तिमान् ह्रदइति ज्ञाननिष्ठायाः प्रतिबन्धकताया अवच्छेदक- त्वस्य उक्तविषयतायां सत्त्वेनोक्तोभयाभाववत्त्वस्य तत्राभावेन उ- क्ताव्याप्तेर्दुर्वारत्वात्। ॥ २५ ॥

नच वह्न्यभावाभाववदवृत्तिमान् ह्रदइति निश्चयस्य ह्रदे व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विमत्ताबुद्धिप्रति ज्ञानवैशिष्ट्यानवच्छिन्ना वश्यकल्पनीय प्रतिबन्धकत यैर्वोपपत्तौ ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतान्तरे मानाभावेन तद्धर्माव- च्छिन्न प्रतिबध्यताघटितोभयाभावस्य उक्तसत्प्रतिपक्षविषयतायां सत्त्वेन नोक्ताव्याप्तिरिति वाच्यम् ॥ २६ ॥ धूमाभावाभाववदवृत्तिव्यापको वह्न्य भावः धूमाभावाभाववदवृत्तिमांश्च पक्षः, घटाभावाभाववदवृत्तिव्यापकोव ह्न्यभावः घटाभावाभाववदवृत्तिमांश्च पक्ष इत्यादि सकलनिश्चयसाधा रण्येनोक्तरीत्या वह्न्यभावत्वावच्छिन्न विशेष्यताविशिष्टनिश्चयत्वेनैव प्रतिबन्धकताया वक्तव्यतया जलव्यापकवह्न्यभावकालीनेत्याद्युभयवद्ध देऽतिव्याप्तिवारणाय विशेष्यतावैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्व घटितोभयाभाववत्वस्य विवक्षणीयतया तादृशप्रतिबन्धकतावच्छेदकत्व स्य उक्तसत्प्रतिपक्षविषयतायां सत्त्वेनोक्ताव्याप्ते दुर्वारत्वात् ॥२७॥

नचोभयाभाव प्रतियोगिकोटा वनतिरिक्तवृत्तित्वरूपावच्छेद- कत्वस्यैव निवेशान्नोक्ताव्याप्तिः , प्रत्येकज्ञानीय वह्न्यभावाभावव दवृत्तिमद्धदविषयतायाः उक्तप्रतिबन्धकतातिरिक्त वृत्तित्वेनो- क्तोभयाभाववत्त्वस्याक्षतत्वात् । जलव्यापकेत्या द्युभयवद्धदेच - नातिव्याप्तिः, तद्विषयतायां निरुक्तप्रतिबन्धकताऽनतिरिक्तवृत्तित्वस्य निरुक्तविषयताविशिष्टान्यत्वस्यच द्वयोरेव सत्वेनोक्तोभयाभाववत्त्व स्याभावादिति वाच्यम् ॥ २८ ॥ अभावः प्रतियोगितासम्बन्धेन घट त्वव्यापक घटत्ववद्धदकालीन घटत्ववानित्यत्र घटत्वव्यापक घटत्ववद्ध दकालीन घटत्वाभावाभाववदवृत्तिमदभावरूप सत्प्रतिपक्षेऽव्याप्तेः , तत्रहि प्रतियोगितासम्बन्धेन घटत्वव्यापकस्समवायेन घटत्ववद्धदः प्रतियोगितासम्बन्धेन घटत्ववांश्चाभावइति निश्चययोरेकविशिष्टापर- त्वेनाभावत्वावच्छेदेन तादृशघटत्ववत्ताबुद्धिंप्रति प्रतिबन्धकतया ता- दृशप्रतिबन्धकतायाश्च प्रतिहेतुव्यापकताविशिष्ट साध्याभावनिश्चयवै शिष्ट्यावच्छिन्नतया उक्तसत्प्रतिपक्षविषयताया निरुक्तप्रतिबन्धक- तावच्छेदकत्व निरुक्तविषयताविशिष्टान्यत्वोभयवत्त्वात ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नच निरुक्तविशिष्टस्य सत्प्रतिपक्षरूपता नस्वीक्रियते तस्यबाधघटितत्वेन तद्घटकस्यैव तत्कार्यकारित्वादितिवाच्यम् ॥ २० ॥

अभावविशिष्टव्यापकसामान्यत्वाभावकालीन सामान्यत्वसाध्यकघटादिपक्षकस्थले समवायसम्बन्धस्य व्याप्यताघटकत्वे अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वाभावाभाववदवृत्तिमद्घटरूप सत्प्रतिपक्षेऽव्याप्तेः, तत्रहि अभावविशिष्टव्यापकस्सामान्यत्वाभावः अभावविशिष्टवांश्च घटइति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया निरुक्तसत्प्रतिपक्षविषयताया निरुक्तप्रतिबन्धकतानातिरिक्तवृत्तित्व निरुक्तविषयता विशिष्टान्यत्वोभयवत्त्वात्, व्यापकताघटितस्यैवास्यापि सत्प्रतिपक्षरूपताया आवश्यकत्वात । ॥ २१ ॥

नच प्रतिहेतुव्यापकताविशिष्टसाध्यतावच्छेदकपर्याप्तावच्छेदकताक प्रतियोगिताकाभावत्वावच्छिन्नविषयताशालिनिश्चयवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्वस्योभयाभाव प्रतियोगितया निवेशान्नाव्याप्ति रितिवाच्यम् ॥ ३२ ॥ तत्रैव पृथिवीत्वव्यापकसामान्यत्वाभावकालीन पृथिवीत्व सामान्यत्वाभावव्याप्यव्याप्योभयवद्घटादावतिव्याप्तेः, तद्विषयतायाः प्रतिहेतुव्यापकताविशिष्टसाध्यतावच्छेदक पर्याप्तावच्छेदकताक प्रतियोगिताकाभावत्वावच्छिन्नविषयता शालिनिश्चयवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्वविरहेण निरुक्तोभयाभाववत्त्वात् । अतः प्रतिहेतुव्यापकसाध्यतावच्छेदकावच्छिन्ना भावत्वावच्छिन्नविषयताशालिनिश्चयवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावच्छेदकत्वस्य उभयाभावप्रतियोगितया निवेशनीयतयो क्ताव्याप्तितादवस्थ्यात्, उक्तोभयाभाववत्त्वस्य यद्रूपावच्छिन्नविषयतायां निवेशासम्भवनेजलव्यापकेतुक्तोभयवद्धदेऽतिव्याप्ति दुर्वारतयाऽवच्छेदककोटिप्रविष्टानामवच्छेदकत्वांगीकारेच्चव्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्तिसम्भवेन निरुक्तपरिष्कारासम्भवेन वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्धदेऽतिव्याप्ति दुर्वारा ।२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नच विरोध्यनुमिति निरूपितयत्किञ्चि ज्जनकताव्यापकत्वं सत्यं- तद्घटकप्रतिबन्धकतायां निवेश्यम् , तथाच स्वनिरूपितप्रतिबन्धक- तावच्छेदक विषयित्वावच्छिन्नानुमिति निष्ठजन्यतानिरूपितजनकताव त्त्व स्वविशिष्टप्रतिबन्धकतावत्त्व एतदुभयसम्बन्धस्यैव पूर्वोक्तभेदप्रति योगितावच्छेदकतावच्छेदकत्वात । स्वविशिष्टत्वञ्च स्वनिरूपितप्रति बन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनक - ताविशिष्टत्व स्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितत्वोभयसम्बन्धेन। जनकतावैशिष्ट्यंचं स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धे न। अवच्छेदकताच स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्ब- न्धावच्छिन्ना। विशेष्यदळंतु जलव्यापकवह्न्यभावकालीन जलवह्न्दे ति- व्याप्तिवारणाय। तथाच वह्न्यभाव वह्न्यभावव्याप्यव्याप्योभयवह्न्दे- नातिव्याप्तिः, तत्रबाधप्रतिबन्धकतायास्तज्ज्ञाननिष्ठजनकताव्यापकत्वाभा वादितिवाच्यम् ॥३४॥ ह्रदोवह्निमानित्यत्रैव जलव्यापकवह्न्यभावकाली- नजल वह्न्यभावव्याप्यव्याप्योभयवह्न्देऽतिव्याप्तेः , तज्ज्ञाननिष्ठज्ञानवै- शिष्ट्यावच्छिन्नप्रतिबन्धकतायाः सत्प्रतिपक्षज्ञानीयजनकताव्यापकत्वात्। निरुक्तोभयवध्द्रदंविषयतायाः तदवच्छेदकत्वविरोध्यनुमिति जनकता- वच्छेदकत्वोभयवत्त्वात् । ॥ ३५ ॥

नच यज्जनकताव्यापकत्वं प्रतिबन्धकतायाः तज्जनकतावच्छेदकत्व विवक्षणान्नातिव्याप्तिः, नच यत्त्व तत्त्वनिवेशादननुगमइति वाच्यम्। स्व निरूपितप्रतिबन्धकतावत्त्व स्वविशिष्टजनकतावत्त्वैतदुभयसम्बन्धस्यैव उक्तभेदप्रतियोगितावच्छेदकत्व घटकत्वात्। स्ववैशिष्ट्यंच स्वनिरूपित- प्रतिबन्धकतावृत्तित्व स्वावच्छेदकावच्छिन्न प्रतिबध्यतानिरूपितप्रतिबन्ध कतावच्छेदक विषयित्वावच्छिन्नानुमितिनिष्ठ जन्यतानिरूपितत्वोभयसं बन्धेन। प्रतिबन्धकतावृत्तित्वंच स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्वसम्बन्धेन। स्वनिष्ठावच्छेदकता स्वसमानाधिकरणभेदप्रतियोगि- तावच्छेदकत्वसम्बन्धावच्छिन्ना। तथाच नोक्तोभयवह्न्दे ऽतिव्याप्तिः , तज्ज्ञानीयविषयताया निरुक्तज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतावृत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनकतावच्छेदकत्व विरहादिति वाच्यम् ॥३६॥ जलं वृत्तित्वाभाववदित्यत्र जलव्यापकवृत्तित्वव्याप्य समानाधिकरणजलवज्जलेऽतिव्याप्तिः, सत्प्रतिपक्षोन्नायकज्ञानीयजनकताव्यापकत्वस्य तत्स्थलीयबाधज्ञानप्रतिबन्धकतायां सत्वेन तादृशप्रतिबन्धकत्व जनकत्वोभयावच्छेदकत्वस्य निरुक्तविशिष्टविषयतायां सत्वात् । ॥ ३७ ॥

नच जलव्यापकवृत्तित्वव्याप्य समानाधिकरणजलवज्जलं, शैवालव्यापकवृत्तित्वव्याप्य समानाधिकरणशैवालवज्जलमित्यादि सकलनिश्चयसाधारण्येन जनकताया लाघवानुरोधेन स्वीकरणीयतया तादृश जनकताव्यापकत्वस्य उक्तस्थलीयबाधप्रतिबन्धकताया मसत्वेन नोक्तातिव्याप्तिरिति वाच्यम् ॥३८॥ वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यत्र तादात्म्यसम्बन्धेन तद्व्यक्तिव्यापक तादात्म्यसम्बन्धावच्छिन्नत्वव्याप्यवन्निरूपित तादात्म्यसम्बन्धावच्छिन्नवृत्तितावत्तद्व्यक्तिमद्वृत्तित्वरूपे सत्प्रतिपक्षोन्नायकेऽतिव्याप्तेः, अनुगतरूपेण जनकत्वाङ्गीकारेपि सम्बन्धभेदेन जनकतायाभिन्नतया तादात्म्यसम्बन्धावच्छिन्नवृत्तित्वविषयताघटित तद्धर्मावच्छिन्न जनकताव्यापकत्वस्य उक्तस्थलीयबाधज्ञान प्रतिबन्धकतायां सत्वात । ॥ ३९ ॥

नच प्रतिबन्धकतानिरूपितानतिरिक्तवृत्तित्व स्वरूपसम्बन्धरूपोभयविधावच्छेदकत्वस्य यद्रूपावच्छिन्नविषयतायां निवेशान्नोक्तातिव्याप्तिः, निरुक्तसत्प्रतिपक्षोन्नायकविषयतायां बाधज्ञानप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेकत्वविरहात् । नचैकत्रद्वयमिति रीत्या साध्याभावतद्व्याप्यव्याप्योभयावगाहि ज्ञानीयविषयतायाः प्रतिबन्धकता निरूपित स्वरूपसम्बन्धरूपावच्छेदकत्वा त्तत्रातिव्याप्ति र्दुर्वारैवेतिवाच्यम् । यद्रूपावच्छिन्न विषयतासामान्ये उक्तप्रतिबन्धकतानिरूपित स्वरूपसम्बन्धरूपावच्छेदकत्व विवक्षणेनोक्तातिव्याप्तिवारणादिति वाच्यम् ॥४०॥ तथापि तादृशस्थले साध्याभावसाध्याभावव्याप्यव्याप्योभयवद्ध्रदेऽतिव्याप्ते र्दुर्वारत्वात् । तद्विषयतासामान्यस्यैवोक्तप्रतिब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धकतानतिरिक्तवृत्तित्व स्वरूपसम्बन्धरूपोभयविधावच्छेदकत्ववत्वात्। उक्तरीत्या निरुक्तविशिष्टांतराघटितत्वस्यापि सत्वात् ॥ ४१ ॥

नच स्वावच्छिन्नाविषयकप्रतीति विषयतावच्छेदक यत्किञ्चिद्रूपावच्छिन्न विषयकत्वाव्यापकत्वस्य जनकतायां निवेशान्नोक्तातिव्याप्तयः, स्वावच्छिन्नाविषयकप्रतीति विषयतावच्छेदक साध्याभावव्याप्य व्याप्यवत्पक्षतावच्छेदकावच्छिन्न विषयत्वाव्यापकत्वस्य निरुक्तविशिष्ट विषयताव्यापकजनकताया मभावादिति वाच्यम् ॥ ४२॥ सत्प्रतिपक्षज्ञानस्यानुगतरूपेण साध्याभावानुमिति जनकत्वस्वीकारेण व्यापकताघटितसत्प्रतिपक्षमात्रे ऽव्याप्तेः , स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकीभूत शैवालव्यापकवह्न्यभाव समानाधिकरण शैवालवद्ध्रदत्वाद्यवच्छिन्न विषयत्वाव्यापकत्वस्य जलव्यापकवह्न्यभाव समानाधिकरण जलवद्ध्रदविषयकानिश्चयीय जनकतायामसत्त्वात् ॥ ४३ ॥

नच स्वावच्छिन्नविषयकत्वाव्यापक विषयताशून्यज्ञानीयविशिष्टांतरविषयत्वाव्यापकत्वस्य विरोध्यनुमितिजनकतायां निवेशान्नोक्ताऽव्याप्तिः; शैवालव्यापकवह्न्यभाव समानाधिकरणशैवालवद्ध्रदविषयताया जलव्यापकवह्न्यभाव समानाधिकरणजलवद्ध्रदत्वावच्छिन्न विषयकत्वाव्यापक विषयिताशून्यज्ञानीयत्वाभावादिति वाच्यम् ॥४४॥ वह्न्यभावव्यापकं यज्जलव्यापकवह्न्यभाव समानाधिकरणजलं तत्समानाधिकरणवह्न्यभाववद्ध्रदात्मके सत्प्रतिपक्षोन्नायके ऽतिव्याप्तेः दुर्वारत्वात् , तज्ज्ञानीय जनकताया निरुक्तविशेषणाक्रान्त विशिष्टांतरविषयित्वाव्यापकत्वात् , उक्तविशिष्टविषयिताया बाधज्ञानीयप्रतिबन्धकतावच्छेदकत्वाच्च । ॥४५॥

नच स्वावच्छिन्नानिरूपित विशिष्टविषयित्वाव्यापक प्रकृतानुमितिप्रतिबन्धकत्वस्य सत्यन्तार्थतया नोक्तातिव्याप्तिः , बाधज्ञानीयप्रतिबन्धकताया निरुक्तविशिष्टानिरूपितवह्न्यभाववद्ध्रदत्वावच्छिन्न विष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यताव्यापकतया तद्व्यापकप्रकृतानुमितिप्रतिबंधकताया अप्रसिद्धत्वात् । नापिनिरुक्तोभयवद्भूदादावतिव्याप्तिः , तत्र स्वावच्छिन्नानिरूपितविशिष्टविषयित्वा व्यापकप्रकृतानुमितिप्रतिबन्धकताया अप्रसिद्धत्वादितिवाच्यम् ॥४६॥ व्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्तेः, प्रतिहेतुव्यापकसाध्याभाव समानाधिकरणप्रतिहेतुमत्पक्षविषयक निश्चयीय प्रतिबन्धकताया स्ताद्दशविशिष्टानिरूपित प्रतिहेतुव्यापकसाध्याभाव समानकालीन प्रतिहेतुमत्पक्षविषयिताव्यापकत्वेन विशिष्टांतरविषयित्वाव्यापकप्रकृतानुमितिप्रतिबन्धकताया अप्रसिद्धेः । ॥ ४७ ॥

नचस्वावच्छिन्नाविषयकत्वा व्यापकविषयताशून्यज्ञानीयत्वस्य विशिष्टांतरविषयितायां निवेशान्नाव्याप्तिः, प्रतिहेतुव्यापकसाध्याभावसमानकालीन प्रतिहेतुमत्पक्षविषयितायाः प्रतिहेतुव्यापकसाध्याभाव समानाधिकरण प्रतिहेतुमत्पक्षविषयित्वा व्यापकविषयिताशून्यज्ञानीयत्वाभावादितिवाच्यम् ॥४८॥ घटोगगनाभाववदभाववत्कालीन गगनवानित्यादौ अभावव्यापकगगनाभाववदभाववत्कालीन गगनाभाव समानाधिकरणाभाववद्घटरूपसत्प्रतिपक्षेव्याप्तेः, तत्र निरुक्त सत्प्रतिपक्षविषयकज्ञानदशायामनुमित्यनुत्पादस्य अभाववान् गगनाभाववान् अभाववांश्च घटइति निश्चययोरेकविशिष्टापरत्वेन प्रतिबन्धकतयैवोपपत्तेः प्रतिबन्धकतांतरेमानाभावात्ताद्दश प्रतिबन्धकतायाश्च निरुक्तसत्प्रतिपक्षानिरूपित · तद्विषयकत्वाव्यापकविषयताशून्यज्ञानीय गगनाभाववदभाववत्कालीन गगनाभाव समानाधिकरणाभाववद्घटविषयिताव्यापकत्वेन ताद्दशविषयित्वाव्यापक प्रतिबन्धकतावच्छेदकत्वस्य निरुक्तसत्प्रतिपक्षविषयतायामभावात् । ॥ ४९ ॥

नच तस्य सत्प्रतिपक्षतानांगीक्रियतें , सामान्यलक्षणानाक्रांतत्वात् । तथाहि, प्रतिबन्धकता घटितलक्षणे स्वावच्छिन्नानिरूपितविशिष्टविषयित्वाव्यापक प्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयताकत्वस्यैव निष्कृष्टविशिष्टांतराघटितत्वरूपतया तस्य चोक्तरीत्या उक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टेऽभावात , अत्रवदन्तीत्यादिकल्पीयस्य विशिष्टांतरविषयित्वा प्रयोज्येत्यादिनिष्कृष्टविशिष्टांतराघटितत्वस्याप्यत्रासम्भवात् ; न सामान्य लक्षणाक्रांततोक्तविशिष्टस्य । यदिचाभावव्यापकोनिरुक्तसाध्याभावः अभाववांश्च घटः, प्रमेयत्वव्यापकस्तादृशसाध्याभावः प्रयेत्ववांश्च घट-इत्यादिनिखिलनिश्चयानामेकरूपेण प्रतिबन्धकत्वस्वीकारात्सामान्य लक्षणा क्रांतत्वमुक्तविशिष्टस्य सम्भवत्येव, उक्तानुगतप्रतिबंधक-तायाश्च अभाववन् गगनाभाववान् अभाववांश्च घटइतिज्ञानयोरेक-विशिष्टापरत्वेन प्रतिबधकत्वांगीकारेपि प्रमेयत्वव्यापकस्तादृशसाध्या-भावः, प्रमेयत्वांश्च घटइति निश्चयादनुमिति प्रतिबन्धानुरोधेन अ-वश्यकल्पनीयतया तामादायैव प्रतिबन्धकता घटितलक्षणपक्षीय वि-शिष्टांतरा घटितत्वसम्भवात् , एव मत्रवदंतीत्यादिकल्पीयविशिष्टां-राघटितत्वस्यापि तत्र सूपपादत्वादित्युच्यते ; तदा निरुक्तसत्यन्ता र्थस्यापि उक्तप्रतिबन्धकतामादायैवोपपादयितुं शक्यत्वेनोक्ताव्याप्ते स्सुदूरपराहतत्वात् । तस्मान्निरुक्तलक्षणं निष्कृष्टमेवेति वाच्यम् ॥ ५० ॥

प्रतिबन्धकताघटितलक्षणे उक्तपरिष्कारेणोक्तोभयवद्ध्रदादावतिव्याप्ति वारणेपि वह्न्यभाववान् ह्रदोवह्निमानित्यादौ वह्न्यभावव्याप्यवद्ध्रदा-दावव्याप्तिवारणार्थमवश्यं परिष्करणीये यद्रूपावच्छिन्नविषयताशालि निश्चयाव्यवहितोत्तरानुमितिसामान्ये पक्षे पक्षतावच्छेदकवैशिष्ट्यावगा हित्वाभावः विरोधिविषयताप्रयुक्तः तद्रूपावच्छिन्नान्यत्वे सति यद्रू पावच्छिन्नविषयताशालि निश्चयाव्यवहितोत्तरानुमितिसामान्ये सा-ध्यधर्मिकसाध्यतावच्छेदक वैशिष्ट्यावगाहित्वाभावः विरोधिविषयि-ताप्रयुक्तः तद्रूपावच्छिन्नान्यत्वंच सति यद्रूपावच्छिन्नविषयताशालि निश्चयाव्यवहितोत्तरानुमितिसामान्यनिष्ठः विरोधिविषयताप्रयुक्तः पक्षे साध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नत्वेसति यद्रूपावच्छिन्न विषयता शालीनिश्चयाव्यवहितोत्तरानुमितिव्यापकः विरोधिविषयता-प्रयुक्तः पक्षेसाध्यवैशिष्ट्यावगाहित्वाभावस्तद्रूपावच्छिन्ना या विषयता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदवच्छिन्नानुमितिनिष्ठ जन्यतानिरूपित जनकतावच्छेदिका यद्रूपावच्छिन्नाविषयता तद्रूपावच्छिन्नत्वमिति निष्कृष्टलक्षणे वह्न्यभाव वह्न्यभाव व्याप्यव्याप्योभयवध्द्रदेऽतिव्याप्ते दुर्वारत्वात्, तत्र सत्यंतदळोन्नायक दळयोस्सत्वादितिचेत् । ॥ ५१ ॥

अत्रवदंति विशिष्टांतरविषयित्वा प्रयोज्यस्वविषयिता प्रयोज्यपक्षधर्मिकसाध्यवैशिष्ट्याव गाहित्वाभावाधिकरणताकत्व निवेशान्नोक्तातिव्याप्तिः ।

नचैवं सत्यन्तदळवैयर्थ्यं, वह्न्यभावव्याप्यव्याप्यवान्वह्न्यभाववान्वह्न्यभावव्याप्यव्याप्यवांश्च ह्रदइति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया वह्न्यभावव्याप्यव्याप्यवध्द्रदविषयतायाः पक्षधार्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता प्रयोजकतया तत्रातिव्याप्तिवारकतया तत्सार्थक्यात् ।

नच तद्विषयताप्रयोज्याया मुक्ताधिकरणतायां विशिष्टान्तरविषयित्वा प्रयोज्यत्वासम्भवइतिवाच्यम्, वक्ष्यमाणरीत्या विशिष्टान्तरे तादृशस्वनिवेशस्यावश्यकत्वात् ॥ ५२ ॥

नच विशिष्टान्तरविषयित्वाप्रयोज्यत्वमात्र निवेशोऽसम्भवः । यद्रूपावच्छिन्न विषयताशालि निश्चयोत्तरानुमिति सामान्ये पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः विरोधिविषयताप्रयुक्तः तद्रूपावच्छिन्नविशिष्टान्तराघटितत्वनिवेशेऽपि बाधघटितसत्प्रतिपक्षेऽव्याप्तिः । पक्षसाध्यवैशिष्ट्यग्रहविरोध्युन्नायकत्व मात्रनिवेशेच वह्न्यभावव्याप्य वह्न्यभावव्याप्यव्याप्यवद्ध्रदेऽव्याप्तिः । अतो निरुक्तसत्प्रातिपक्ष लक्षणाश्रयरूप तादृशविशिष्टान्तरस्यैव निवेशनीयतया निरुक्तोभयवद्ध्रदे तिव्याप्तिरिति वाच्यम् ॥ ५३ ॥ निरुक्तसत्यन्तमात्राश्रयत्वस्यैव विशिष्टान्तरे निवेशादुन्नायकत्वदळस्य तत्रानिवेशेन तत्रातिव्याप्तिविरहात् । बाधघटितसत्प्रतिपक्षेऽव्याप्तिवारणायच विशिष्टान्तरविषयितानिष्ठ प्रयोजकतायां स्वप्रयोज्याधिकरणतानिष्ठ भेदप्रतियोगितानवच्छेदकत्व स्वानवच्छेदकाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नत्वोभयसम्बन्धेन प्रयोजकताविशिष्टान्यत्वनिवेशात् । भेदप्रतियोगितावच्छेदकताच स्वनिरूपितप्रयोज्यतावत्त्वसम्बन्धेन । बाधविषयतानिष्ठप्रयोजकतायाश्च निरुक्तोभयसम्बन्धेन सत्प्रतिपक्षविषयतानिष्ठप्रयोजकताविशिष्टत्वेन बाधघटितसत्प्रतिपक्षेऽव्याप्ति विरहात् ॥ ५४ ॥

नच –वह्न्यभावव्याप्यव्याप्यजलव्यापकवह्न्यभावकालीन जलाभाववह्न्युभयवानित्यादौ तादृशजलवध्रदरूपबाधेऽतिव्याप्तिः, विशिष्टांतरभूतजलव्यापकवह्न्यभावकालीन जलवध्रदविषयितानिष्ठप्रयोजकतायां निरुक्तोभयसम्बन्धेन बाधविषयता निष्ठप्रयोजकताविशिष्टत्वात्, तदन्यविशिष्टांतरविषयता निष्ठप्रयोजकतानिरूपित प्रयोज्यताशून्यस्वविषयताप्रयोज्योक्ताभावाधिकरणताकत्वात । अतो – विषयितानिष्ठप्रयोजकताया मुक्तविशेषणदानासम्भवे नोक्तातिव्याप्ति दुर्वारैवेतिवाच्यम् ॥५५॥ उक्तविशेषणदानेपि वह्न्यभावव्याप्यव्याप्याभाववह्न्युभयवानित्यत्र वह्न्यभावव्याप्यव्याप्यवध्रदेऽतिव्याप्ते दुर्वारतया यद्रूपावच्छिन्नविषयता शालिनिश्चयाव्यवहितोत्तरानुमिति सामान्ये विरोधिविषयता प्रयोज्यतावच्छेदक यद्रूपविशिष्टः पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नत्वेसति, यद्रूपावच्छिन्नविषयता शालिनिश्चयाव्यवहितोत्तरानुमिति सामान्ये विरोधिविषयता प्रयोज्यतावच्छेदक तद्रूपविशिष्टः पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नविषयित्वावच्छिन्नानुमिति निष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वस्यैवविवक्षणीयतया पूर्वोक्तबाधेऽतिव्याप्त्यनवकाशात् । नचाननुगमः । स्ववृत्तित्व स्ववृत्तिरूपावच्छिन्नविधयित्वावच्छिन्नानुमिति निष्ठजन्यतानिरूपितजनकता वृत्तित्वोभयसम्बन्धेन विरोधिविषयता प्रयोज्यतावच्छेदकरूपविशिष्टरूपवत्त्वस्यैव लक्षणत्वसम्भवात्। प्रथमस्ववृत्तित्वश्च स्वनिष्ठावच्छेदकताक प्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकता स्वसमानाधिकरणभेद प्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्ना । स्वाधिकरणताच स्वावच्छिन्नविषयता शालि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निश्चयाव्य वहितोत्तरानुमिति त्वसम्बन्धेन । भेदप्रतियोगितावच्छेदक-
ताच स्वविशिष्टविरोधिविषयताप्रयुक्तत्वविशिष्ट पक्षधर्मिकसाध्यवै-
शिष्ट्यावगाहित्वाभावाधिकरणतावत्त्व सम्बन्धेन । जनकतावृत्तित्वंच
स्वावच्छिन्न विषयत्वव्यापकत्वसम्बन्धेन । द्वितीय वृत्तित्वमप्यनेनैव
सम्बन्धेन ।.५६ ॥
नचोक्तविशेषणदाने ह्रदो वह्निधूमोभयवानित्यादौ जलव्यापकवह्न्यभा-
वसमानाधिकरण जलव्यापकधूमाभाव समानाधिकरण तादृशजल
वह्न्द्रदात्मकसत्प्रातिपक्षघटके सत्प्रतिपक्षे मेयत्वविशिष्टेऽतिव्याप्तिः,
विशिष्टान्तरभूतावान्तर सत्प्रतिपक्षविषयितानिष्ठ प्रयोजकताया मुक्तो
भयसम्बन्धेन महासत्प्रतिपक्षविषयितानिष्ठ प्रयोजकताविशिष्टत्वादिति
वाच्यम् ॥ ५७ ॥ स्वविषयतात्वव्यापकरूपावच्छिन्न प्रयोजकताविशिष्टा
न्यत्वस्यैव विशिष्टांतरविषयतानिष्ठ प्रयोजकतायां निवेशनीयत्वान्महास-
त्प्रतिपक्षविषयितानिष्ठ प्रयोजकताया मेयत्वविशिष्टावान्तरसत्प्रातिपक्षवि-
षयितात्वव्यापकरूपानवच्छिन्नतया निरुक्तप्रयोजकताविशिष्टान्यत्वस्य
विशिष्टान्तरभूतनिरुक्तावान्तर सत्प्रतिपक्षविषयितानिष्ठ प्रयोजकताया
मक्षतत्वेन मेयत्वविशिष्टे तत्रातिव्याप्तिविरहात् ॥ ५८ ॥

नच ह्रदो वह्निमान् धूमादित्यत्र ह्रदवृत्तिवह्निव्यापकीभूताभाव-
प्रतियोगिजले मेयत्वविशिष्टेऽतिव्याप्तिः, तत्र वह्निव्यापकीभूताभाव
प्रतियोगिजलं ह्रदवृत्तिजलमिति ज्ञानयोः परस्परविशिष्टत्वेन प्रतिब-
न्धकताद्वयस्य स्वीकरणीयतया तथैव विनिगमनाविरहेण प्रयोजकताद्वय
स्यापि परस्परानवच्छेदकावच्छिन्नस्य स्वीकरणीयतया द्वयोरपि प्रयोजक
तयोः निरुक्तोभयसम्बन्धेन परस्पराविशिष्टतया प्रयोजक ताविशिष्टान्यवि
शिष्टान्तरविषयितानिष्टप्रयोजकतानिरूपित प्रयोज्यताशून्यत्वस्य स्व-
विषयताप्रयोज्य पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताया म
क्षतत्वात् । स्वविषयतानिष्ठप्रयोजकतायामपि निरुक्तसम्बन्धेन प्रयोजक-
ताविशिष्टान्यत्वस्य निवेशेच तत्रैव लक्ष्यभूते ह्रदवृत्तिवह्निव्यापकीभू-
ताभावप्रतियोगिजलेऽव्याप्तिरिति वाच्यम् ॥५९॥ स्वप्रयोज्यत्वाभावसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाधिकरणप्रयोज्यत्वनिरूपितत्वस्यापि निरुक्तप्रयोजकतावैशिष्ट्यघटकतया निवेशात । उक्तस्थले चोक्तप्रयोजकताद्वयस्यापि परस्परनिरूपितप्रयोज्यत्वाभाव समानाधिकरण प्रयोज्यत्वानिरूपितत्वेन निरुक्त प्रयोजकताविशिष्टान्यत्वस्याक्षततया उक्तातिव्याप्त्यनवकाशात ॥ ६० ॥

नच विशिष्टान्तरे जनकत्वप्रयोजकत्वोभयघटित तादृशत्वानिवेशे व्यापकताघटितसत्प्रतिपक्षमात्रे ऽव्याप्तिः । प्रतिहेतुव्यापकसाध्याभावसमानकालीनं प्रतिहेतुमत्पक्षस्यापि विशिष्टान्तरत्वसम्भवेन तद्विषयताप्रयोज्यत्वस्य सत्प्रतिपक्षविषयताप्रयोज्योक्तोभयाभावाधिकरणतायां सत्वात्, अत स्तादृशत्वनिवेशनमावश्यकमिति वह्न्यभावेत्युक्तोभयवद्ध्रदे ऽतिव्याप्ति र्दुर्वारैवेति वाच्यम् ॥६१ ॥ तादृशत्वनिवेशेपि वह्न्यभावव्याप्यव्याप्यजलव्यापक वह्न्यभावकालीनजलवद्ध्रदस्य विशिष्टांतरत्वमादायोक्ताव्याप्ते रावश्यकतया विशिष्टांतरेतादृशत्वमनिवेश्यविशिष्टांतरविषयतायां प्रतिहेतुव्यापकसाध्याभाव समानाधिकरणप्रतिहेतुविषयताविशिष्टान्यत्व प्रतिहेतुव्यापकताविशिष्ट साध्याभावविषयकनिश्चय वैशिष्ट्यघटितधर्मावच्छिन्न प्रयोजकतावत्त्वोभयाभाववत्वं निवेश्यैवोक्ता ऽव्याप्ते र्वारणीयतयोक्तातिव्याप्तिवारणसम्भवात् ॥ ६२ ॥

नचैवमपि वह्न्यभावव्याप्य व्याप्यजलव्यापकवह्न्यभावकालीन जलोभयवद्ध्रदेतिव्याप्ति र्दुर्वारैवेति वाच्यम् ॥६३॥ तत्र प्रतिहेतुव्यापकसाध्याभाव समानाधिकरणप्रतिहेतु मत्पक्षविषयतायां निरुक्तोभयाभावसत्त्वेन तत्प्रयोज्यत्वस्य निरुक्तविशिष्ट विषयताप्रयोज्याधिकरणताया मक्षतत्वेनोक्तातिव्याप्त्यनवकाशात् । ॥ ६४ ॥

नच स्वपूर्ववृत्तिप्रतिबन्धकज्ञानीय प्रतिबन्धकतावच्छेदक विषतायाएव स्वनिष्ठप्रतिबध्यतावच्छेदकाभाव प्रयोजकतया निरुक्तोभयवद्ध्रदविषयक निश्चयाव्यवहितोत्तरानुमितिनिष्ठ पक्षधर्मिक साध्यवै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्ट्यावगाहित्वाभावाधिकरणतायां व्यापकताघटित सत्प्रतिपक्ष-विषयतायाः प्रयोजकत्वासम्भवे नोक्तातिव्याप्ति र्दुर्वारैवेति वाच्यं॥ ६५॥ प्रतिबन्धकतायाः प्रतिबन्धकतावच्छेदकता भेदेनेव प्रयोजकताया-अपि प्रयोजकतावच्छेदकता भेदेन भेदः; तद्भेदश्च क्वचित्प्रयोजकताव च्छेदक भेदात्, क्वचित्प्रयोजकतावच्छेदक तावच्छेदक भेदात्-प्रकृतेच निरूप्यनिरूपक भावापन्न विषयतात्वस्य प्रयोजकता वच्छेदकस्यैक्यात्प्रयोजकताया ऐक्यमिति जलव्यापकेत्याद्युक्तोभयव द्ध्रदेतिव्याप्तिविरहात्। ॥६६॥

नच जलव्यापको वह्न्यभावइति निश्चयविशिष्टयोः ह्रदे जलं-जलवान् ह्रद इति निश्चययोरनुगतरूपेण प्रतिबन्धकतामते ह्रदवृत्तिप्रतिहेतुव्यापक साध्याभावसमानाधिकरण प्रतिहेतुविषयताया-निरुक्तोभयाभाववद्विशिष्टान्तर विषयतात्वेन तदप्रयोज्यत्वस्य सत्प्र तिपक्षविषयताप्रयोज्या धिकरणतायामभावेन सत्प्रतिपक्षाव्याप्तिवा रणाय स्वावच्छिन्नघटकतानवच्छेदक धर्मावच्छिन्नत्व प्रतिहेतुव्याप क साध्याभावसमानाधिकरण प्रतिहेतुविषयताविशिष्ट त्वोभयाभाव वत्त्वस्यापि विशिष्टान्तरविषयतायामवश्यं निवेशनीयतया जलव्यापके-त्याद्युभयवद्ध्रदेतिव्याप्ति र्दुर्वारैवेति वाच्यम् ॥६७॥ स्वविषतायामपि प्र-तिहेतुव्यापकसाध्याभाव समानाधिकरणप्रतिहेतुविषयता विशिष्टा-न्यत्वेत्युभयाभावस्य निवेशात्, निरुक्तोभयवद्ध्रदविषयतायां चोक्तोभया भाववत्त्व विरहेणातिव्याप्ति विरहात्। ॥६८॥

नचैवं सत्यभावविशिष्ट व्यापकसामान्यत्वाभावकालीन सामा न्यत्वसाध्यके तादृशसाध्याभावाभाववदवृत्ति मत्पक्षरूप सत्प्रति पक्षे पूर्वोक्तरीत्यातिव्यातिरिति निरुक्तोभयाभाववत्त्वस्य स्वविषय तायां निवेशयितुमशक्यत्वेनोक्तातिव्याप्ति र्दुर्वारैवेति वाच्यम् ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्याभावाभाववदवृत्ति विषयता विशिष्टान्यत्वघटित त्रितयाभाववत्त्वस्य स्वविषयतायां निवेशादुक्तसत्प्रतिपक्ष विषयतायांच तस्य-सत्त्वेन लक्षणगमनसम्भवात; निरुक्तोभयवद्ध्रदेच नातिव्याप्तिः, तद्विषयतायां निरुक्तत्रितयाभाववत्त्वाभावात । ॥ ७० ॥

नचैवं सत्युक्ताभावप्रतियोगिकोटौ प्रतिहेतुव्यापकताविशिष्टसाध्याभावनिश्चय वैशिष्ट्यघटितधर्मावच्छिन्न प्रयोजकतावत्त्वस्य निवेशे प्रयोजनाभावात्, प्रतिहेतुव्यापकसाध्याभावसमानाधिकरण प्रतिहेतु विषयिताविशिष्टान्यत्व साध्याभावाभाववदवृत्तिविषयताविशिष्टान्यत्वोभयाभाववत्स्वावच्छिन्न विषयतेत्याद्युक्तविशेषणनैवोन्नायकवारणे सत्यन्तवैयर्थ्यापत्त्या, उक्तपरिष्कारासम्भवेन सम्पूर्णसत्प्रतिपक्षाक्रांतत्वरूप तादृशत्वस्यैव विशिष्टान्तरे निवेशनीयतयोक्तोभयवद्ध्रदे ऽतिव्याप्ति दुर्वारैवेति वाच्यम् ॥ ७१ ॥ विशिष्टान्तरे तादृशत्वमनिवेश्य विशिष्टान्तरविषयितायां स्वावच्छिन्नविषयकत्वाव्यापक विषयिताशून्यज्ञानीयत्वं निवेश्य कालीनत्वघटितपदार्थस्य वारणीयतयोक्तोभयवद्ध्रदे ऽतिव्याप्त्यनवकाशात् । ॥७२॥

नच तादृशत्वानिवेशे व्यापकताघटितसत्प्रतिपक्षमात्रे अव्याप्तिः, तत्रोक्तविशेषणाक्रान्तजलवद्ध्रद विषयताप्रयोज्यत्वस्य सत्प्रतिपक्षविषयता-प्रयोज्य पक्षधर्मिक साध्यवैशिष्ट्यावगाहित्वा भावाधिकरणतायांसत्वात् ; तथाच विशिष्टान्तरेतादृशत्वस्यावश्यं निवेशनीयतयोक्तोभयवद्ध्रदेऽतिव्याप्तिर्दुर्वारैवेतिवाच्यम् । ॥ ७३ ॥

स्वविषयताशालि निश्चयाव्यवहितोत्तरानुमितित्वव्यापकविरोधि-विषयताप्रयुक्त पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वा भावाधिकरणताक-त्वरूप सत्प्रतिक्षैकदेशस्यैव विशिष्टान्तरेनिवेशनीयतया उक्तातिव्याप्त्यव्याप्त्यो रनवकाशात् । ॥ ७४ ॥

नच तथा निवेशेह्रदोवह्निजलाभावोभयवानित्यादौ जलव्यापकध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्न्यभाव समानाधिकरण जलवद्ध्रदरूपे सत्प्रतिपक्षे ऽव्याप्तिः, जलवद्ध्रदरूपविशिष्टान्तरस्य निरुक्ताविशेषणाक्रान्तत्वात ;अतः शेषदळस्यापिनिवेशनीयतयोक्तोभयवद्ध्रदे ऽतिव्याप्तिर्दुर्वारैवेतिवाच्यम् ॥ ७५ ॥

स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदक यत्किंचिद्रूपावच्छिन्न स्वावच्छिन्नविषयकत्वाव्यापक विषयताशून्यज्ञानीयविषयतास्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रयोजकता निरूपित प्रयोज्यताशून्यत्वस्य स्वविषयताप्रयोज्योक्ताधिकरणतायां निवेनोक्ताव्याप्त्यतिव्याप्त्योर्वारणात् ; तथाहि–सत्प्रतिपक्षविषयताप्रयोज्य पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वा भावाधिकरणता प्रयोजकतावच्छेदकं प्रतिहेतुव्यापकसाध्याभावनिश्चय प्रतिहेतुमत्पक्षविषयत्व निश्चयत्वादि समुदायत्वं, तच्च न जलवद्ध्रदत्वावच्छिन्नविषयतात्वावच्छिन्न व्यापकतावच्छेदकं, जलव्यापकवह्न्यभावसमानकालीन जलवद्ध्रद-विषयताच न स्वावच्छिन्नविषयकत्वा व्यापकविषयताशून्य-ज्ञानीयेति नोक्तसत्प्रतिपक्षाव्याप्तिः । नवोक्तोभयवद्ध्रदे ऽतिव्याप्तिः, तत्र वह्न्यभाववद्ध्रदविषयत्वनिश्चयत्वादि समुदायत्वे वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयता स्वावच्छिन्नव्यापकतावच्छेदकत्व सत्वात् ॥७६॥

नचैवं मेयत्वविशिष्टसत्प्रतिपक्षे ऽतिव्याप्तिः, केवलसत्प्रतिपक्षविषयतात्वावच्छिन्नव्यापकतावच्छेदकत्वस्य निश्चयत्वादि घटितसमुदायत्वे अभावात् ; तादृशविषयतात्वावच्छिन्नव्यापकतावच्छेदक केवलविषयतात्वावच्छिन्न प्रयोजकतानिरूपित प्रयोज्यत्वा प्रसिद्ध्या सत्प्रतिपक्षाव्याप्तिवारणाय स्वावच्छिन्नप्रयोजकतानिरूपित प्रयोज्यत्वाभाववत्त्व सम्बन्धावच्छिन्न प्रतियोगिताकतादृशरूपाभाववत्वस्यैव निरुक्ताधिकरणतायां निवेशनीयत्वात् ; तथाचोक्तरीत्या निवेशो नसम्भवतीतिवाच्यम् । ॥ ७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनाहार्या प्रामाण्यज्ञानानास्कन्दित निश्चयवृत्तित्व विशिष्ट विशिष्टान्तर विषयतात्वावच्छिन्नव्यापकतावच्छेदकत्वस्यैव निवेशात् । निरुक्तसमुदायत्वेच निरुक्तरूपावच्छिन्न व्यापकतावच्छेदकत्वस्या व्याहतत्वादतिव्याप्ति विरहात्। ॥ ७८ ॥

नच वह्निजलाभावोभयसाध्यकेजलव्यापक तादृशोभयाभाव समानाधिकरण जलवद्ध्रदरूपे सत्प्रतिपक्षे अव्याप्तिः, तत्प्रयोज्यायां पक्षधर्मिकनिरुक्तोभय वैशिष्ट्यावगाहित्वाभावाधिकरणताया न्निरुक्तस त्प्रतिपक्षविषयता निश्चयत्वादिपर्याप्त समुदायत्वस्येव व्यापकाभाव प्र योजकस्येत्यादिरीत्या विशिष्टान्तरभूतजलवद्ध्रदविषयता निश्चयत्वादि पर्याप्त समुदायत्वस्यापि प्रयोजकतावच्छेदकतया निरुक्तरूपावच्छि न्न प्रयोजकता निरूपितप्रयोज्यताशून्य स्वविषयताप्रयोज्योक्ताधिक रणताकत्वस्य तत्रा भावात् ; अतोविराध्युन्नायकत्व घटित तादृशत्वमेव विशिष्टान्तरे निवेश्यमित्युक्तोभयवद्ध्रदादावतिव्याप्ति दुर्वारै वेति-वाच्यम् । ॥ ७९ ॥

तादृशत्वनिवेशेपि जलव्यापकवह्न्यभाव समानाधिकरण जलव्या पकतादृशोभयाभाव समानाधिकरणतादृशजलवद्ध्रदरूप सत्प्रतिपक्षे-व्याप्ते दुर्वारतया प्रयोज्यतायां विशिष्टान्तरविषयतानिष्ठ साक्षात्प्रयोज-कतानिरूपितत्वस्यावश्यं निवेशनीयतया निरुक्तसत्प्रतिपक्षाव्याप्ति वि-रहात् , निरुक्ततादृशत्वानिवेशेनोक्तातिव्याप्ति विरहात् । साक्षा त्प्रयोजकतानिरूपितत्वञ्च स्वनिरूपित प्रयोज्यतावदभाव प्रतियोगिता-वच्छेदकावच्छिन्नव्याप्यतावच्छेदकावच्छिन्न प्रतियोगिताकाभावावृत्ति त्वसहित तत्प्रयोजकतानिरूपितत्वम् । उक्तस्थले जलवद्ध्रदविषयतानि-ष्ठप्रयोजकता निरूपितस्य तादृशस्योक्तोभयावगाहित्वाभावाधिकरण-ताया मसत्त्वेन तत्र लक्षणगमनसम्भवात् । ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचैवमसम्भवः, सर्वत्र तत्प्रयोजकतानिरूपित प्रयोज्यतायां स्व निरूपित प्रयोज्यतावदभाव प्रतियोगितावच्छेदकस्य स्वावच्छिन्नव्याप्य तावच्छेदकतया तदवच्छिन्नाभाव वृत्तित्वसत्वेन तदवृत्तित्व सहित तन्निरूपितत्वस्या प्रसिद्धेः; अत उक्तपरिष्कारासम्भवेनोभयवद्ध्रदादावतिव्याप्ति र्दुवारैव। अनुपदोक्त सत्प्रतिपक्षघटित सत्प्रतिपक्षाऽव्याप्तिः विशेष्यदळघटकोन्नेयतावच्छेदकस्य एतद्दळप्रविष्टोन्नेयतावच्छेदकेन सह ऐक्यविवक्षया वारणीयेति वाच्यम्। ॥ ८१ ॥

तदवच्छिन्नव्याप्यतावच्छेदकत्वस्याधेयत्व स्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन तद्विशिष्टत्वरूपत्वात। आधेयताच स्वावच्छिन्नसमानाधिकरणात्यन्ताभाव प्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताकभेदवत्व सम्बन्धेन। ईदृशस्य स्वावच्छिन्नव्याप्यतावच्छेदकत्वस्य स्वव्यावृत्तत्वेनासम्भवविरहात, उक्तपरिष्कारस्य निर्दुष्टतयोक्तोभयवद्ध्रदातिव्याप्ति विरहात्। ॥ ८२ ॥

नच जलव्यापकेत्युक्त सत्प्रतिपक्षघटकसत्प्रतिपक्षेमेयत्व विशिष्टेति व्याप्तिः, तत्र स्वविषयताप्रयोज्यायामुभयवैशिष्ट्याभावाधिकरणतायांनिरुक्तस्यप्रयोज्यत्वस्याभावेन उक्तविशिष्टान्तरा घटितत्वसत्वात्, अतः पूर्वपरिष्कारंपरित्यज्यताद्दशत्वमेव शरणीकरणीय मित्युक्तातिव्याप्तिर्दुर्वारैवेतिवाच्यम्। ॥ ८३ ॥

मेयत्वविशिष्टपूर्वोक्त सत्प्रतिपक्षे अतिव्याप्तिवारणाय स्वविषयतानिष्ठप्रयोजकतानिरूपितत्वस्याप्युक्तविधस्यैव निवेशात्ताद्दशत्वस्य सर्वथैवानिवेशेनोक्तोभय वद्ध्रदातिव्याप्तेर्दूरनिरस्तत्वात ॥ ८४ ॥

नच स्वविषतानिष्ठप्रयोजकता निरूपितत्वस्येदृशस्य निवेशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तोभयसाध्यके जलव्यापकवह्न्यभाव समानाधिकरण जलवद्ध्रदरूप सत्प्रतिपक्षे अव्याप्तिः - तत्र ह्रदधर्मिकोभय वैशिष्ट्यावगाहित्वाभाव रूप पक्षधर्मिकसाध्य वैशिष्ट्यावगाहित्वाभावाधिकरणता निष्ठप्रयोज्यतायां पूर्वोक्तस्वविषयतानिष्ठ प्रयोजकतानिरूपितत्वस्या भावात्; तथाचोक्तदिशाविव्याप्ति र्दुर्वारैवेति वाच्यम् ॥८५॥ पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावपदेन ह्रदधर्मिकवह्निवैशिष्ट्यावगाहित्वाभावस्यैव उपादानात्तदधिकरणतानिष्ठप्रयोज्यतायां च स्वविषयतानिष्ठ साक्षात्प्रयोजकतानिरूपितत्वस्यापि सम्भवादव्याप्त्यतिव्याप्त्यो र्दूरोत्सारितत्वात् ॥८६॥

नच पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावपदेन पक्षतावच्छेदकता पर्याप्त्यधिकरणधर्मावच्छिन्न विशेष्यतानिरूपित साध्यतावच्छेदकता पर्याप्त्यधिकरणधर्मावच्छिन्न प्रकारताकत्वाभावएव विवक्षणीयः; अन्यथा ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवन्मेयत्वविशिष्टह्रदेतिव्याप्तिः, तत्रमेयत्वविशिष्ट ह्रदत्वावच्छिन्नविशेष्यतानिरूपित वह्नित्वावच्छिन्न प्रकारताकत्वाभावाधिकरणतायां तादृशह्रदत्वावच्छिन्नविशेष्यतानिरूपित वह्न्यभावव्याप्यत्वावच्छिन्न विषयताया एव प्रयोजकतया निरुक्तविशेषणाक्रान्तपक्षतावच्छेदकावच्छिन्न विशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्न प्रकारताकत्वाभावप्रयोजकत्वसत्त्वात ॥ एवं जलाभावसाध्यकस्थले मेयत्वविशिष्टं यत्तादृशसाध्याभावव्याप्यं तद्धृदे तिव्याप्तिः - तत्र पक्षधर्मिकमेयत्वविशिष्ट तादृश साध्याभावव्याप्याभावत्वावच्छिन्न प्रकारताकत्वाभावाधिकरणतायां निरुक्तविशिष्टान्तरविषयत्वाप्रयोज्यत्वस्य स्वविषयताप्रयोज्यत्वस्यसत्त्वात् । अतः पक्षतावच्छेदकता साध्यतावच्छेदकता पर्याप्त्योर्निवेशावश्यकत्वेनोक्तपरिष्कारस्य त्याज्यतया अतिव्याप्ति र्दुर्वारैवेति वाच्यम् ॥ ८७ ॥

अधिकव्यावृत्त न्यूनसाधारण पर्याप्तेरेवात्र निवेशात; तथाहि- पक्षतावच्छेदकता पर्याप्त्यनुयोगितावच्छेदक धर्मवृत्तिविशेष्यतानिरूपित साध्यतावच्छेदकता पर्याप्त्यनुयोगितावच्छेदक धर्मवृत्तिप्रकारताकत्वाभावएवात्र निवेश्यते; वृत्तित्वंचोभयत्र स्वावच्छेदकतात्वावच्छिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन; एवञ्च मेयत्वघटितोक्तविशिष्टह्र ये नातिव्याप्तिः, ह्रदत्वनिष्ठपक्षतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदक तद्व्यक्तित्वे मेयत्वह्रदत्वोभयावच्छिन्नविशेष्यतायाः स्वावच्छेदकता पर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेनासत्वादुक्तोभयत्वावच्छिन्न विशेष्यताया असंग्रहात्; एवं वह्निव्याप्य जलाभावसाध्यकस्थलेऽपि मेयत्वघटितताद्दशसाध्याभाव व्याप्याभावत्वावच्छिन्न प्रकारताया अभावत्वनिष्ठ साध्यतावच्छेदकता पर्याप्त्यनुयोगितावच्छेदक तद्व्यक्तित्वे निरुक्तसम्बन्धेनावर्तमानतया तस्यापि वारणात ॥ वह्निजलाभावोभयसाध्यकस्थले च वह्नित्वनिष्ठ साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदक तद्व्यक्तित्वे वह्नित्वावच्छिन्न प्रकारतायाः निरुक्तसम्बन्धेन वर्तमानतया ह्रदत्वावच्छिन्न विशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताया अपि प्रतियोगिकोटौ संग्रहसम्भवात। एवञ्च निरुक्तपरिष्कारस्य निर्दोषतया निरुक्तातिव्याप्तिर्निरस्तैवेति । ॥ ८८ ॥

नच - ताद्दशप्रकारताकत्वत्वावच्छिन्नाभावस्यैव पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावपदेन विवक्षणीयतया वह्निजलाभावोभय साध्यकस्थले केवलजलाभावत्वावच्छिन्न प्रकारतासाधारण ताद्दशप्रकारताकत्वत्वावच्छिन्नाभावाधिकरणतायाः केवलवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयता प्रयोज्यत्वाभावात्, तस्थलीय ताद्दश सत्प्रतिपक्षेऽव्याप्त्या निरुक्तपरिष्कारो नसम्भवत्येवेत्यतिव्याप्तिरिति वाच्यम् ॥ ८९ ॥

ताद्दश प्रकारताकत्वनिष्ठप्रतियोगिताकाभावस्यैवावगाहित्वाभावान्तेन विवक्षणात् । निरुक्तसामान्याभावा विवक्षणेन उक्ताव्याप्त्यप्रसक्त्या उक्तपरिष्कारेणैव उक्तातिव्याप्ते र्वारणीयत्वात् ॥ ९० ॥

इति श्री रामशास्त्रि विरचिता सत्प्रातिपक्ष शतकोटिः संपूर्णा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu